# ManusmRti

# મનુસ્મૃતિ અથવા માનવધર્મશાસ્ત્રમ્

## Document Information

Text title : manusmRiti

File name : manu.itx

Category : samajashastra, sociology_astrology

Location : doc_z_misc_sociology_astrology

Transliterated by : Michio Yano, Y.Ikari, Avinash Sathaye sohum at ms.uky.edu

Proofread by : Michio Yano, Y.Ikari, Avinash Sathaye sohum at ms.uky.edu

Description-comments : Reformatted NA

Latest update : November 1, 2010, March 6, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 6, 2022

*sanskritdocuments.org*

# મનુસ્મૃતિ અથવા માનવધર્મશાસ્ત્રમ્

## અધ્યાય ૧

મનુમેકાગ્રમાસીનમભિગમ્ય મહર્ષયઃ ।
પ્રતિપૂજ્ય યથાન્યાયમિદં વચનમબ્રુવન્ ॥ ૧.૧॥

ભગવન્ સર્વવર્ણાનાં યથાવદનુપૂર્વશઃ ।
અન્તરપ્રભવાનાં ચ ધર્માન્નો વક્તુમર્હસિ ॥ ૧.૨॥

ત્વમેકો હ્યસ્ય સર્વસ્ય વિધાનસ્ય સ્વયમ્ભુવઃ ।
અચિન્ત્યસ્યાપ્રમેયસ્ય કાર્યતત્ત્વાર્થવિત્પ્રભો ॥ ૧.૩॥

સ તૈઃ પૃષ્ટસ્તથા સમ્યગમિતોજા મહાત્મભિઃ ।
પ્રત્યુવાચાર્ચ્ય તાન્ સર્વાન્ મહર્ષીઞ્શ્રૂયતામિતિ ॥ ૧.૪॥

આસીદિદં તમોભૂતમપ્રજ્ઞાતમલક્ષણમ્ ।
અપ્રતર્ક્યમવિજ્ઞેયં પ્રસુપ્તમિવ સર્વતઃ ॥ ૧.૫॥

તતઃ સ્વયમ્ભૂર્ભગવાનવ્યક્તો વ્યઞ્જયન્નિદમ્ ।
મહાભૂતાદિ વૃત્તૌજાઃ પ્રાદુરાસીત્તમોનુદઃ ॥ ૧.૬॥

યોઽસાવતીન્દ્રિયગ્રાહ્યઃ સૂક્ષ્મોઽવ્યક્તઃ સનાતનઃ ।
સર્વભૂતમયોઽચિન્ત્યઃ સ એવ સ્વયમુદ્બભૌ ॥ ૧.૭॥ સ એષ

સોઽભિધ્યાય શરીરાત્સ્વાત્સિસૃક્ષુર્વિવિધાઃ પ્રજાઃ ।
અપ એવ સસર્જાદૌ તાસુ વીર્યમવાસૃજત્ ॥ ૧.૮॥

તદણ્ડમભવદ્ધૈમં સહસ્રાંશુસમપ્રભમ્ ।
તસ્મિઞ્જજ્ઞે સ્વયં બ્રહ્મા સર્વલોકપિતામહઃ ॥ ૧.૯॥

આપો નારા ઇતિ પ્રોક્તા આપો વૈ નરસૂનવઃ ।
તા યદસ્યાયનં પૂર્વં તેન નારાયણઃ સ્મૃતઃ ॥ ૧.૧૦॥

યત્તત્કારણમવ્યક્તં નિત્યં સદસદાત્મકમ્ ।

તદ્વિસૃષ્ટઃ સ પુરુષો લોકે બ્રહ્મેતિ કીર્ત્યતે ॥ ૧.૧૧॥

તસ્મિન્નણ્ડે સ ભગવાનુષિત્વા પરિવત્સરમ્ ।
સ્વયમેવાત્મનો ધ્યાનાત્તદણ્ડમકરોદ્દ્વિધા ॥ ૧.૧૨॥

તાભ્યાં સ શકલાભ્યાં ચ દિવં ભૂમિં ચ નિર્મમે ।
મધ્યે વ્યોમ દિશશ્ચાષ્ટાવપાં સ્થાનં ચ શાશ્વતમ્ ॥ ૧.૧૩॥

ઉદ્બબર્હાત્મનશ્ચૈવ મનઃ સદસદાત્મકમ્ ।
મનસશ્ચાપ્યહઙ્કારમભિમન્તારમીશ્વરમ્ ॥ ૧.૧૪॥

મહાન્તમેવ ચાત્માનં સર્વાણિ ત્રિગુણાનિ ચ ।
વિષયાણાં ગ્રહીતૃણિ શનૈઃ પઞ્ચેન્દ્રિયાણિ ચ ॥ ૧.૧૫॥

તેષાં ત્વવયવાન્ સૂક્ષ્માન્ ષણ્ણામપ્યમિતૌજસામ્ ।
સંનિવેશ્યાત્મમાત્રાસુ સર્વભૂતાનિ નિર્મમે ॥ ૧.૧૬॥

યન્ મૂર્ત્યવયવાઃ સૂક્ષ્માસ્તાનીમાન્યાશ્રયન્તિ ષટ્ ।
તસ્માચ્છરીરમિત્યાહુસ્તસ્ય મૂર્તિં મનીષિણઃ ॥ ૧.૧૭॥

તદાવિશન્તિ ભૂતાનિ મહાન્તિ સહ કર્મભિઃ ।
મનશ્ચાવયવૈઃ સૂક્ષ્મૈઃ સર્વભૂતકૃદવ્યયમ્ ॥ ૧.૧૮॥

તેષામિદં તુ સપ્તાનાં પુરુષાણાં મહૌજસામ્ ।
સૂક્ષ્માભ્યો મૂર્તિમાત્રાભ્યઃ સમ્ભવત્યવ્યયાદ્વ્યયમ્ ॥ ૧.૧૯॥

આદ્યાદ્યસ્ય ગુણં ત્વેષામવાપ્નોતિ પરઃ પરઃ ।
યો યો યાવતિથશ્ચૈષાં સ સ તાવદ્ગુણઃ સ્મૃતઃ ॥ ૧.૨૦॥

સર્વેષાં તુ સ નામાનિ કર્માણિ ચ પૃથક્પૃથક્ ।
વેદશબ્દેભ્ય એવાદૌ પૃથક્સંસ્થાશ્ચ નિર્મમે ॥ ૧.૨૧॥

કર્માત્મનાં ચ દેવાનાં સોઽસૃજત્પ્રાણિનાં પ્રભુઃ ।
સાધ્યાનાં ચ ગણં સૂક્ષ્મં યજ્ઞં ચૈવ સનાતનમ્ ॥ ૧.૨૨॥

અગ્નિવાયુરવિભ્યસ્તુ ત્રયં બ્રહ્મ સનાતનમ્ ।
દુદોહ યજ્ઞસિદ્ધ્યર્થં ઋચ્।યજુસ્।સામલક્ષણમ્ ॥ ૧.૨૩॥

કાલં કાલવિભક્તીશ્ચ નક્ષત્રાણિ ગ્રહાંસ્તથા ।
સરિતઃ સાગરાન્ શૈલાન્ સમાનિ વિષમાનિ ચ ॥ ૧.૨૪॥

તપો વાચં રતિં ચૈવ કામં ચ ક્રોધમેવ ચ ।
સૃષ્ટિં સસર્જ ચૈવૈમાં સ્રષ્ટુમિચ્છન્નિમાઃ પ્રજાઃ ॥ ૧.૨૫॥

કર્મણાં ચ વિવેકાર્થં ધર્માધર્મૌ વ્યવેચયત્ । વિવેકાય
દ્વન્દ્વૈરયોજયચ્ચૈમાઃ સુખદુઃખાદિભિઃ પ્રજાઃ ॥ ૧.૨૬॥

અણ્વ્યો માત્રા વિનાશિન્યો દશાર્ધાનાં તુ યાઃ સ્મૃતાઃ ।
તાભિઃ સાર્ધમિદં સર્વં સમ્ભવત્યનુપૂર્વશઃ ॥ ૧.૨૭॥

યં તુ કર્મણિ યસ્મિન્ સ ન્યયુઙ્ક્ત પ્રથમં પ્રભુઃ ।
સ તદેવ સ્વયં ભેજે સૃજ્યમાનઃ પુનઃ પુનઃ ॥ ૧.૨૮॥

હિંસ્રાહિંસ્રે મૃદુક્રૂરે ધર્માધર્માવૃતાનૃતે ।
યદ્યસ્ય સોઽદધાત્સર્ગે તત્તસ્ય સ્વયમાવિશત્ ॥ ૧.૨૯॥

યથર્તુલિઙ્ગાન્યર્તવઃ સ્વયમેવર્તુપર્યયે ।
સ્વાનિ સ્વાન્યભિપદ્યન્તે તથા કર્માણિ દેહિનઃ ॥ ૧.૩૦॥

લોકાનાં તુ વિવૃદ્ધ્યર્થં મુખબાહૂરુપાદતઃ ।
બ્રાહ્મણં ક્ષત્રિયં વૈશ્યં શૂદ્રં ચ નિરવર્તયત્ ॥ ૧.૩૧॥

દ્વિધા કૃત્વાઽત્મનો દેહમર્ધેન પુરુષોઽભવત્ ।
અર્ધેન નારી તસ્યાં સ વિરાજમસૃજત્પ્રભુઃ ॥ ૧.૩૨॥

તપસ્તપ્ત્વાઽસૃજદ્યં તુ સ સ્વયં પુરુષો વિરાટ્ ।
તં માં વિત્તાસ્ય સર્વસ્ય સ્રષ્ટારં દ્વિજસત્તમાઃ ॥ ૧.૩૩॥

અહં પ્રજાઃ સિસૃક્ષુસ્તુ તપસ્તપ્ત્વા સુદુશ્ચરમ્ ।
પતીન્ પ્રજાનામસૃજં મહર્ષીનાદિતો દશ ॥ ૧.૩૪॥

મરીચિમત્ર્યઙ્ગિરસૌ પુલસ્ત્યં પુલહં ક્રતુમ્ ।
પ્રચેતસં વસિષ્ઠં ચ ભૃગું નારદમેવ ચ ॥ ૧.૩૫॥

એતે મનૂંસ્તુ સપ્તાન્ યાનસૃજન્ ભૂરિતેજસઃ ।
દેવાન્ દેવનિકાયાંશ્ચ મહર્ષીંશ્ચામિતોજસઃ ॥ ૧.૩૬॥

યક્ષરક્ષઃ પિશાચાંશ્ચ ગન્ધર્વાપ્સરસોઽસુરાન્ ।
નાગાન્ સર્પાન્ સુપર્ણાંશ્ચ પિતૄણાંશ્ચ પૃથગ્ગણમ્ ॥ ૧.૩૭॥ પિતૄણાં

વિદ્યુતોઽશનિમેઘાંશ્ચ રોહિતૈન્દ્રધનૂંષિ ચ ।
ઉલ્કાનિર્ઘાતકેતૂંશ્ચ જ્યોતીંષ્યુચ્ચાવચાનિ ચ ॥ ૧.૩૮॥

કિન્નરાન્ વાનરાન્ મત્સ્યાન્ વિવિધાંશ્ચ વિહઙ્ગમાન્ ।
પશૂન્ મૃગાન્ મનુષ્યાંશ્ચ વ્યાલાંશ્ચોભયતોદતઃ ॥ ૧.૩૯॥

કૃમિકીટપતઙ્ગાંશ્ચ યૂકામક્ષિકમત્કુણમ્ ।
સર્વં ચ દંશમશકં સ્થાવરં ચ પૃથગ્વિધમ્ ॥ ૧.૪૦॥

એવમેતૈરિદં સર્વં મન્નિયોગાન્ મહાત્મભિઃ ।
યથાકર્મ તપોયોગાત્સૃષ્ટં સ્થાવરજઙ્ગમમ્ ॥ ૧.૪૧॥

યેષાં તુ યાદૃશં કર્મ ભૂતાનામિહ કીર્તિતમ્ ।
તત્તથા વોઽભિધાસ્યામિ ક્રમયોગં ચ જન્મનિ ॥ ૧.૪૨॥

પશવશ્ચ મૃગાશ્ચૈવ વ્યાલાશ્ચોભયતોદતઃ ।
રક્ષાંસિ ચ પિશાચાશ્ચ મનુષ્યાશ્ચ જરાયુજાઃ ॥ ૧.૪૩॥ મનુષાશ્ચ

અણ્ડજાઃ પક્ષિણઃ સર્પા નક્રા મત્સ્યાશ્ચ કચ્છપાઃ ।
યાનિ ચૈવં।પ્રકારાણિ સ્થલજાન્યૌદકાનિ ચ ॥ ૧.૪૪॥

સ્વેદજં દંશમશકં યૂકામક્ષિકમત્કુણમ્ ।
ઊષ્મણશ્ચોપજાયન્તે યચ્ચાન્યત્કિં ચિદીદૃશમ્ ॥ ૧.૪૫॥

ઉદ્ભિજ્જાઃ સ્થાવરાઃ સર્વે બીજકાણ્ડપ્રરોહિણઃ ।
ઓષધ્યઃ ફલપાકાન્તા બહુપુષ્પફલોપગાઃ ॥ ૧.૪૬॥

અપુષ્પાઃ ફલવન્તો યે તે વનસ્પતયઃ સ્મૃતાઃ ।
પુષ્પિણઃ ફલિનશ્ચૈવ વૃક્ષાસ્તૂભયતઃ સ્મૃતાઃ ॥ ૧.૪૭॥

ગુચ્છગુલ્મં તુ વિવિધં તથૈવ તૃણજાતયઃ ।
બીજકાણ્ડરુહાણ્યેવ પ્રતાના વલ્લ્ય એવ ચ ॥ ૧.૪૮॥

તમસા બહુરૂપેણ વેષ્ટિતાઃ કર્મહેતુના ।
અન્તસ્સંજ્ઞા ભવન્ત્યેતે સુખદુઃખસમન્વિતાઃ ॥ ૧.૪૯॥

એતદન્તાસ્તુ ગતયો બ્રહ્માદ્યાઃ સમુદાહૃતાઃ ।
ઘોરેઽસ્મિન્ ભૂતસંસારે નિત્યં સતતયાયિનિ ॥ ૧.૫૦॥

એવં સર્વં સ સૃષ્ટ્વૈદં માં ચાચિન્ત્યપરાક્રમઃ ।
આત્મન્યન્તર્દધે ભૂયઃ કાલં કાલેન પીડયન્ ॥ ૧.૫૧॥

યદા સ દેવો જાગર્તિ તદેવં ચેષ્ટતે જગત્ ।

યદા સ્વપિતિ શાન્તાત્મા તદા સર્વં નિમીલતિ ॥ ૧.૫૨॥

તસ્મિન્ સ્વપિતિ તુ સ્વસ્થે કર્માત્માનઃ શરીરિણઃ । સ્વપતિ
સ્વકર્મભ્યો નિવર્તન્તે મનશ્ચ ગ્લાનિમૃચ્છતિ ॥ ૧.૫૩॥

યુગપત્તુ પ્રલીયન્તે યદા તસ્મિન્ મહાત્મનિ ।
તદાઽયં સર્વભૂતાત્મા સુખં સ્વપિતિ નિર્વૃતઃ ॥ ૧.૫૪॥

તમોઽયં તુ સમાશ્રિત્ય ચિરં તિષ્ઠતિ સૈન્દ્રિયઃ ।
ન ચ સ્વં કુરુતે કર્મ તદોત્ક્રામતિ મૂર્તિતઃ ॥ ૧.૫૫॥

યદાઽણુમાત્રિકો ભૂત્વા બીજં સ્થાણુ ચરિષ્ણુ ચ ।
સમાવિશતિ સંસૃષ્ટસ્તદા મૂર્તિં વિમુઞ્ચતિ ॥ ૧.૫૬॥

એવં સ જાગ્રત્સ્વપ્નાભ્યામિદં સર્વં ચરાચરમ્ ।
સઞ્જીવયતિ ચાજસ્રં પ્રમાપયતિ ચાવ્યયઃ ॥ ૧.૫૭॥

ઇદં શાસ્ત્રં તુ કૃત્વાઽસૌ મામેવ સ્વયમાદિતઃ ।
વિધિવદ્ગ્રાહયામાસ મરીચ્યાદીંસ્ત્વહં મુનીન્ ॥ ૧.૫૮॥

એતદ્વોઽયં ભૃગુઃ શાસ્ત્રં શ્રાવયિષ્યત્યશેષતઃ ।
એતધિ મત્તોઽધિજગે સર્વમેષોઽખિલં મુનિઃ ॥ ૧.૫૯॥

તતસ્તથા સ તેનોક્તો મહર્ષિમનુના ભૃગુઃ ।
તાનબ્રવીદૃષીન્ સર્વાન્ પ્રીતાત્મા શ્રૂયતામિતિ ॥ ૧.૬૦॥

સ્વાયમ્ભુવસ્યાસ્ય મનોઃ ષડ્વંશ્યા મનવોઽપરે ।
સૃષ્ટવન્તઃ પ્રજાઃ સ્વાઃ સ્વા મહાત્માનો મહૌજસઃ ॥ ૧.૬૧॥

સ્વારોચિષશ્ચોત્તમશ્ચ તામસો રૈવતસ્તથા ।
ચાક્ષુષશ્ચ મહાતેજા વિવસ્વત્સુત એવ ચ ॥ ૧.૬૨॥

સ્વાયમ્ભુવાદ્યાઃ સપ્તૈતે મનવો ભૂરિતેજસઃ ।
સ્વે સ્વેઽન્તરે સર્વમિદમુત્પાદ્યાપુશ્ચરાચરમ્ ॥ ૧.૬૩॥

નિમેષા દશ ચાષ્ટૌ ચ કાષ્ઠા ત્રિંશત્તુ તાઃ કલા ।
ત્રિંશત્કલા મુહૂર્તઃ સ્યાદહોરાત્રં તુ તાવતઃ ॥ ૧.૬૪॥

અહોરાત્રે વિભજતે સૂર્યો માનુષદૈવિકે ।
રાત્રિઃ સ્વપ્નાય ભૂતાનાં ચેષ્ટાયૈ કર્મણામહઃ ॥ ૧.૬૫॥

પિત્ર્યે રાત્ર્યહની માસઃ પ્રવિભાગસ્તુ પક્ષયોઃ ।
કર્મચેષ્ટાસ્વહઃ કૃષ્ણઃ શુક્લઃ સ્વપ્નાય શર્વરી ॥ ૧.૬૬॥

દૈવે રાત્ર્યહની વર્ષં પ્રવિભાગસ્તયોઃ પુનઃ ।
અહસ્તત્રોદગયનં રાત્રિઃ સ્યાદ્દક્ષિણાયનમ્ ॥ ૧.૬૭॥

બ્રાહ્મસ્ય તુ ક્ષપાહસ્ય યત્પ્રમાણં સમાસતઃ ।
એકૈકશો યુગાનાં તુ ક્રમશસ્તન્નિબોધત ॥ ૧.૬૮॥

ચત્વાર્યાહુઃ સહસ્રાણિ વર્ષાણાં તત્કૃતં યુગમ્ ।
તસ્ય તાવત્શતી સંધ્યા સંધ્યાંશશ્ચ તથાવિધઃ ॥ ૧.૬૯॥

ઇતરેષુ સસંધ્યેષુ સસંધ્યાંશેષુ ચ ત્રિષુ ।
એકાપાયેન વર્તન્તે સહસ્રાણિ શતાનિ ચ ॥ ૧.૭૦॥

યદેતત્પરિસઙ્ખ્યાતમાદાવેવ ચતુર્યુગમ્ ।
એતદ્દ્વાદશસાહસ્રં દેવાનાં યુગમુચ્યતે ॥ ૧.૭૧॥

દૈવિકાનાં યુગાનાં તુ સહસ્રં પરિસઙ્ખ્યયા ।
બ્રાહ્મમેકમહર્જ્ઞેયં તાવતીં રાત્રિમેવ ચ ॥ ૧.૭૨॥ તાવતી રાત્રિરેવ ચ

તદ્વૈ યુગસહસ્રાન્તં બ્રાહ્મં પુણ્યમહર્વિદુઃ ।
રાત્રિં ચ તાવતીમેવ તેઽહોરાત્રવિદો જનાઃ ॥ ૧.૭૩॥

તસ્ય સોઽહર્નિશસ્યાન્તે પ્રસુપ્તઃ પ્રતિબુધ્યતે ।
પ્રતિબુદ્ધશ્ચ સૃજતિ મનઃ સદસદાત્મકમ્ ॥ ૧.૭૪॥

મનઃ સૃષ્ટિં વિકુરુતે ચોદ્યમાનં સિસૃક્ષયા ।
આકાશં જાયતે તસ્માત્તસ્ય શબ્દં ગુણં વિદુઃ ॥ ૧.૭૫॥

આકાશાત્તુ વિકુર્વાણાત્સર્વગન્ધવહઃ શુચિઃ ।
બલવાઞ્જાયતે વાયુઃ સ વૈ સ્પર્શગુણો મતઃ ॥ ૧.૭૬॥

વાયોરપિ વિકુર્વાણાદ્વિરોચિષ્ણુ તમોનુદમ્ ।
જ્યોતિરુત્પદ્યતે ભાસ્વત્તદ્રૂપગુણમુચ્યતે ॥ ૧.૭૭॥

જ્યોતિષશ્ચ વિકુર્વાણાદાપો રસગુણાઃ સ્મૃતાઃ ।
અદ્ભ્યો ગન્ધગુણા ભૂમિરિત્યેષા સૃષ્ટિરાદિતઃ ॥ ૧.૭૮॥

યદ્પ્રાગ્દ્વાદશસાહસ્રમુદિતં દૈવિકં યુગમ્ ।
તદેકસપ્તતિગુણં મન્વન્તરમિહોચ્યતે ॥ ૧.૭૯॥

મન્વન્તરાણ્યસઙ્ખ્યાનિ સર્ગઃ સંહાર એવ ચ ।
ક્રીડન્નિવૈતત્કુરુતે પરમેષ્ઠી પુનઃ પુનઃ ॥ ૧.૮૦॥

ચતુષ્પાત્સકલો ધર્મઃ સત્યં ચૈવ કૃતે યુગે ।
નાધર્મેણાગમઃ કશ્ચિન્ મનુષ્યાન્ પ્રતિ વર્તતે ॥ ૧.૮૧॥ ઉપવર્તતે

ઇતરેષ્વાગમાદ્ધર્મઃ પાદશસ્ત્વવરોપિતઃ ।
ચૌરિકાનૃતમાયાભિર્ધર્મશ્ચાપૈતિ પાદશઃ ॥ ૧.૮૨॥

અરોગાઃ સર્વસિદ્ધાર્થાશ્ચતુર્વર્ષશતાયુષઃ ।
કૃતે ત્રેતાદિષુ હ્યેષામાયુર્હ્રસતિ પાદશઃ ॥ ૧.૮૩॥ વયો હ્રસતિ

વેદોક્તમાયુર્મર્ત્યાનામાશિષશ્ચૈવ કર્મણામ્ ।
ફલન્ત્યનુયુગં લોકે પ્રભાવશ્ચ શરીરિણામ્ ॥ ૧.૮૪॥

અન્યે કૃતયુગે ધર્માસ્ત્રેતાયાં દ્વાપરેઽપરે ।
અન્યે કલિયુગે નૃણાં યુગહ્રાસાનુરૂપતઃ ॥ ૧.૮૫॥

તપઃ પરં કૃતયુગે ત્રેતાયાં જ્ઞાનમુચ્યતે ।
દ્વાપરે યજ્ઞમેવાહુર્દાનમેકં કલૌ યુગે ॥ ૧.૮૬॥

સર્વસ્યાસ્ય તુ સર્ગસ્ય ગુપ્ત્યર્થં સ મહાદ્યુતિઃ ।
મુખબાહૂરુપજ્જાનાં પૃથક્કર્માણ્યકલ્પયત્ ॥ ૧.૮૭॥

અધ્યાપનમધ્યયનં યજનં યાજનં તથા ।
દાનં પ્રતિગ્રહં ચૈવ બ્રાહ્મણાનામકલ્પયત્ ॥ ૧.૮૮॥

પ્રજાનાં રક્ષણં દાનમિજ્યાઽધ્યયનમેવ ચ ।
વિષયેષ્વપ્રસક્તિશ્ચ ક્ષત્રિયસ્ય સમાસતઃ ॥ ૧.૮૯॥ સમાદિશત્

પશૂનાં રક્ષણં દાનમિજ્યાઽધ્યયનમેવ ચ ।
વણિક્પથં કુસીદં ચ વૈશ્યસ્ય કૃષિમેવ ચ ॥ ૧.૯૦॥

એકમેવ તુ શૂદ્રસ્ય પ્રભુઃ કર્મ સમાદિશત્ ।
એતેષામેવ વર્ણાનાં શુશ્રૂષામનસૂયયા ॥ ૧.૯૧॥

ઊર્ધ્વં નાભેર્મેધ્યતરઃ પુરુષઃ પરિકીર્તિતઃ ।
તસ્માન્ મેધ્યતમં ત્વસ્ય મુખમુક્તં સ્વયમ્ભુવા ॥ ૧.૯૨॥

ઉત્તમાઙ્ગોદ્ભવાજ્જ્યૈષ્ઠ્યાદ્બ્રહ્મણશ્ચૈવ ધારણાત્ । જ્યૈષ્ઠ્યાદ્

સર્વસ્યૈવાસ્ય સર્ગસ્ય ધર્મતો બ્રાહ્મણઃ પ્રભુઃ ॥ ૧.૯૩॥

તં હિ સ્વયમ્ભૂઃ સ્વાદાસ્યાત્તપસ્તપ્ત્વાઽદિતોઽસૃજત્ ।
હવ્યકવ્યાભિવાહ્યાય સર્વસ્યાસ્ય ચ ગુપ્તયે ॥ ૧.૯૪॥

યસ્યાસ્યેન સદાઽશ્નન્તિ હવ્યાનિ ત્રિદિવૌકસઃ ।
કવ્યાનિ ચૈવ પિતરઃ કિં ભૂતમધિકં તતઃ ॥ ૧.૯૫॥

ભૂતાનાં પ્રાણિનઃ શ્રેષ્ઠાઃ પ્રાણિનાં બુદ્ધિજીવિનઃ ।
બુદ્ધિમત્સુ નરાઃ શ્રેષ્ઠા નરેષુ બ્રાહ્મણાઃ સ્મૃતાઃ ॥ ૧.૯૬॥

બ્રાહ્મણેષુ ચ વિદ્વાંસો વિદ્વત્સુ કૃતબુદ્ધયઃ ।
કૃતબુદ્ધિષુ કર્તારઃ કર્તૃષુ બ્રહ્મવેદિનઃ ॥ ૧.૯૭॥

ઉત્પત્તિરેવ વિપ્રસ્ય મૂર્તિર્ધર્મસ્ય શાશ્વતી ।
સ હિ ધર્માર્થમુત્પન્નો બ્રહ્મભૂયાય કલ્પતે ॥ ૧.૯૮॥

બ્રાહ્મણો જાયમાનો હિ પૃથિવ્યામધિજાયતે ।
ઈશ્વરઃ સર્વભૂતાનાં ધર્મકોશસ્ય ગુપ્તયે ॥ ૧.૯૯॥

સર્વં સ્વં બ્રાહ્મણસ્યેદં યત્કિં ચિત્જગતીગતમ્ ।
શ્રૈષ્ઠ્યેનાભિજનેનેદં સર્વં વૈ બ્રાહ્મણોઽર્હતિ ॥ ૧.૧૦૦॥

સ્વમેવ બ્રાહ્મણો ભુઙ્ક્તે સ્વં વસ્તે સ્વં દદાતિ ચ ।
આનૃશંસ્યાદ્બ્રાહ્મણસ્ય ભુઞ્જતે હીતરે જનાઃ ॥ ૧.૧૦૧॥

તસ્ય કર્મવિવેકાર્થં શેષાણામનુપૂર્વશઃ ।
સ્વાયમ્ભુવો મનુર્ધીમાનિદં શાસ્ત્રમકલ્પયત્ ॥ ૧.૧૦૨॥

વિદુષા બ્રાહ્મણેનેદમધ્યેતવ્યં પ્રયત્નતઃ ।
શિશ્યેભ્યશ્ચ પ્રવક્તવ્યં સમ્યગ્ઁ નાન્યેન કેન ચિત્ ॥ ૧.૧૦૩॥

ઇદં શાસ્ત્રમધીયાનો બ્રાહ્મણઃ શંસિતવ્રતઃ ।
મનોવાગ્દેહજૈર્નિત્યં કર્મદોષૈર્ન લિપ્યતે ॥ ૧.૧૦૪॥

પુનાતિ પઙ્ક્તિવંશ્યાંશ્ચ સપ્ત સપ્ત પરાવરાન્ ।
પૃથિવીમપિ ચૈવેમાં કૃત્સ્નામેકોઽપિ સોઽર્હતિ ॥ ૧.૧૦૫॥

ઇદં સ્વસ્ત્યયનં શ્રેષ્ઠમિદં બુદ્ધિવિવર્ધનમ્ ।
ઇદં યશસ્યમાયુષ્યં ઇદં નિઃશ્રેયસં પરમ્ ॥ ૧.૧૦૬॥ ઇદં યશસ્યં સતતમ્

અસ્મિન્ ધર્મેऽખિલેનોક્તૌ ગુણદોષૌ ચ કર્મણામ્ ।
ચતુર્ણામપિ વર્ણાનામાચારશ્ચૈવ શાશ્વતઃ ॥ ૧.૧૦૭॥

આચારઃ પરમો ધર્મઃ શ્રુત્યોક્તઃ સ્માર્ત એવ ચ ।
તસ્માદસ્મિન્ સદા યુક્તો નિત્યં સ્યાદાત્મવાન્ દ્વિજઃ ॥ ૧.૧૦૮॥

આચારાદ્વિચ્યુતો વિપ્રો ન વેદફલમશ્નુતે ।
આચારેણ તુ સંયુક્તઃ સમ્પૂર્ણફલભાગ્ભવેત્ ॥ ૧.૧૦૯॥ સમ્પૂર્ણફલભાક્સ્મૃતઃ

એવમાચારતો દૃષ્ટ્વા ધર્મસ્ય મુનયો ગતિમ્ ।
સર્વસ્ય તપસો મૂલમાચારં જગૃહુઃ પરમ્ ॥ ૧.૧૧૦॥

જગતશ્ચ સમુત્પત્તિં સંસ્કારવિધિમેવ ચ ।
વ્રતચર્યોપચારં ચ સ્નાનસ્ય ચ પરં વિધિમ્ ॥ ૧.૧૧૧॥

દારાધિગમનં ચૈવ વિવાહાનાં ચ લક્ષણમ્ ।
મહાયજ્ઞવિધાનં ચ શ્રાદ્ધકલ્પં ચ શાશ્વતમ્ ॥ ૧.૧૧૨॥

વૃત્તીનાં લક્ષણં ચૈવ સ્નાતકસ્ય વ્રતાનિ ચ ।
ભક્ષ્યાભક્ષ્યં ચ શૌચં ચ દ્રવ્યાણાં શુદ્ધિમેવ ચ ॥ ૧.૧૧૩॥

સ્ત્રીધર્મયોગં તાપસ્યં મોક્ષં સંન્યાસમેવ ચ ।
રાજ્ઞશ્ચ ધર્મમખિલં કાર્યાણાં ચ વિનિર્ણયમ્ ॥ ૧.૧૧૪॥

સાક્ષિપ્રશ્નવિધાનં ચ ધર્મં સ્ત્રીપુંસયોરપિ ।
વિભાગધર્મં દ્યૂતં ચ કણ્ટકાનાં ચ શોધનમ્ ॥ ૧.૧૧૫॥

વૈશ્યશૂદ્રોપચારં ચ સઙ્કીર્ણાનાં ચ સમ્ભવમ્ ।
આપદ્ધર્મં ચ વર્ણાનાં પ્રાયશ્ચિત્તવિધિં તથા ॥ ૧.૧૧૬॥

સંસારગમનં ચૈવ ત્રિવિધં કર્મસમ્ભવમ્ ।
નિઃશ્રેયસં કર્મણાં ચ ગુણદોષપરીક્ષણમ્ ॥ ૧.૧૧૭॥

દેશધર્માન્જાતિધર્માન્ કુલધર્માંશ્ચ શાશ્વતાન્ ।
પાષણ્ડગણધર્માંશ્ચ શાસ્ત્રેऽસ્મિન્નુક્તવાન્ મનુઃ ॥ ૧.૧૧૮॥

યથૈદમુક્તવાંશાસ્ત્રં પુરા પૃષ્ટો મનુર્મયા ।
તથૈદં યૂયમપ્યદ્ય મત્સકાશાન્નિબોધત ॥ ૧.૧૧૯॥

## અધ્યાય ૨

વિદ્વદ્ભિઃ સેવિતઃ સદ્ભિર્નિત્યમદ્વેષરાગિભિઃ ।
હૃદયેનાભ્યનુજ્ઞાતો યો ધર્મસ્તં નિબોધત ॥ ૨.૧॥

કામાત્મતા ન પ્રશસ્તા ન ચૈવૈહાસ્ત્યકામતા ।
કામ્યો હિ વેદાધિગમઃ કર્મયોગશ્ચ વૈદિકઃ ॥ ૨.૨॥

સઙ્કલ્પમૂલઃ કામો વૈ યજ્ઞાઃ સઙ્કલ્પસમ્ભવાઃ ।
વ્રતાનિ યમધર્માશ્ચ સર્વે સઙ્કલ્પજાઃ સ્મૃતાઃ ॥ ૨.૩॥

અકામસ્ય ક્રિયા કા ચિદ્દૃશ્યતે નેહ કર્હિ ચિત્ ।
યદ્યધિ કુરુતે કિં ચિત્તત્તત્કામસ્ય ચેષ્ટિતમ્ ॥ ૨.૪॥

તેષુ સમ્યગ્વર્તમાનો ગચ્છત્યમરલોકતામ્ ।
યથા સઙ્કલ્પિતાંશ્ચેહ સર્વાન્ કામાન્ સમશ્નુતે ॥ ૨.૫॥

વેદોઽખિલો ધર્મમૂલં સ્મૃતિશીલે ચ તદ્વિદામ્ ।
આચારશ્ચૈવ સાધૂનામાત્મનસ્તુષ્ટિરેવ ચ ॥ ૨.૬॥

યઃ કશ્ચિત્કસ્ય ચિદ્ધર્મો મનુના પરિકીર્તિતઃ ।
સ સર્વોઽભિહિતો વેદે સર્વજ્ઞાનમયો હિ સઃ ॥ ૨.૭॥

સર્વં તુ સમવેક્ષ્યેદં નિખિલં જ્ઞાનચક્ષુષા ।
શ્રુતિપ્રામાણ્યતો વિદ્વાન્ સ્વધર્મે નિવિશેત વૈ ॥ ૨.૮॥

શ્રુતિસ્મૃત્યોદિતં ધર્મમનુતિષ્ઠન્ હિ માનવઃ ।
ઇહ કીર્તિમવાપ્નોતિ પ્રેત્ય ચાનુત્તમં સુખમ્ ॥ ૨.૯॥

શ્રુતિસ્તુ વેદો વિજ્ઞેયો ધર્મશાસ્ત્રં તુ વૈ સ્મૃતિઃ ।
તે સર્વાર્થેષ્વમીમાંસ્યે તાભ્યાં ધર્મો હિ નિર્બભૌ ॥ ૨.૧૦॥

યોઽવમન્યેત તે મૂલે હેતુશાસ્ત્રાશ્રયાદ્દ્વિજઃ ।
સ સાધુભિર્બહિષ્કાર્યો નાસ્તિકો વેદનિન્દકઃ ॥ ૨.૧૧॥

વેદઃ સ્મૃતિઃ સદાચારઃ સ્વસ્ય ચ પ્રિયમાત્મનઃ ।
એતચ્ચતુર્વિધં પ્રાહુઃ સાક્ષાદ્ધર્મસ્ય લક્ષણમ્ ॥ ૨.૧૨॥

અર્થકામેષ્વસક્તાનાં ધર્મજ્ઞાનં વિધીયતે ।
ધર્મં જિજ્ઞાસમાનાનાં પ્રમાણં પરમં શ્રુતિઃ ॥ ૨.૧૩॥

શ્રુતિદ્વૈધં તુ યત્ર સ્યાત્તત્ર ધર્માવુભૌ સ્મૃતૌ ।
ઉભાવપિ હિ તૌ ધર્મૌ સમ્યગુક્તૌ મનીષિભિઃ ॥ ૨.૧૪॥

ઉદિતેઽનુદિતે ચૈવ સમયાધ્યુષિતે તથા ।
સર્વથા વર્તતે યજ્ઞ ઇતીયં વૈદિકી શ્રુતિઃ ॥ ૨.૧૫॥

નિષેકાદિશ્મશાનાન્તો મન્ત્રૈર્યસ્યોદિતો વિધિઃ ।
તસ્ય શાસ્ત્રેઽધિકારોઽસ્મિન્ જ્ઞેયો નાન્યસ્ય કસ્ય ચિત્ ॥ ૨.૧૬॥

સરસ્વતીદૃશદ્વત્યોર્દેવનદ્યોર્યદન્તરમ્ ।
તં દેવનિર્મિતં દેશં બ્રહ્માવર્તં પ્રચક્ષતે ॥ ૨.૧૭॥

તસ્મિન્ દેશે ય આચારઃ પારમ્પર્યક્રમાગતઃ ।
વર્ણાનાં સાન્તરાલાનાં સ સદાચાર ઉચ્યતે ॥ ૨.૧૮॥

કુરુક્ષેત્રં ચ મત્સ્યાશ્ચ પઞ્ચાલાઃ શૂરસેનકાઃ ।
એષ બ્રહ્મર્ષિદેશો વૈ બ્રહ્માવર્તાદનન્તરઃ ॥ ૨.૧૯॥

એતદ્દેશપ્રસૂતસ્ય સકાશાદગ્રજન્મનઃ ।
સ્વં સ્વં ચરિત્રં શિક્ષેરન્ પૃથિવ્યાં સર્વમાનવાઃ ॥ ૨.૨૦॥

હિમવદ્વિન્ધ્યયોર્મધ્યં યત્પ્રાગ્વિનશનાદપિ ।
પ્રત્યગેવ પ્રયાગાચ્ચ મધ્યદેશઃ પ્રકીર્તિતઃ ॥ ૨.૨૧॥

આ સમુદ્રાત્તુ વૈ પૂર્વાદા સમુદ્રાચ્ચ પશ્ચિમાત્ ।
તયોરેવાન્તરં ગિર્યોરાર્યાવર્તં વિદુર્બુધાઃ ॥ ૨.૨૨॥

કૃષ્ણસારસ્તુ ચરતિ મૃગો યત્ર સ્વભાવતઃ ।
સ જ્ઞેયો યજ્ઞિયો દેશો મ્લેચ્છદેશસ્ત્વતઃ પરઃ ॥ ૨.૨૩॥

એતાન્દ્વિજાતયો દેશાન્ સંશ્રયેરન્ પ્રયત્નતઃ ।
શૂદ્રસ્તુ યસ્મિન્ કસ્મિન્ વા નિવસેદ્વૃત્તિકર્શિતઃ ॥ ૨.૨૪॥ યસ્મિંસ્તસ્મિન્ વા

એષા ધર્મસ્ય વો યોનિઃ સમાસેન પ્રકીર્તિતા ।
સમ્ભવશ્ચાસ્ય સર્વસ્ય વર્ણધર્માન્નિબોધત ॥ ૨.૨૫॥

વૈદિકૈઃ કર્મભિઃ પુણ્યૈર્નિષેકાદિર્દ્વિજન્મનામ્ ।
કાર્યઃ શરીરસંસ્કારઃ પાવનઃ પ્રેત્ય ચેહ ચ ॥ ૨.૨૬॥

ગાર્ભૈર્હોમૈર્જાતકર્મચૌડમૌઞ્જીનિબન્ધનૈઃ ।
બૈજિકં ગાર્ભિકં ચૈનં દ્વિજાનામપમૃજ્યતે ॥ ૨.૨૭॥

સ્વાધ્યાયેન વ્રતૈર્હોમૈસ્ત્રૈવિદ્યેનેજ્યયા સુતૈઃ ।
મહાયજ્ઞૈશ્ચ યજ્ઞૈશ્ચ બ્રાહ્મીયં ક્રિયતે તનુઃ ॥ ૨.૨૮॥

પ્રાઙ્નાભિવર્ધનાત્પુંસો જાતકર્મ વિધીયતે ।
મન્ત્રવત્પ્રાશનં ચાસ્ય હિરણ્યમધુસર્પિષામ્ ॥ ૨.૨૯॥

નામધેયં દશમ્યાં તુ દ્વાદશ્યાં વાઽસ્ય કારયેત્ ।
પુણ્યે તિથૌ મુહૂર્તે વા નક્ષત્રે વા ગુણાન્વિતે ॥ ૨.૩૦॥

મઙ્ગલ્યં બ્રાહ્મણસ્ય સ્યાત્ક્ષત્રિયસ્ય બલાન્વિતમ્ ।
વૈશ્યસ્ય ધનસંયુક્તં શૂદ્રસ્ય તુ જુગુપ્સિતમ્ ॥ ૨.૩૧॥

શર્મવદ્બ્રાહ્મણસ્ય સ્યાદ્રાજ્ઞો રક્ષાસમન્વિતમ્ । રાજ્ઞા
વૈશ્યસ્ય પુષ્ટિસંયુક્તં શૂદ્રસ્ય પ્રેષ્યસંયુતમ્ ॥ ૨.૩૨॥

સ્ત્રીણાં સુખોદ્યમક્રૂરં વિસ્પષ્ટાર્થં મનોહરમ્ ।
મઙ્ગલ્યં દીર્ઘવર્ણાન્તમાશીર્વાદાભિધાનવત્ ॥ ૨.૩૩॥

ચતુર્થે માસિ કર્તવ્યં શિશોર્નિષ્ક્રમણં ગૃહાત્ ।
ષષ્ઠેઽન્નપ્રાશનં માસિ યદ્વેષ્ટં મઙ્ગલં કુલે ॥ ૨.૩૪॥

ચૂડાકર્મ દ્વિજાતીનાં સર્વેષામેવ ધર્મતઃ ।
પ્રથમેઽબ્દે તૃતીયે વા કર્તવ્યં શ્રુતિચોદનાત્ ॥ ૨.૩૫॥ શ્રુતિનોદનાત્

ગર્ભાષ્ટમેઽબ્દે કુર્વીત બ્રાહ્મણસ્યોપનાયનમ્ ।
ગર્ભાદેકાદશે રાજ્ઞો ગર્ભાત્તુ દ્વાદશે વિશઃ ॥ ૨.૩૬॥

બ્રહ્મવર્ચસકામસ્ય કાર્યો વિપ્રસ્ય પઞ્ચમે ।
રાજ્ઞો બલાર્થિનઃ ષષ્ઠે વૈશ્યસ્યેહાર્થિનોઽષ્ટમે ॥ ૨.૩૭॥

આ ષોડશાદ્બ્રાહ્મણસ્ય સાવિત્રી નાતિવર્તતે ।
આ દ્વાવિંશાત્ક્ષત્રબન્ધોરા ચતુર્વિંશતેર્વિશઃ ॥ ૨.૩૮॥

અત ઊર્ધ્વં ત્રયોઽપ્યેતે યથાકાલમસંસ્કૃતાઃ ।
સાવિત્રીપતિતા વ્રાત્યા ભવન્ત્યાર્યવિગર્હિતાઃ ॥ ૨.૩૯॥

નૈતૈરપૂતૈર્વિધિવદાપદ્યપિ હિ કર્હિ ચિત્ ।
બ્રાહ્માન્ યૌનાંશ્ચ સમ્બન્ધાન્નાચરેદ્બ્રાહ્મણઃ સહ ॥ ૨.૪૦॥ બ્રાહ્મણૈઃ સહ

કાર્ષ્ણરૌરવબાસ્તાનિ ચર્માણિ બ્રહ્મચારિણઃ ।

વસીરન્નાનુપૂર્વ્યેણ શાણક્ષૌમાવિકાનિ ચ ॥ ૨.૪૧॥

મૌઞ્જી ત્રિવૃત્સમા શ્લક્ષ્ણા કાર્યા વિપ્રસ્ય મેખલા ।
ક્ષત્રિયસ્ય તુ મૌર્વી જ્યા વૈશ્યસ્ય શણતાન્તવી ॥ ૨.૪૨॥

મુઞ્જાલાભે તુ કર્તવ્યાઃ કુશાશ્મન્તકબલ્વજૈઃ ।
ત્રિવૃતા ગ્રન્થિનૈકેન ત્રિભિઃ પઞ્ચભિરેવ વા ॥ ૨.૪૩॥

કાર્પાસમુપવીતં સ્યાદ્વિપ્રસ્યોર્ધ્વવૃતં ત્રિવૃત્ ।
શણસૂત્રમયં રાજ્ઞો વૈશ્યસ્યાવિકસૌત્રિકમ્ ॥ ૨.૪૪॥

બ્રાહ્મણો બૈલ્વપાલાશૌ ક્ષત્રિયો વાટખાદિરૌ ।
પૈલવૌદુમ્બરૌ વૈશ્યો દણ્ડાનર્હન્તિ ધર્મતઃ ॥ ૨.૪૫॥

કેશાન્તિકો બ્રાહ્મણસ્ય દણ્ડઃ કાર્યઃ પ્રમાણતઃ ।
લલાટસમ્મિતો રાજ્ઞઃ સ્યાત્તુ નાસાન્તિકો વિશઃ ॥ ૨.૪૬॥

ઋજવસ્તે તુ સર્વે સ્યુરવ્રણાઃ સૌમ્યદર્શનાઃ ।
અનુદ્વેગકરા નૃણાં સત્વચોઽનગ્નિદૂષિતાઃ ॥ ૨.૪૭॥

પ્રતિગૃહ્યેપ્સિતં દણ્ડમુપસ્થાય ચ ભાસ્કરમ્ ।
પ્રદક્ષિણં પરીત્યાગ્નિં ચરેદ્ભૈક્ષં યથાવિધિ ॥ ૨.૪૮॥

ભવત્પૂર્વં ચરેદ્ભૈક્ષમુપનીતો દ્વિજોત્તમઃ ।
ભવન્મધ્યં તુ રાજન્યો વૈશ્યસ્તુ ભવદુત્તરમ્ ॥ ૨.૪૯॥

માતરં વા સ્વસારં વા માતુર્વા ભગિનીં નિજામ્ ।
ભિક્ષેત ભિક્ષાં પ્રથમં યા ચૈનં નાવમાનયેત્ ॥ ૨.૫૦॥

સમાહૃત્ય તુ તદ્ભૈક્ષં યાવદન્નમમાયયા । યાવદર્થં
નિવેદ્ય ગુરવેઽશ્નીયાદાચમ્ય પ્રાઙ્મુખઃ શુચિઃ ॥ ૨.૫૧॥

આયુષ્યં પ્રાઙ્મુખો ભુઙ્ક્તે યશસ્યં દક્ષિણામુખઃ ।
શ્રિયં પ્રત્યઙ્મુખો ભુઙ્ક્તે ઋતં ભુઙ્ક્તે હ્યુદઙ્મુખઃ ॥ ૨.૫૨॥

ઉપસ્પૃશ્ય દ્વિજો નિત્યમન્નમદ્યાત્સમાહિતઃ ।
ભુક્ત્વા ચોપસ્પૃશેત્સમ્યગદ્ભિઃ ખાનિ ચ સંસ્પૃશેત્ ॥ ૨.૫૩॥

પૂજયેદશનં નિત્યમદ્યાચ્ચૈતદકુત્સયન્ ।
દૃષ્ટ્વા હૃષ્યેત્પ્રસીદેચ્ચ પ્રતિનન્દેચ્ચ સર્વશઃ ॥ ૨.૫૪॥

પૂજિતં હ્યશનં નિત્યં બલમૂર્જં ચ યચ્છતિ ।
અપૂજિતં તુ તદ્ભુક્તમુભયં નાશયેદિદમ્ ॥ ૨.૫૫॥

નોચ્છિષ્ટં કસ્ય ચિદ્દ્યાન્નાદ્યાદેતત્તથાઽન્તરા ।
ન ચૈવાત્યશનં કુર્યાન્ન ચોચ્છિષ્ટઃ ક્વ ચિદ્વ્રજેત્ ॥ ૨.૫૬॥

અનારોગ્યમનાયુષ્યમસ્વર્ગ્યં ચાતિભોજનમ્ ।
અપુણ્યં લોકવિદ્વિષ્ટં તસ્માત્તત્પરિવર્જયેત્ ॥ ૨.૫૭॥

બ્રાહ્મેણ વિપ્રસ્તીર્થેન નિત્યકાલમુપસ્પૃશેત્ ।
કાયત્રૈદશિકાભ્યાં વા ન પિત્ર્યેણ કદા ચન ॥ ૨.૫૮॥

અઙ્ગુષ્ઠમૂલસ્ય તલે બ્રાહ્મં તીર્થં પ્રચક્ષતે ।
કાયમઙ્ગુલિમૂલેઽગ્રે દેવં પિત્ર્યં તયોરધઃ ॥ ૨.૫૯॥

ત્રિરાચામેદપઃ પૂર્વં દ્વિઃ પ્રમૃજ્યાત્તતો મુખમ્ ।
ખાનિ ચૈવ સ્પૃશેદદ્ભિરાત્માનં શિર એવ ચ ॥ ૨.૬૦॥

અનુષ્ણાભિરફેનાભિરદ્ભિસ્તીર્થેન ધર્મવિત્ ।
શૌચેપ્સુઃ સર્વદાઽઽચામેદેકાન્તે પ્રાગુદઙ્મુખઃ ॥ ૨.૬૧॥

હૃદ્ગાભિઃ પૂયતે વિપ્રઃ કણ્ઠગાભિસ્તુ ભૂમિપઃ ।
વૈશ્યોઽદ્ભિઃ પ્રાશિતાભિસ્તુ શૂદ્રઃ સ્પૃષ્ટાભિરન્તતઃ ॥ ૨.૬૨॥

ઉદ્ધૃતે દક્ષિણે પાણાવુપવીત્યુચ્યતે દ્વિજઃ ।
સવ્યે પ્રાચીનાવીતી નિવીતી કણ્ઠસજ્જને ॥ ૨.૬૩॥

મેખલામજિનં દણ્ડમુપવીતં કમણ્ડલુમ્ ।
અપ્સુ પ્રાસ્ય વિનષ્ટાનિ ગૃહ્ણીતાન્યાનિ મન્ત્રવત્ ॥ ૨.૬૪॥

કેશાન્તઃ ષોડશે વર્ષે બ્રાહ્મણસ્ય વિધીયતે ।
રાજન્યબન્ધોર્દ્વાવિંશે વૈશ્યસ્ય દ્વ્યધિકે મતઃ ॥ ૨.૬૫॥

અમન્ત્રિકા તુ કાર્યેયં સ્ત્રીણામાવૃદશેષતઃ ।
સંસ્કારાર્થં શરીરસ્ય યથાકાલં યથાક્રમમ્ ॥ ૨.૬૬॥

વૈવાહિકો વિધિઃ સ્ત્રીણાં સંસ્કારો વૈદિકઃ સ્મૃતઃ ।
પતિસેવા ગુરૌ વાસો ગૃહાર્થોઽગ્નિપરિક્રિયા ॥ ૨.૬૭॥

એષ પ્રોક્તો દ્વિજાતીનામૌપનાયનિકો વિધિઃ ।
ઉત્પત્તિવ્યઞ્જકઃ પુણ્યઃ કર્મયોગં નિબોધત ॥ ૨.૬૮॥

ઉપનીયં ગુરુઃ શિષ્યં શિક્ષયેત્શૌચમાદિતઃ ।
આચારમગ્નિકાર્યં ચ સંધ્યોપાસનમેવ ચ ॥ ૨.૬૯॥

અધ્યેષ્યમાણસ્ત્વાચાન્તો યથાશાસ્ત્રમુદઙ્મુખઃ ।
બ્રહ્માઞ્જલિકૃતોઽધ્યાપ્યો લઘુવાસા જિતેન્દ્રિયઃ ॥ ૨.૭૦॥

બ્રહ્મારમ્ભેઽવસાને ચ પાદૌ ગ્રાહ્યૌ ગુરોઃ સદા ।
સંહત્ય હસ્તાવધ્યેયં સ હિ બ્રહ્માઞ્જલિઃ સ્મૃતઃ ॥ ૨.૭૧॥

વ્યત્યસ્તપાણિના કાર્યમુપસઙ્ગ્રહણં ગુરોઃ ।
સવ્યેન સવ્યઃ સ્પ્રષ્ટવ્યો દક્ષિણેન ચ દક્ષિણઃ ॥ ૨.૭૨॥

અધ્યેષ્યમાણં તુ ગુરુર્નિત્યકાલમતન્દ્રિતઃ ।
અધીષ્વ ભો ઇતિ બ્રૂયાદ્વિરામોઽસ્ત્વિતિ ચારમેત્ ॥ ૨.૭૩॥

બ્રહ્મણઃ પ્રણવં કુર્યાદાદાવન્તે ચ સર્વદા ।
સ્રવત્યનોઙ્કૃતં પૂર્વં પરસ્તાચ્ચ વિશીર્યતિ ॥ ૨.૭૪॥

પ્રાક્કૂલાન્ પર્યુપાસીનઃ પવિત્રૈશ્ચૈવ પાવિતઃ ।
પ્રાણાયામૈસ્ત્રિભિઃ પૂતસ્તત ઓં।કારમર્હતિ ॥ ૨.૭૫॥

અકારં ચાપ્યુકારં ચ મકારં ચ પ્રજાપતિઃ ।
વેદત્રયાન્નિરદુહદ્ભૂર્ભુવઃ સ્વરિતીતિ ચ ॥ ૨.૭૬॥

ત્રિભ્ય એવ તુ વેદેભ્યઃ પાદં પાદમદૂદુહત્ ।
તદિત્યર્ચોઽસ્યાઃ સાવિત્ર્યાઃ પરમેષ્ઠી પ્રજાપતિઃ ॥ ૨.૭૭॥

એતદક્ષરમેતાં ચ જપન્ વ્યાહૃતિપૂર્વિકામ્ ।
સંધ્યયોર્વેદવિદ્વિપ્રો વેદપુણ્યેન યુજ્યતે ॥ ૨.૭૮॥

સહસ્રકૃત્વસ્ત્વભ્યસ્ય બહિરેતત્ત્રિકં દ્વિજઃ ।
મહતોઽપ્યેનસો માસાત્ત્વચેવાહિર્વિમુચ્યતે ॥ ૨.૭૯॥

એતયાઋચા વિસંયુક્તઃ કાલે ચ ક્રિયયા સ્વયા ।
બ્રહ્મક્ષત્રિયવિદ્યોનિર્ગર્હણાં યાતિ સાધુષુ ॥ ૨.૮૦॥

ઓંકારપૂર્વિકાસ્તિસ્રો મહાવ્યાહૃતયોઽવ્યયાઃ ।
ત્રિપદા ચૈવ સાવિત્રી વિજ્ઞેયં બ્રહ્મણો મુખમ્ ॥ ૨.૮૧॥

યોઽધીતેઽહન્યહન્યેતાં ત્રીણિ વર્ષાણ્યતન્દ્રિતઃ ।

સ બ્રહ્મ પરમભ્યેતિ વાયુભૂતઃ ખમૂર્તિમાન્ ॥ ૨.૮૨॥

એકાક્ષરં પરં બ્રહ્મ પ્રાણાયામઃ પરં તપઃ ।
સાવિત્ર્યાસ્તુ પરં નાસ્તિ મૌનાત્સત્યં વિશિષ્યતે ॥ ૨.૮૩॥

ક્ષરન્તિ સર્વા વૈદિક્યો જુહોતિયજતિક્રિયાઃ ।
 અક્ષરં દુષ્કરં જ્ઞેયં બ્રહ્મ ચૈવ પ્રજાપતિઃ ॥ ૨.૮૪॥ અક્ષરં ત્વક્ષરં જ્ઞેયં

વિધિયજ્ઞાજ્જપયજ્ઞો વિશિષ્ટો દશભિર્ગુણૈઃ ।
ઉપાંશુઃ સ્યાત્શતગુણઃ સાહસ્રો માનસઃ સ્મૃતઃ ॥ ૨.૮૫॥

યે પાકયજ્ઞાઃ ચત્વારો વિધિયજ્ઞસમન્વિતાઃ ।
સર્વે તે જપયજ્ઞસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૨.૮૬॥

જપ્યેનૈવ તુ સંસિધ્યેદ્બ્રાહ્મણો નાત્ર સંશયઃ ।
કુર્યાદન્યન્ન વા કુર્યાન્ મૈત્રો બ્રાહ્મણ ઉચ્યતે ॥ ૨.૮૭॥

ઇન્દ્રિયાણાં વિચરતાં વિષયેષ્વપહારિષુ ।
સંયમે યત્નમાતિષ્ઠેદ્વિદ્વાન્ યન્તૈવ વાજિનામ્ ॥ ૨.૮૮॥

એકાદશેન્દ્રિયાણ્યાહુર્યાનિ પૂર્વે મનીષિણઃ ।
તાનિ સમ્યક્પ્રવક્ષ્યામિ યથાવદનુપૂર્વશઃ ॥ ૨.૮૯॥

શ્રોત્રં ત્વક્ચક્ષુષી જિહ્વા નાસિકા ચૈવ પઞ્ચમી ।
પાયૂપસ્થં હસ્તપાદં વાક્ચૈવ દશમી સ્મૃતા ॥ ૨.૯૦॥

બુદ્ધીન્દ્રિયાણિ પઞ્ચૈષાં શ્રોત્રાદીન્યનુપૂર્વશઃ ।
કર્મેન્દ્રિયાણિ પઞ્ચૈષાં પાય્વાદીનિ પ્રચક્ષતે ॥ ૨.૯૧॥

એકાદશં મનો જ્ઞેયં સ્વગુણેનૌભયાત્મકમ્ ।
યસ્મિન્ જિતે જિતાવેતૌ ભવતઃ પઞ્ચકૌ ગણૌ ॥ ૨.૯૨॥

ઇન્દ્રિયાણાં પ્રસઙ્ગેન દોષં ઋચ્છત્યસંશયમ્ ।
સંનિયમ્ય તુ તાન્યેવ તતઃ સિદ્ધિં નિગચ્છતિ ॥ ૨.૯૩॥

ન જાતુ કામઃ કામાનામુપભોગેન શામ્યતિ ।
હવિષા કૃષ્ણવર્ત્મેવ ભૂય એવાભિવર્ધતે ॥ ૨.૯૪॥

યશ્ચૈતાન્ પ્રાપ્નુયાત્સર્વાન્ યશ્ચૈતાન્ કેવલાંસ્ત્યજેત્ ॥

પ્રાપણાત્સર્વકામાનાં પરિત્યાગો વિશિષ્યતે ॥ ૨.૯૫॥

ન તથૈતાનિ શક્યન્તે સંનિયન્તુમસેવયા ॥

વિષયેષુ પ્રજુષ્ટાનિ યથા જ્ઞાનેન નિત્યશઃ ॥ ૨.૯૬॥

વેદાસ્ત્યાગશ્ચ યજ્ઞાશ્ચ નિયમાશ્ચ તપાંસિ ચ ।
ન વિપ્રદુષ્ટભાવસ્ય સિદ્ધિં ગચ્છતિ કર્હિ ચિત્ ॥ ૨.૯૭॥

શ્રુત્વા સ્પૃષ્ટ્વા ચ દૃષ્ટ્વા ચ ભુક્ત્વા ઘ્રાત્વા ચ યો નરઃ ।
ન હૃષ્યતિ ગ્લાયતિ વા સ વિજ્ઞેયો જિતેન્દ્રિયઃ ॥ ૨.૯૮॥

ઇન્દ્રિયાણાં તુ સર્વેષાં યદ્યેકં ક્ષરતીન્દ્રિયમ્ ।
તેનાસ્ય ક્ષરતિ પ્રજ્ઞા દૃતેઃ પાદાદિવોદકમ્ ॥ ૨.૯૯॥

વશે કૃત્વેન્દ્રિયગ્રામં સંયમ્ય ચ મનસ્તથા ।
સર્વાન્ સંસાધયેદર્થાનક્ષિણ્વન્ યોગતસ્તનુમ્ ॥ ૨.૧૦૦॥

પૂર્વાં સંધ્યાં જપંસ્તિષ્ઠેત્સાવિત્રીમાઽર્કદર્શનાત્ ।
પશ્ચિમાં તુ સમાસીનઃ સમ્યગૃક્ષવિભાવનાત્ ॥ ૨.૧૦૧॥ પશ્ચિમાં તુ સદાસીત

પૂર્વાં સંધ્યાં જપંસ્તિષ્ઠન્નૈશમેનો વ્યપોહતિ ।
પશ્ચિમાં તુ સમાસીનો મલં હન્તિ દિવાકૃતમ્ ॥ ૨.૧૦૨॥

ન તિષ્ઠતિ તુ યઃ પૂર્વાં નોપાસ્તે યશ્ચ પશ્ચિમામ્ ।
સ શૂદ્રવદ્બહિષ્કાર્યઃ સર્વસ્માદ્દ્વિજકર્મણઃ ॥ ૨.૧૦૩॥

અપાં સમીપે નિયતો નૈત્યકં વિધિમાસ્થિતઃ ।
સાવિત્રીમપ્યધીયીત ગત્વાઽરણ્યં સમાહિતઃ ॥ ૨.૧૦૪॥

વેદોપકરણે ચૈવ સ્વાધ્યાયે ચૈવ નૈત્યકે ।
નાનુરોધોઽસ્ત્યનધ્યાયે હોમમન્ત્રેષુ ચૈવ હિ ॥ ૨.૧૦૫॥

નૈત્યકે નાસ્ત્યનધ્યાયો બ્રહ્મસત્રં હિ તત્સ્મૃતમ્ ॥

બ્રહ્માહુતિહુતં પુણ્યમનધ્યાયવષટ્કૃતમ્ ॥ ૨.૧૦૬॥

યઃ સ્વાધ્યાયમધીતેઽબ્દં વિધિના નિયતઃ શુચિઃ ।
તસ્ય નિત્યં ક્ષરત્યેષ પયો દધિ ઘૃતં મધુ ॥ ૨.૧૦૭॥

અગ્નીન્ધનં ભૈક્ષચર્યામધઃશય્યાં ગુરોર્હિતમ્ ।
આ સમાવર્તનાત્કુર્યાત્કૃતોપનયનો દ્વિજઃ ॥ ૨.૧૦૮॥

આચાર્યપુત્રઃ શુશ્રૂષુર્જ્ઞાનદો ધાર્મિકઃ શુચિઃ ।

આપ્તઃ શક્તોઽર્થદઃ સાધુઃ સ્વોઽધ્યાપ્યા દશ ધર્મતઃ ॥ ૨.૧૦૯॥

નાપૃષ્ટઃ કસ્યચિદ્બ્રૂયાન્ન ચાન્યાયેન પૃચ્છતઃ ।
જાનન્નપિ હિ મેધાવી જડવલ્લોક આચરેત્ ॥ ૨.૧૧૦॥

અધર્મેણ ચ યઃ પ્રાહ યશ્ચાધર્મેણ પૃચ્છતિ ।
તયોરન્યતરઃ પ્રૈતિ વિદ્વેષં વાઽધિગચ્છતિ ॥ ૨.૧૧૧॥

ધર્માર્થૌ યત્ર ન સ્યાતાં શુશ્રૂષા વાઽપિ તદ્વિધા ।
તત્ર વિદ્યા ન વપ્તવ્યા શુભં બીજમિવોષરે ॥ ૨.૧૧૨॥

વિદ્યયૈવ સમં કામં મર્તવ્યં બ્રહ્મવાદિના ।
આપદ્યપિ હિ ઘોરાયાં ન ત્વેનામિરિણે વપેત્ ॥ ૨.૧૧૩॥

વિદ્યા બ્રાહ્મણમેત્યાહ શેવધિસ્તેઽસ્મિ રક્ષ મામ્ । શેવધિષ્ટેઽસ્મિ
અસૂયકાય માં માદાસ્તથા સ્યાં વીર્યવત્તમા ॥ ૨.૧૧૪॥

યમેવ તુ શુચિં વિદ્યાન્નિયતબ્રહ્મચારિણમ્ । વિદ્યા નિયતં બ્રહ્મચારિણમ્
તસ્મૈ માં બ્રૂહિ વિપ્રાય નિધિપાયાપ્રમાદિને ॥ ૨.૧૧૫॥

બ્રહ્મ યસ્ત્વનનુજ્ઞાતમધીયાનાદવાપ્નુયાત્ ।
સ બ્રહ્મસ્તેયસંયુક્તો નરકં પ્રતિપદ્યતે ॥ ૨.૧૧૬॥

લૌકિકં વૈદિકં વાઽપિ તથાઽધ્યાત્મિકમેવ વા ।
આદદીત યતો જ્ઞાનં તં પૂર્વમભિવાદયેત્ ॥ ૨.૧૧૭॥

સાવિત્રીમાત્રસારોઽપિ વરં વિપ્રઃ સુયન્ત્રિતઃ ।
નાયન્ત્રિતસ્ત્રિવેદોઽપિ સર્વાશી સર્વવિક્રયી ॥ ૨.૧૧૮॥

શય્યાઽઽસનેઽધ્યાચરિતે શ્રેયસા ન સમાવિશેત્ ।
શય્યાઽઽસનસ્થશ્ચૈવેનં પ્રત્યુત્થાયાભિવાદયેત્ ॥ ૨.૧૧૯॥

ઊર્ધ્વં પ્રાણા હ્યુત્ક્રમન્તિ યૂનઃ સ્થવિર આયતિ ।
પ્રત્યુત્થાનાભિવાદાભ્યાં પુનસ્તાન્ પ્રતિપદ્યતે ॥ ૨.૧૨૦॥

અભિવાદનશીલસ્ય નિત્યં વૃદ્ધોપસેવિનઃ ।
ચત્વારિ તસ્ય વર્ધન્તે આયુર્ધર્મો યશો બલમ્ ॥ ૨.૧૨૧॥ ચત્વારિ સમ્પ્રવર્ધન્તે

અભિવાદાત્પરં વિપ્રો જ્યાયાંસમભિવાદયન્ ।
અસૌ નામાહમસ્મીતિ સ્વં નામ પરિકીર્તયેત્ ॥ ૨.૧૨૨॥

નામધેયસ્ય યે કે ચિદભિવાદં ન જાનતે ।
તાન્ પ્રાજ્ઞોऽહમિતિ બ્રૂયાત્સ્ત્રિયઃ સર્વાસ્તથૈવ ચ ॥ ૨.૧૨૩॥

ભોઃશબ્દં કીર્તયેદન્તે સ્વસ્ય નામ્નોऽભિવાદને ।
નામ્નાં સ્વરૂપભાવો હિ ભોભાવ ઋષિભિઃ સ્મૃતઃ ॥ ૨.૧૨૪॥

આયુષ્માન્ ભવ સૌમ્યેતિ વાચ્યો વિપ્રોऽભિવાદને ।
અકારશ્ચાસ્ય નામ્નોऽન્તે વાચ્યઃ પૂર્વાક્ષરઃ પ્લુતઃ ॥ ૨.૧૨૫॥

યો ન વેત્ત્યભિવાદસ્ય વિપ્રઃ પ્રત્યભિવાદનમ્ ।
નાભિવાદ્યઃ સ વિદુષા યથા શૂદ્રસ્તથૈવ સઃ ॥ ૨.૧૨૬॥

બ્રાહ્મણં કુશલં પૃચ્છેત્ક્ષત્રબન્ધુમનામયમ્ ।
વૈશ્યં ક્ષેમં સમાગમ્ય શૂદ્રમારોગ્યમેવ ચ ॥ ૨.૧૨૭॥

અવાચ્યો દીક્ષિતો નામ્ના યવીયાનપિ યો ભવેત્ ।
ભોભવત્પૂર્વકં ત્વેનમભિભાષેત ધર્મવિત્ ॥ ૨.૧૨૮॥

પરપત્ની તુ યા સ્ત્રી સ્યાદસમ્બન્ધા ચ યોનિતઃ ।
તાં બ્રૂયાદ્ભવતીત્યેવં સુભગે ભગિનીતિ ચ ॥ ૨.૧૨૯॥

માતુલાંશ્ચ પિતૃવ્યાંશ્ચ શ્વશુરાન્ ઋત્વિજો ગુરૂન્ ।
અસાવહમિતિ બ્રૂયાત્પ્રત્યુત્થાય યવીયસઃ ॥ ૨.૧૩૦॥

માતૃષ્વસા માતુલાની શ્વશ્રૂરથ પિતૃષ્વસા ।
સમ્પૂજ્યા ગુરુપત્નીવત્સમાસ્તા ગુરુભાર્યયા ॥ ૨.૧૩૧॥

ભ્રાતુર્ભાર્યોપસઙ્ગ્રાહ્યા સવર્ણાऽહન્યહન્યપિ ।
વિપ્રોષ્ય તૂપસઙ્ગ્રાહ્યા જ્ઞાતિસમ્બન્ધિયોષિતઃ ॥ ૨.૧૩૨॥

પિતુર્ભગિન્યાં માતુશ્ચ જ્યાયસ્યાં ચ સ્વસર્યપિ ।
માતૃવદ્વૃત્તિમાતિષ્ઠેન્ માતા તાભ્યો ગરીયસી ॥ ૨.૧૩૩॥

દશાબ્દાખ્યં પૌરસખ્યં પઞ્ચાબ્દાખ્યં કલાભૃતામ્ ।
ત્ર્યબ્દપૂર્વં શ્રોત્રિયાણાં સ્વલ્પેનાપિ સ્વયોનિષુ ॥ ૨.૧૩૪॥

બ્રાહ્મણં દશવર્ષં તુ શતવર્ષં તુ ભૂમિપમ્ ।
પિતાપુત્રૌ વિજાનીયાદ્બ્રાહ્મણસ્તુ તયોઃ પિતા ॥ ૨.૧૩૫॥

વિત્તં બન્ધુર્વયઃ કર્મ વિદ્યા ભવતિ પઞ્ચમી ।
એતાનિ માન્યસ્થાનાનિ ગરીયો યદ્યદુત્તરમ્ ॥ ૨.૧૩૬॥ માનસ્થાનાનિ

પઞ્ચાનાં ત્રિષુ વર્ણેષુ ભૂયાંસિ ગુણવન્તિ ચ ।
યત્ર સ્યુઃ સોઽત્ર માનાર્હઃ શૂદ્રોઽપિ દશમીં ગતઃ ॥ ૨.૧૩૭॥

ચક્રિણો દશમીસ્થસ્ય રોગિણો ભારિણઃ સ્ત્રિયાઃ ।
સ્નાતકસ્ય ચ રાજ્ઞશ્ચ પન્થા દેયો વરસ્ય ચ ॥ ૨.૧૩૮॥

તેષાં તુ સમવેતાનાં માન્યૌ સ્નાતકપાર્થિવૌ ।
રાજસ્નાતકયોશ્ચૈવ સ્નાતકો નૃપમાનભાક્ ॥ ૨.૧૩૯॥

ઉપનીય તુ યઃ શિષ્યં વેદમધ્યાપયેદ્દ્વિજઃ ।
સકલ્પં સરહસ્યં ચ તમાચાર્યં પ્રચક્ષતે ॥ ૨.૧૪૦॥

એકદેશં તુ વેદસ્ય વેદાઙ્ગાન્યપિ વા પુનઃ ।
યોઽધ્યાપયતિ વૃત્ત્યર્થમુપાધ્યાયઃ સ ઉચ્યતે ॥ ૨.૧૪૧॥

નિષેકાદીનિ કર્માણિ યઃ કરોતિ યથાવિધિ ।
સમ્ભાવયતિ ચાન્નેન સ વિપ્રો ગુરુરુચ્યતે ॥ ૨.૧૪૨॥

અગ્ન્યાધેયં પાકયજ્ઞાનગ્નિષ્ટોમાદિકાન્ મખાન્ ।
યઃ કરોતિ વૃતો યસ્ય સ તસ્યર્ત્વિગિહોચ્યતે ॥ ૨.૧૪૩॥

ય આવૃણોત્યવિતથં બ્રહ્મણા શ્રવણાવુભૌ ।
સ માતા સ પિતા જ્ઞેયસ્તં ન દ્રુહ્યેત્કદા ચન ॥ ૨.૧૪૪॥

ઉપાધ્યાયાન્ દશાચાર્ય આચાર્યાણાં શતં પિતા ।
સહસ્રં તુ પિતૄન્ માતા ગૌરવેણાતિરિચ્યતે ॥ ૨.૧૪૫॥

ઉત્પાદકબ્રહ્મદાત્રોર્ગરીયાન્ બ્રહ્મદઃ પિતા ।
બ્રહ્મજન્મ હિ વિપ્રસ્ય પ્રેત્ય ચેહ ચ શાશ્વતમ્ ॥ ૨.૧૪૬॥

કામાન્ માતા પિતા ચૈનં યદુત્પાદયતો મિથઃ ।
સમ્ભૂતિં તસ્ય તાં વિદ્યાદ્યદ્યોનાવભિજાયતે ॥ ૨.૧૪૭॥

આચાર્યસ્ત્વસ્ય યાં જાતિં વિધિવદ્વેદપારગઃ ।
ઉત્પાદયતિ સાવિત્ર્યા સા સત્યા સાઽજરાઽમરા ॥ ૨.૧૪૮॥

અલ્પં વા બહુ વા યસ્ય શ્રુતસ્યોપકરોતિ યઃ ।
તમપીહ ગુરું વિદ્યાચ્છ્રુતોપક્રિયયા તયા ॥ ૨.૧૪૯॥

બ્રાહ્મસ્ય જન્મનઃ કર્તા સ્વધર્મસ્ય ચ શાસિતા ।

બાલોઽપિ વિપ્રો વૃદ્ધસ્ય પિતા ભવતિ ધર્મતઃ ॥ ૨.૧૫૦॥

અધ્યાપયામાસ પિતૄન્ શિશુરાઙ્ગિરસઃ કવિઃ ।
પુત્રકા ઇતિ હોવાચ જ્ઞાનેન પરિગૃહ્ય તાન્ ॥ ૨.૧૫૧॥

તે તમર્થમપૃચ્છન્ત દેવાનાગતમન્યવઃ ।
દેવાશ્ચૈતાન્ સમેત્યોચુર્ન્યાય્યં વઃ શિશુરુક્તવાન્ ॥ ૨.૧૫૨॥

અજ્ઞો ભવતિ વૈ બાલઃ પિતા ભવતિ મન્ત્રદઃ ।
અજ્ઞં હિ બાલમિત્યાહુઃ પિતેત્યેવ તુ મન્ત્રદમ્ ॥ ૨.૧૫૩॥

ન હાયનૈર્ન પલિતૈર્ન વિત્તેન ન બન્ધુભિઃ ।
ઋષયશ્ચક્રિરે ધર્મં યોઽનૂચાનઃ સ નો મહાન્ ॥ ૨.૧૫૪॥

વિપ્રાણાં જ્ઞાનતો જ્યૈષ્ઠ્યં ક્ષત્રિયાણાં તુ વીર્યતઃ ।
વૈશ્યાનાં ધાન્યધનતઃ શૂદ્રાણામેવ જન્મતઃ ॥ ૨.૧૫૫॥

ન તેન વૃદ્ધો ભવતિ યેનાસ્ય પલિતં શિરઃ ।
યો વૈ યુવાઽપ્યધીયાનસ્તં દેવાઃ સ્થવિરં વિદુઃ ॥ ૨.૧૫૬॥

યથા કાષ્ઠમયો હસ્તી યથા ચર્મમયો મૃગઃ ।
યશ્ચ વિપ્રોઽનધીયાનસ્ત્રયસ્તે નામ બિભ્રતિ ॥ ૨.૧૫૭॥

યથા ષણ્ઢોઽફલઃ સ્ત્રીષુ યથા ગૌર્ગવિ ચાફલા ।
યથા ચાજ્ઞેઽફલં દાનં તથા વિપ્રોઽનૃચોઽફલઃ ॥ ૨.૧૫૮॥

અહિંસયૈવ ભૂતાનાં કાર્યં શ્રેયોઽનુશાસનમ્ ।
વાક્ચૈવ મધુરા શ્લક્ષ્ણા પ્રયોજ્યા ધર્મમિચ્છતા ॥ ૨.૧૫૯॥

યસ્ય વાઙ્મનસી શુદ્ધે સમ્યગ્ગુપ્તે ચ સર્વદા ।
સ વૈ સર્વમવાપ્નોતિ વેદાન્તોપગતં ફલમ્ ॥ ૨.૧૬૦॥

નારુંતુદઃ સ્યાદાર્તોઽપિ ન પરદ્રોહકર્મધીઃ ।
યયાઽસ્યોદ્વિજતે વાચા નાલોક્યાં તામુદીરયેત્ ॥ ૨.૧૬૧॥

સમ્માનાદ્બ્રાહ્મણો નિત્યમુદ્વિજેત વિષાદિવ ।
અમૃતસ્યેવ ચાકાઙ્ક્ષેદવમાનસ્ય સર્વદા ॥ ૨.૧૬૨॥

સુખં હ્યવમતઃ શેતે સુખં ચ પ્રતિબુધ્યતે ॥

સુખં ચરતિ લોકેઽસ્મિન્નવમન્તા વિનશ્યતિ ॥ ૨.૧૬૩॥

અનેન ક્રમયોગેન સંસ્કૃતાત્મા દ્વિજઃ શનૈઃ ।
ગુરૌ વસન્ સઞ્ચિનુયાદ્બ્રહ્માધિગમિકં તપઃ ॥ ૨.૧૬૪॥

તપોવિશેષૈર્વિવિધૈર્વ્રતૈશ્ચ વિધિચોદિતૈઃ ।
વેદઃ કૃત્સ્નોઽધિગન્તવ્યઃ સરહસ્યો દ્વિજન્મના ॥ ૨.૧૬૫॥

વેદમેવ સદાઽભ્યસ્યેત્તપસ્તપ્યન્ દ્વિજોત્તમઃ ।
વેદાભ્યાસો હિ વિપ્રસ્ય તપઃ પરમિહોચ્યતે ॥ ૨.૧૬૬॥

આ હૈવ સ નખાગ્રેભ્યઃ પરમં તપ્યતે તપઃ ।
યઃ સ્રગ્વ્યપિ દ્વિજોઽધીતે સ્વાધ્યાયં શક્તિતોઽન્વહમ્ ॥ ૨.૧૬૭॥

યોઽનધીત્ય દ્વિજો વેદમન્યત્ર કુરુતે શ્રમમ્ ।
સ જીવન્નેવ શૂદ્રત્વમાશુ ગચ્છતિ સાન્વયઃ ॥ ૨.૧૬૮॥

માતુરગ્રેઽધિજનનં દ્વિતીયં મૌઞ્જિબન્ધને ।
તૃતીયં યજ્ઞદીક્ષાયાં દ્વિજસ્ય શ્રુતિચોદનાત્ ॥ ૨.૧૬૯॥

તત્ર યદ્બ્રહ્મજન્માસ્ય મૌઞ્જીબન્ધનચિહ્નિતમ્ ।
તત્રાસ્ય માતા સાવિત્રી પિતા ત્વાચાર્ય ઉચ્યતે ॥ ૨.૧૭૦॥

વેદપ્રદાનાદાચાર્યં પિતરં પરિચક્ષતે ।
ન હ્યસ્મિન્ યુજ્યતે કર્મ કિઞ્ચિદા મૌઞ્જિબન્ધનાત્ ॥ ૨.૧૭૧॥

નાભિવ્યાહારયેદ્બ્રહ્મ સ્વધાનિનયનાદૃતે ।
શૂદ્રેણ હિ સમસ્તાવદ્યાવદ્વેદે ન જાયતે ॥ ૨.૧૭૨॥

કૃતોપનયનસ્યાસ્ય વ્રતાદેશનમિષ્યતે ।
બ્રહ્મણો ગ્રહણં ચૈવ ક્રમેણ વિધિપૂર્વકમ્ ॥ ૨.૧૭૩॥

યદ્યસ્ય વિહિતં ચર્મ યત્સૂત્રં યા ચ મેખલા ।
યો દણ્ડો યત્ચ વસનં તત્તદસ્ય વ્રતેષ્વપિ ॥ ૨.૧૭૪॥

સેવેતેમાંસ્તુ નિયમાન્ બ્રહ્મચારી ગુરૌ વસન્ ।
સન્નિયમ્યેન્દ્રિયગ્રામં તપોવૃદ્ધ્યર્થમાત્મનઃ ॥ ૨.૧૭૫॥

નિત્યં સ્નાત્વા શુચિઃ કુર્યાદ્દેવર્ષિપિતૃતર્પણમ્ ।
દેવતાભ્યર્ચનં ચૈવ સમિદાધાનમેવ ચ ॥ ૨.૧૭૬॥

વર્જયેન્ મધુ માંસં ચ ગન્ધં માલ્યં રસાન્ સ્ત્રિયઃ ।
શુક્તાનિ યાનિ સર્વાણિ પ્રાણિનાં ચૈવ હિંસનમ્ ॥ ૨.૧૭૭॥

અભ્યઙ્ગમઞ્જનં ચાક્ષ્ણોરુપાનચ્છત્રધારણમ્ ।
કામં ક્રોધં ચ લોભં ચ નર્તનં ગીતવાદનમ્ ॥ ૨.૧૭૮॥

દ્યૂતં ચ જનવાદં ચ પરિવાદં તથાઽનૃતમ્ ।
સ્ત્રીણાં ચ પ્રેક્ષણાલમ્ભમુપઘાતં પરસ્ય ચ ॥ ૨.૧૭૯॥ આલમ્ભાઽવઘાતં

એકઃ શયીત સર્વત્ર ન રેતઃ સ્કન્દયેત્ક્વ ચિત્ ।
કામાધિ સ્કન્દયન્ રેતો હિનસ્તિ વ્રતમાત્મનઃ ॥ ૨.૧૮૦॥

સ્વપ્ને સિક્ત્વા બ્રહ્મચારી દ્વિજઃ શુક્રમકામતઃ ।
સ્નાત્વાઽર્કમર્ચયિત્વા ત્રિઃ પુનર્મામિત્યૃચં જપેત્ ॥ ૨.૧૮૧॥

ઉદકુમ્ભં સુમનસો ગોશકૃત્મૃત્તિકાકુશાન્ ।
આહરેદ્યાવદર્થાનિ ભૈક્ષં ચાહરહશ્ચરેત્ ॥ ૨.૧૮૨॥

વેદયજ્ઞૈરહીનાનાં પ્રશસ્તાનાં સ્વકર્મસુ ।
બ્રહ્મચાર્યાહરેદ્ભૈક્ષં ગૃહેભ્યઃ પ્રયતોઽન્વહમ્ ॥ ૨.૧૮૩॥

ગુરોઃ કુલે ન ભિક્ષેત ન જ્ઞાતિકુલબન્ધુષુ ।
અલાભે ત્વન્યગેહાનાં પૂર્વં પૂર્વં વિવર્જયેત્ ॥ ૨.૧૮૪॥

સર્વં વાપિ ચરેદ્ગ્રામં પૂર્વોક્તાનામસમ્ભવે ।
નિયમ્ય પ્રયતો વાચમભિશસ્તાંસ્તુ વર્જયેત્ ॥ ૨.૧૮૫॥

દૂરાદાહૃત્ય સમિધઃ સન્નિદધ્યાદ્વિહાયસિ ।
સાયં।પ્રાતશ્ચ જુહુયાત્તાભિરગ્નિમતન્દ્રિતઃ ॥ ૨.૧૮૬॥

અકૃત્વા ભૈક્ષચરણમસમિધ્ય ચ પાવકમ્ ।
અનાતુરઃ સપ્તરાત્રમવકીર્ણિવ્રતં ચરેત્ ॥ ૨.૧૮૭॥

ભૈક્ષેણ વર્તયેન્નિત્યં નૈકાન્નાદી ભવેદ્વ્રતી ।
ભૈક્ષેણ વ્રતિનો વૃત્તિરુપવાસસમા સ્મૃતા ॥ ૨.૧૮૮॥

વ્રતવદ્દેવદૈવત્યે પિત્ર્યે કર્મણ્યથર્ષિવત્ ।
કામમભ્યર્થિતોઽશ્નીયાદ્વ્રતમસ્ય ન લુપ્યતે ॥ ૨.૧૮૯॥

બ્રાહ્મણસ્યૈવ કર્મૈતદુપદિષ્ટં મનીષિભિઃ ।
રાજન્યવૈશ્યયોસ્ત્વેવં નૈતત્કર્મ વિધીયતે ॥ ૨.૧૯૦॥

ચોદિતો ગુરુણા નિત્યમપ્રચોદિત એવ વા ।

કુર્યાદધ્યયને યત્નમાચાર્યસ્ય હિતેષુ ચ ॥ ૨.૧૯૧॥ અધ્યયને યોગમ્

શરીરં ચૈવ વાચં ચ બુદ્ધીન્દ્રિયમનાંસિ ચ ।
નિયમ્ય પ્રાઞ્જલિસ્તિષ્ઠેદ્વીક્ષમાણો ગુરોર્મુખમ્ ॥ ૨.૧૯૨॥

નિત્યમુદ્ધૃતપાણિઃ સ્યાત્સાધ્વાચારઃ સુસંવૃતઃ ।
આસ્યતામિતિ ચૌક્તઃ સન્નાસીતાભિમુખં ગુરોઃ ॥ ૨.૧૯૩॥

હીનાન્નવસ્ત્રવેષઃ સ્યાત્સર્વદા ગુરુસન્નિધૌ ।
ઉત્તિષ્ઠેત્પ્રથમં ચાસ્ય ચરમં ચૈવ સંવિશેત્ ॥ ૨.૧૯૪॥

પ્રતિશ્રાવણસમ્ભાષે શયાનો ન સમાચરેત્ ।
નાસીનો ન ચ ભુઞ્જાનો ન તિષ્ઠન્ન પરાઙ્મુખઃ ॥ ૨.૧૯૫॥

આસીનસ્ય સ્થિતઃ કુર્યાદભિગચ્છંસ્તુ તિષ્ઠતઃ ।
પ્રત્યુદ્ગમ્ય ત્વાવ્રજતઃ પશ્ચાદ્ધાવંસ્તુ ધાવતઃ ॥ ૨.૧૯૬॥

પરાઙ્મુખસ્યાભિમુખો દૂરસ્થસ્યેત્ય ચાન્તિકમ્ ।
પ્રણમ્ય તુ શયાનસ્ય નિદેશે ચૈવ તિષ્ઠતઃ ॥ ૨.૧૯૭॥

નીચં શય્યાઽઽસનં ચાસ્ય નિત્યં સ્યાદ્ગુરુસન્નિધૌ ।
ગુરોસ્તુ ચક્ષુર્વિષયે ન યથેષ્ટાસનો ભવેત્ ॥ ૨.૧૯૮॥

નૌદાહરેદસ્ય નામ પરોક્ષમપિ કેવલમ્ ।
ન ચૈવાસ્યાનુકુર્વીત ગતિભાષિતચેષ્ટિતમ્ ॥ ૨.૧૯૯॥

ગુરોર્યત્ર પરિવાદો નિન્દા વાઽપિ પ્રવર્તતે ।
કર્ણૌ તત્ર પિધાતવ્યૌ ગન્તવ્યં વા તતોઽન્યતઃ ॥ ૨.૨૦૦॥

પરીવાદાત્ખરો ભવતિ શ્વા વૈ ભવતિ નિન્દકઃ ।
પરિભોક્તા કૃમિર્ભવતિ કીટો ભવતિ મત્સરી ॥ ૨.૨૦૧॥

દૂરસ્થો નાર્ચયેદેનં ન ક્રુદ્ધો નાન્તિકે સ્ત્રિયાઃ ।
યાનાસનસ્થશ્ચૈવૈનમવરુહ્યાભિવાદયેત્ ॥ ૨.૨૦૨॥

પ્રતિવાતેઽનુવાતે ચ નાસીત ગુરુણા સહ । પ્રતિવાતાનુવાતે
અસંશ્રવે ચૈવ ગુરોર્ન કિં ચિદપિ કીર્તયેત્ ॥ ૨.૨૦૩॥

ગોઽશ્વોષ્ટ્રયાનપ્રાસાદપ્રસ્તરેષુ કટેષુ ચ ।
આસીત ગુરુણા સાર્ધં શિલાફલકનૌષુ ચ ॥ ૨.૨૦૪॥

ગુરોર્ગુરૌ સન્નિહિતે ગુરુવદ્વૃત્તિમાચરેત્ ।
ન ચાનિસૃષ્ટો ગુરુણા સ્વાન્ ગુરૂનભિવાદયેત્ ॥ ૨.૨૦૫॥

વિદ્યાગુરુષ્વેવમેવ નિત્યા વૃત્તિઃ સ્વયોનિષુ ।
પ્રતિષેધત્સુ ચાધર્માધિતં ચોપદિશત્સ્વપિ ॥ ૨.૨૦૬॥

શ્રેયઃસુ ગુરુવદ્વૃત્તિં નિત્યમેવ સમાચરેત્ ।
ગુરુપુત્રેષુ ચાર્યેષુ ગુરોશ્ચૈવ સ્વબન્ધુષુ ॥ ૨.૨૦૭॥ ગુરુપુત્રે તથાચાર્યે

બાલઃ સમાનજન્મા વા શિષ્યો વા યજ્ઞકર્મણિ ।
અધ્યાપયન્ ગુરુસુતો ગુરુવત્માનમર્હતિ ॥ ૨.૨૦૮॥

ઉત્સાદનં ચ ગાત્રાણાં સ્નાપનૌચ્છિષ્ટભોજને ।
ન કુર્યાદ્ગુરુપુત્રસ્ય પાદયોશ્ચાવનેજનમ્ ॥ ૨.૨૦૯॥

ગુરુવત્પ્રતિપૂજ્યાઃ સ્યુઃ સવર્ણા ગુરુયોષિતઃ ।
અસવર્ણાસ્તુ સમ્પૂજ્યાઃ પ્રત્યુત્થાનાભિવાદનૈઃ ॥ ૨.૨૧૦॥

અભ્યઞ્જનં સ્નાપનં ચ ગાત્રોત્સાદનમેવ ચ ।
ગુરુપત્ન્યા ન કાર્યાણિ કેશાનાં ચ પ્રસાધનમ્ ॥ ૨.૨૧૧॥

ગુરુપત્ની તુ યુવતિર્નાભિવાદ્યેહ પાદયોઃ ।
પૂર્ણવિંશતિવર્ષેણ ગુણદોષૌ વિજાનતા ॥ ૨.૨૧૨॥

સ્વભાવ એષ નારીણાં નરાણામિહ દૂષણમ્ ।
અતોઽર્થાન્ન પ્રમાદ્યન્તિ પ્રમદાસુ વિપશ્ચિતઃ ॥ ૨.૨૧૩॥

અવિદ્વાંસમલં લોકે વિદ્વાંસમપિ વા પુનઃ ।
પ્રમદા હ્યુત્પથં નેતું કામક્રોધવશાનુગમ્ ॥ ૨.૨૧૪॥

માત્રા સ્વસ્રા દુહિત્રા વા ન વિવિક્તાસનો ભવેત્ ।
બલવાનિન્દ્રિયગ્રામો વિદ્વાંસમપિ કર્ષતિ ॥ ૨.૨૧૫॥

કામં તુ ગુરુપત્નીનાં યુવતીનાં યુવા ભુવિ ।
વિધિવદ્વન્દનં કુર્યાદસાવહમિતિ બ્રુવન્ ॥ ૨.૨૧૬॥

વિપ્રોષ્ય પાદગ્રહણમન્વહં ચાભિવાદનમ્ ।
ગુરુદારેષુ કુર્વીત સતાં ધર્મમનુસ્મરન્ ॥ ૨.૨૧૭॥

યથા ખનન્ ખનિત્રેણ નરો વાર્યધિગચ્છતિ ।
તથા ગુરુગતાં વિદ્યાં શુશ્રૂષુરધિગચ્છતિ ॥ ૨.૨૧૮॥

મુણ્ડો વા જટિલો વા સ્યાદથ વા સ્યાત્શિખાજટઃ ।
નૈનં ગ્રામેઽભિનિમ્લોચેત્સૂર્યો નાભ્યુદિયાત્ક્વ ચિત્ ॥ ૨.૨૧૯॥

તં ચેદભ્યુદિયાત્સૂર્યઃ શયાનં કામચારતઃ ।
નિમ્લોચેદ્વાઽપ્યવિજ્ઞાનાજ્જપન્નુપવસેદ્દિનમ્ ॥ ૨.૨૨૦॥

સૂર્યેણ હ્યભિનિર્મુક્તઃ શયાનોઽભ્યુદિતશ્ચ યઃ । અભિનિમ્લુક્તઃ
પ્રાયશ્ચિત્તમકુર્વાણો યુક્તઃ સ્યાન્ મહતેનસા ॥ ૨.૨૨૧॥

આચમ્ય પ્રયતો નિત્યમુભે સંધ્યે સમાહિતઃ ।
શુચૌ દેશે જપઞ્જપ્યમુપાસીત યથાવિધિ ॥ ૨.૨૨૨॥

યદિ સ્ત્રી યદ્યવરજઃ શ્રેયઃ કિં ચિત્સમાચરેત્ ।
તત્સર્વમાચરેદ્યુક્તો યત્ર ચાસ્ય રમેન્ મનઃ ॥ ૨.૨૨૩॥

ધર્માર્થાવુચ્યતે શ્રેયઃ કામાર્થૌ ધર્મ એવ ચ ।
અર્થ એવેહ વા શ્રેયસ્ત્રિવર્ગ ઇતિ તુ સ્થિતિઃ ॥ ૨.૨૨૪॥

આચાર્યશ્ચ પિતા ચૈવ માતા ભ્રાતા ચ પૂર્વજઃ ।
નાર્તેનાપ્યવમન્તવ્યા બ્રાહ્મણેન વિશેષતઃ ॥ ૨.૨૨૫॥

આચાર્યો બ્રહ્મણો મૂર્તિઃ પિતા મૂર્તિઃ પ્રજાપતેઃ ।
માતા પૃથિવ્યા મૂર્તિસ્તુ ભ્રાતા સ્વો મૂર્તિરાત્મનઃ ॥ ૨.૨૨૬॥

યં માતાપિતરૌ ક્લેશં સહેતે સમ્ભવે નૃણામ્ ।
ન તસ્ય નિષ્કૃતિઃ શક્યા કર્તું વર્ષશતૈરપિ ॥ ૨.૨૨૭॥

તયોર્નિત્યં પ્રિયં કુર્યાદાચાર્યસ્ય ચ સર્વદા ।
તેષ્વેવ ત્રિષુ તુષ્ટેષુ તપઃ સર્વં સમાપ્યતે ॥ ૨.૨૨૮॥

તેષાં ત્રયાણાં શુશ્રૂષા પરમં તપ ઉચ્યતે ।
ન તૈરનભ્યનુજ્ઞાતો ધર્મમન્યં સમાચરેત્ ॥ ૨.૨૨૯॥

ત એવ હિ ત્રયો લોકાસ્ત એવ ત્રય આશ્રમાઃ ।
ત એવ હિ ત્રયો વેદાસ્ત એવોક્તાસ્ત્રયોઽગ્નયઃ ॥ ૨.૨૩૦॥

પિતા વૈ ગાર્હપત્યોઽગ્નિર્માતાઽગ્નિર્દક્ષિણઃ સ્મૃતઃ ।
ગુરુરાહવનીયસ્તુ સાઽગ્નિત્રેતા ગરીયસી ॥ ૨.૨૩૧॥

ત્રિષ્વપ્રમાદ્યન્નેતેષુ ત્રીન્ લોકાન્ વિજયેદ્ગૃહી ।

દીપ્યમાનઃ સ્વવપુષા દેવવદ્દિવિ મોદતે ॥ ૨.૨૩૨॥

ઇમં લોકં માતૃભક્ત્યા પિતૃભક્ત્યા તુ મધ્યમમ્ ।
ગુરુશુશ્રૂષયા ત્વેવં બ્રહ્મલોકં સમશ્નુતે ॥ ૨.૨૩૩॥

સર્વે તસ્યાદૃતા ધર્મા યસ્યૈતે ત્રય આદૃતાઃ ।
અનાદૃતાસ્તુ યસ્યૈતે સર્વાસ્તસ્યાફલાઃ ક્રિયાઃ ॥ ૨.૨૩૪॥

યાવત્ત્રયસ્તે જીવેયુસ્તાવન્નાન્યં સમાચરેત્ ।
તેષ્વેવ નિત્યં શુશ્રૂષાં કુર્યાત્પ્રિયહિતે રતઃ ॥ ૨.૨૩૫॥

તેષામનુપરોધેન પારત્ર્યં યદ્યદાચરેત્ ।
તત્તન્નિવેદયેત્તેભ્યો મનોવચનકર્મભિઃ ॥ ૨.૨૩૬॥

ત્રિષ્વેતેષ્વિતિકૃત્યં હિ પુરુષસ્ય સમાપ્યતે ।
એષ ધર્મઃ પરઃ સાક્ષાદુપધર્મોઽન્ય ઉચ્યતે ॥ ૨.૨૩૭॥

શ્રદ્દધાનઃ શુભાં વિદ્યામાદદીતાવરાદપિ ।
અન્ત્યાદપિ પરં ધર્મં સ્ત્રીરત્નં દુષ્કુલાદપિ ॥ ૨.૨૩૮॥

વિષાદપ્યમૃતં ગ્રાહ્યં બાલાદપિ સુભાષિતમ્ ।
અમિત્રાદપિ સદ્વૃત્તમમેધ્યાદપિ કાઞ્ચનમ્ ॥ ૨.૨૩૯॥

સ્ત્રિયો રત્નાન્યથો વિદ્યા ધર્મઃ શૌચં સુભાષિતમ્ ।
વિવિધાનિ ચ શિલ્પાનિ સમાદેયાનિ સર્વતઃ ॥ ૨.૨૪૦॥

અબ્રાહ્મણાદધ્યાયનમાપત્કાલે વિધીયતે ।
અનુવ્રજ્યા ચ શુશ્રૂષા યાવદધ્યાયનં ગુરોઃ ॥ ૨.૨૪૧॥

નાબ્રાહ્મણે ગુરૌ શિષ્યો વાસમાત્યન્તિકં વસેત્ ।
બ્રાહ્મણે વાઽનનૂચાને કાઙ્ક્ષન્ ગતિમનુત્તમામ્ ॥ ૨.૨૪૨॥

યદિ ત્વાત્યન્તિકં વાસં રોચયેત ગુરોઃ કુલે ।
યુક્તઃ પરિચરેદેનમા શરીરવિમોક્ષણાત્ ॥ ૨.૨૪૩॥

આ સમાપ્તેઃ શરીરસ્ય યસ્તુ શુશ્રૂષતે ગુરુમ્ ।
સ ગચ્છત્યઞ્જસા વિપ્રો બ્રહ્મણઃ સદ્મ શાશ્વતમ્ ॥ ૨.૨૪૪॥

ન પૂર્વં ગુરવે કિં ચિદુપકુર્વીત ધર્મવિત્ ।
સ્નાસ્યંસ્તુ ગુરુણાઽઽજ્ઞપ્તઃ શક્ત્યા ગુર્વર્થમાહરેત્ ॥ ૨.૨૪૫॥

ક્ષેત્રં હિરણ્યં ગામશ્વં છત્રૌપાનહમાસનમ્ । છત્રોપાનહમન્તતઃ
ધાન્યં શાકં ચ વાસાંસિ ગુરવે પ્રીતિમાવહેત્ ॥ ૨.૨૪૬॥ ધાન્યં વાસાંસિ શાકં વા ગુરવે પ્રીતિમાહરન્)

આચાર્યે તુ ખલુ પ્રેતે ગુરુપુત્રે ગુણાન્વિતે ।
ગુરુદારે સપિણ્ડે વા ગુરુવદ્વૃત્તિમાચરેત્ ॥ ૨.૨૪૭॥

એતેષ્વવિદ્યમાનેષુ સ્થાનાસનવિહારવાન્ ।
પ્રયુઞ્જાનોઽગ્નિશુશ્રૂષાં સાધયેદ્દેહમાત્મનઃ ॥ ૨.૨૪૮॥

એવં ચરતિ યો વિપ્રો બ્રહ્મચર્યમવિપ્લુતઃ ।
સ ગચ્છત્યુત્તમસ્થાનં ન ચેહ જાયતે પુનઃ ॥ ૨.૨૪૯॥

## અધ્યાય 3

ષટ્ત્રિંશદાબ્દિકં ચર્યં ગુરૌ ત્રૈવેદિકં વ્રતમ્ ।
તદર્ધિકં પાદિકં વા ગ્રહણાન્તિકમેવ વા ॥ ૩.૧॥

વેદાનધીત્ય વેદૌ વા વેદં વાઽપિ યથાક્રમમ્ ।
અવિપ્લુતબ્રહ્મચર્યો ગૃહસ્થાશ્રમમાવસેત્ ॥ ૩.૨॥

તં પ્રતીતં સ્વધર્મેણ બ્રહ્મદાયહરં પિતુઃ ।
સ્રગ્વિણં તલ્પ આસીનમર્હયેત્પ્રથમં ગવા ॥ ૩.૩॥

ગુરુણાનુમતઃ સ્નાત્વા સમાવૃત્તો યથાવિધિ ।
ઉદ્વહેત દ્વિજો ભાર્યાં સવર્ણાં લક્ષણાન્વિતામ્ ॥ ૩.૪॥

અસપિણ્ડા ચ યા માતુરસગોત્રા ચ યા પિતુઃ ।
સા પ્રશસ્તા દ્વિજાતીનાં દારકર્મણિ મૈથુને ॥ ૩.૫॥ અમૈથિની

મહાન્ત્યપિ સમૃદ્ધાનિ ગોઽજાવિધનધાન્યતઃ ।
સ્ત્રીસમ્બન્ધે દશૈતાનિ કુલાનિ પરિવર્જયેત્ ॥ ૩.૬॥

હીનક્રિયં નિશ્પુરુષં નિશ્છન્દો રોમશાર્શસમ્ ।
ક્ષય્યામયાવ્ય્ઽપસ્મારિશ્વિત્રિકુષ્ઠિકુલાનિ ચ ॥ ૩.૭॥

નોદ્વહેત્કપિલાં કન્યાં નાધિકાઙ્ગીં ન રોગિણીમ્ ।
નાલોમિકાં નાતિલોમાં ન વાચાટાં ન પિઙ્ગલામ્ ॥ ૩.૮॥ વાચાલાં

નર્ક્ષવૃક્ષનદીનામ્નીં નાન્ત્યપર્વતનામિકામ્ ।
ન પક્ષ્યહિપ્રેષ્યનામ્નીં ન ચ ભીષણનામિકામ્ ॥ ૩.૯॥

અવ્યઙ્ગાઙ્ગીં સૌમ્યનામ્નીં હંસવારણગામિનીમ્ ।
તનુલોમકેશદશનાં મૃદ્વઙ્ગીમુદ્વહેત્સ્ત્રિયમ્ ॥ ૩.૧૦॥

યસ્યાસ્તુ ન ભવેદ્ભ્રાતા ન વિજ્ઞાયેત વા પિતા । વૈ(વા પિતા
નૌપયચ્છેત તાં પ્રાજ્ઞઃ પુત્રિકાઽધર્મશઙ્કયા ॥ ૩.૧૧॥

સવર્ણાઽગ્રે દ્વિજાતીનાં પ્રશસ્તા દારકર્મણિ ।
કામતસ્તુ પ્રવૃત્તાનામિમાઃ સ્યુઃ ક્રમશોઽવરાઃ ॥ ૩.૧૨॥

શૂદ્રૈવ ભાર્યા શૂદ્રસ્ય સા ચ સ્વા ચ વિશઃ સ્મૃતે ।
તે ચ સ્વા ચૈવ રાજ્ઞશ્ચ તાશ્ચ સ્વા ચાગ્રજન્મનઃ ॥ ૩.૧૩॥

ન બ્રાહ્મણક્ષત્રિયયોરાપદ્યપિ હિ તિષ્ઠતોઃ ।
કસ્મિંશ્ચિદપિ વૃત્તાન્તે શૂદ્રા ભાર્યોપદિશ્યતે ॥ ૩.૧૪॥

હીનજાતિસ્ત્રિયં મોહાદુદ્વહન્તો દ્વિજાતયઃ ।
કુલાન્યેવ નયન્ત્યાશુ સસન્તાનાનિ શૂદ્રતામ્ ॥ ૩.૧૫॥

શૂદ્રાવેદી પતત્યત્રેરુતથ્યતનયસ્ય ચ ।
શૌનકસ્ય સુતોત્પત્ત્યા તદપત્યતયા ભૃગોઃ ॥ ૩.૧૬॥

શૂદ્રાં શયનમારોપ્ય બ્રાહ્મણો યાત્યધોગતિમ્ ।
જનયિત્વા સુતં તસ્યાં બ્રાહ્મણ્યાદેવ હીયતે ॥ ૩.૧૭॥

દૈવપિત્ર્યાતિથેયાનિ તત્પ્રધાનાનિ યસ્ય તુ ।
નાશ્નન્તિ પિતૃદેવાસ્તન્ન ચ સ્વર્ગં સ ગચ્છતિ ॥ ૩.૧૮॥

વૃષલીફેનપીતસ્ય નિઃશ્વાસોપહતસ્ય ચ ।
તસ્યાં ચૈવ પ્રસૂતસ્ય નિષ્કૃતિર્ન વિધીયતે ॥ ૩.૧૯॥

ચતુર્ણામપિ વર્ણાનં પ્રેત્ય ચૈહ હિતાહિતાન્ ।
અષ્ટાવિમાન્ સમાસેન સ્ત્રીવિવાહાન્નિબોધત ॥ ૩.૨૦॥

બ્રાહ્મો દૈવસ્તથૈવાર્ષઃ પ્રાજાપત્યસ્તથાઽસુરઃ ।
ગાન્ધર્વો રાક્ષસશ્ચૈવ પૈશાચશ્ચાષ્ટમોઽધમઃ ॥ ૩.૨૧॥

યો યસ્ય ધર્મ્યો વર્ણસ્ય ગુણદોષૌ ચ યસ્ય યૌ ।
તદ્વઃ સર્વં પ્રવક્ષ્યામિ પ્રસવે ચ ગુણાગુણાન્ ॥ ૩.૨૨॥

ષડાનુપૂર્વ્યા વિપ્રસ્ય ક્ષત્રસ્ય ચતુરોઽવરાન્ ।

વિશ્।શૂદ્રયોસ્તુ તાનેવ વિદ્યાદ્ધર્મ્યાનરાક્ષસાન્ ॥ ૩.૨૩॥ ધર્મ્યાન્ન રાક્ષસાન્

ચતુરો બ્રાહ્મણસ્યાદ્યાન્ પ્રશસ્તાન્ કવયો વિદુઃ ।
રાક્ષસં ક્ષત્રિયસ્યૈકમાસુરં વૈશ્યશૂદ્રયોઃ ॥ ૩.૨૪॥

પઞ્ચાનાં તુ ત્રયો ધર્મ્યા દ્વાવધર્મ્યૌ સ્મૃતાવિહ ।
પૈશાચશ્ચાસુરશ્ચૈવ ન કર્તવ્યૌ કદા ચન ॥ ૩.૨૫॥

પૃથક્પૃથગ્વા મિશ્રૌ વા વિવાહૌ પૂર્વચોદિતૌ ।
ગાન્ધર્વો રાક્ષસશ્ચૈવ ધર્મ્યૌ ક્ષત્રસ્ય તૌ સ્મૃતૌ ॥ ૩.૨૬॥

આચ્છાદ્ય ચાર્ચયિત્વા ચ શ્રુતશીલવતે સ્વયમ્ ।
આહૂય દાનં કન્યાયા બ્રાહ્મો ધર્મઃ પ્રકીર્તિતઃ ॥ ૩.૨૭॥

યજ્ઞે તુ વિતતે સમ્યગૃત્વિજે કર્મ કુર્વતે ।
અલઙ્કૃત્ય સુતાદાનં દૈવં ધર્મં પ્રચક્ષતે ॥ ૩.૨૮॥

એકં ગોમિથુનં દ્વે વા વરાદાદાય ધર્મતઃ ।
કન્યાપ્રદાનં વિધિવદાર્ષો ધર્મઃ સ ઉચ્યતે ॥ ૩.૨૯॥

સહોભૌ ચરતાં ધર્મમિતિ વાચાઽનુભાષ્ય ચ ।
કન્યાપ્રદાનમભ્યર્ચ્ય પ્રાજાપત્યો વિધિઃ સ્મૃતઃ ॥ ૩.૩૦॥

જ્ઞાતિભ્યો દ્રવિણં દત્ત્વા કન્યાયૈ ચૈવ શક્તિતઃ ।
કન્યાપ્રદાનં સ્વાચ્છન્દ્યાદાસુરો ધર્મ ઉચ્યતે ॥ ૩.૩૧॥

ઇચ્છયાઽન્યોન્યસંયોગઃ કન્યાયાશ્ચ વરસ્ય ચ ।
ગાન્ધર્વઃ સ તુ વિજ્ઞેયો મૈથુન્યઃ કામસમ્ભવઃ ॥ ૩.૩૨॥

હત્વા છિત્ત્વા ચ ભિત્ત્વા ચ ક્રોશન્તીં રુદતીં ગૃહાત્ ।
પ્રસહ્ય કન્યાહરણં રાક્ષસો વિધિરુચ્યતે ॥ ૩.૩૩॥

સુપ્તાં મત્તાં પ્રમત્તાં વા રહો યત્રોપગચ્છતિ ।
સ પાપિષ્ઠો વિવાહાનાં પૈશાચશ્ચાષ્ટમોઽધમઃ ॥ ૩.૩૪॥ પૈશાચઃ પ્રથિતોઽધમઃ

અદ્ભિરેવ દ્વિજાગ્ર્યાણાં કન્યાદાનં વિશિષ્યતે ।
ઇતરેષાં તુ વર્ણાનામિતરેતરકામ્યયા ॥ ૩.૩૫॥

યો યસ્યૈષાં વિવાહાનાં મનુના કીર્તિતો ગુણઃ ।
સર્વં શ ૃણુત તં વિપ્રાઃ સર્વં કીર્તયતો મમ ॥ ૩.૩૬॥ સમ્યક્કીર્તયતો

દશ પૂર્વાન્ પરાન્ વંશ્યાનાત્માનં ચૈકવિંશકમ્ ।
બ્રાહ્મીપુત્રઃ સુકૃતકૃત્મોચયત્યેનસઃ પિતૄન્ ॥ ૩.૩૭॥

દૈવોઢાજઃ સુતશ્ચૈવ સપ્ત સપ્ત પરાવરાન્ ।
આર્ષોઢાજઃ સુતસ્ત્રીંસ્ત્રીન્ ષટ્ષટ્કાયોઢજઃ સુતઃ ॥ ૩.૩૮॥

બ્રાહ્માદિષુ વિવાહેષુ ચતુર્ષ્વેવાનુપૂર્વશઃ ।
બ્રહ્મવર્ચસ્વિનઃ પુત્રા જાયન્તે શિષ્ટસમ્મતાઃ ॥ ૩.૩૯॥ બ્રહ્મવર્ચસિનઃ

રૂપસત્ત્વગુણોપેતા ધનવન્તો યશસ્વિનઃ ।
પર્યાપ્તભોગા ધર્મિષ્ઠા જીવન્તિ ચ શતં સમાઃ ॥ ૩.૪૦॥

ઇતરેષુ તુ શિષ્ટેષુ નૃશંસાઽનૃતવાદિનઃ ।
જાયન્તે દુર્વિવાહેષુ બ્રહ્મધર્મદ્વિષઃ સુતાઃ ॥ ૩.૪૧॥

અનિન્દિતૈઃ સ્ત્રીવિવાહૈરનિન્દ્યા ભવતિ પ્રજા ।
નિન્દિતૈર્નિન્દિતા નૃણાં તસ્માન્નિન્દ્યાન્ વિવર્જયેત્ ॥ ૩.૪૨॥

પાણિગ્રહણસંસ્કારઃ સવર્ણાસૂપદિશ્યતે ।
અસવર્ણાસ્વયં જ્ઞેયો વિધિરુદ્વાહકર્મણિ ॥ ૩.૪૩॥

શરઃ ક્ષત્રિયયા ગ્રાહ્યઃ પ્રતોદો વૈશ્યકન્યયા ।
વસનસ્ય દશા ગ્રાહ્યા શૂદ્રયોત્કૃષ્ટવેદને ॥ ૩.૪૪॥

ઋતુકાલાભિગામી સ્યાત્સ્વદારનિરતઃ સદા ।
પર્વવર્જં વ્રજેચ્ચૈનાં તદ્વ્રતો રતિકામ્યયા ॥ ૩.૪૫॥

ઋતુઃ સ્વાભાવિકઃ સ્ત્રીણાં રાત્રયઃ ષોડશ સ્મૃતાઃ ।
ચતુર્ભિરિતરૈઃ સાર્ધમહોભિઃ સદ્વિગર્હિતૈઃ ॥ ૩.૪૬॥

તાસામાદ્યાશ્ચતસ્રસ્તુ નિન્દિતૈકાદશી ચ યા ।
ત્રયોદશી ચ શેષાસ્તુ પ્રશસ્તા દશરાત્રયઃ ॥ ૩.૪૭॥

યુગ્માસુ પુત્રા જાયન્તે સ્ત્રિયોઽયુગ્માસુ રાત્રિષુ ।
તસ્માદ્યુગ્માસુ પુત્રાર્થી સંવિશેદાર્તવે સ્ત્રિયમ્ ॥ ૩.૪૮॥

પુમાન્ પુંસોઽધિકે શુક્રે સ્ત્રી ભવત્યધિકે સ્ત્રિયાઃ ।
સમેઽપુમાન્ પું। સ્ત્રિયૌ વા ક્ષીણેઽલ્પે ચ વિપર્યયઃ ॥ ૩.૪૯॥

નિન્દ્યાસ્વષ્ટાસુ ચાન્યાસુ સ્ત્રિયો રાત્રિષુ વર્જયન્ ।
બ્રહ્મચાર્યેવ ભવતિ યત્ર તત્રાશ્રમે વસન્ ॥ ૩.૫૦॥

ન કન્યાયાઃ પિતા વિદ્વાન્ ગૃહ્ણીયાત્શુલ્કમણ્વપિ ।
ગૃહ્ણંશ્છુલ્કં હિ લોભેન સ્યાન્નરોઽપત્યવિક્રયી ॥ ૩.૫૧॥

સ્ત્રીધનાનિ તુ યે મોહાદુપજીવન્તિ બાન્ધવાઃ ।
નારીયાનાનિ વસ્ત્રં વા તે પાપા યાન્ત્યધોગતિમ્ ॥ ૩.૫૨॥

આર્ષે ગોમિથુનં શુલ્કં કે ચિદાહુર્મૃષૈવ તત્ ।
અલ્પોઽપ્યેવં મહાન્ વાઽપિ વિક્રયસ્તાવદેવ સઃ ॥ ૩.૫૩॥ તાવાનેવ સ વિક્રયઃ

યાસાં નાદદતે શુલ્કં જ્ઞાતયો ન સ વિક્રયઃ ।
અર્હણં તત્કુમારીણામાનૃશંસ્યં ચ કેવલમ્ ॥ ૩.૫૪॥ ન કેવલમ્

પિતૃભિર્ભ્રાતૃભિશ્ચૈતાઃ પતિભિર્દેવરૈસ્તથા ।
પૂજ્યા ભૂષયિતવ્યાશ્ચ બહુકલ્યાણમીપ્સુભિઃ ॥ ૩.૫૫॥

યત્ર નાર્યસ્તુ પૂજ્યન્તે રમન્તે તત્ર દેવતાઃ ।
યત્રૈતાસ્તુ ન પૂજ્યન્તે સર્વાસ્તત્રાફલાઃ ક્રિયાઃ ॥ ૩.૫૬॥

( Followingten verses are missingin M.)
શોચન્તિ જામયો યત્ર વિનશ્યત્યાશુ તત્કુલમ્ ।
ન શોચન્તિ તુ યત્રૈતા વર્ધતે તધિ સર્વદા ॥ ૩.૫૭॥

જામયો યાનિ ગેહાનિ શપન્ત્યપ્રતિપૂજિતાઃ ॥

તાનિ કૃત્યાહતાનીવ વિનશ્યન્તિ સમન્તતઃ ॥ ૩.૫૮॥

તસ્માદેતાઃ સદા પૂજ્યા ભૂષણાચ્છાદનાશનૈઃ ।
ભૂતિકામૈર્નરૈર્નિત્યં સત્કારેષૂત્સવેષુ ચ ॥ ૩.૫૯॥

સંતુષ્ટો ભાર્યયા ભર્તા ભર્ત્રા ભાર્યા તથૈવ ચ ।
યસ્મિન્નેવ કુલે નિત્યં કલ્યાણં તત્ર વૈ ધ્રુવમ્ ॥ ૩.૬૦॥

યદિ હિ સ્ત્રી ન રોચેત પુમાંસં ન પ્રમોદયેત્ ।
અપ્રમોદાત્પુનઃ પુંસઃ પ્રજનં ન પ્રવર્તતે ॥ ૩.૬૧॥

સ્ત્રિયાં તુ રોચમાનાયાં સર્વં તદ્રોચતે કુલમ્ ।
તસ્યાં ત્વરોચમાનાયાં સર્વમેવ ન રોચતે ॥ ૩.૬૨॥

કુવિવાહૈઃ ક્રિયાલોપૈર્વેદાનધ્યયનેન ચ ।
કુલાન્યકુલતાં યાન્તિ બ્રાહ્મણાતિક્રમેણ ચ ॥ ૩.૬૩॥

શિલ્પેન વ્યવહારેણ શૂદ્રાપત્યૈશ્ચ કેવલૈઃ ।
ગોભિરશ્વૈશ્ચ યાનૈશ્ચ કૃષ્યા રાજોપસેવયા ॥ ૩.૬૪॥

અયાજ્યયાજનૈશ્ચૈવ નાસ્તિક્યેન ચ કર્મણામ્ ।
કુલાન્યાશુ વિનશ્યન્તિ યાનિ હીનાનિ મન્ત્રતઃ ॥ ૩.૬૫॥

મન્ત્રતસ્તુ સમૃદ્ધાનિ કુલાન્યલ્પધનાન્યપિ ।
કુલસઙ્ખ્યાં ચ ગચ્છન્તિ કર્ષન્તિ ચ મહદ્યશઃ ॥ ૩.૬૬॥

વૈવાહિકેઽગ્નૌ કુર્વીત ગૃહ્યં કર્મ યથાવિધિ ।
પઞ્ચયજ્ઞવિધાનં ચ પક્તિં ચાન્વાહિકીં ગૃહી ॥ ૩.૬૭॥

પઞ્ચ સૂના ગૃહસ્થસ્ય ચુલ્લી પેષણ્યુપસ્કરઃ ।
કણ્ડની ચૌદકુમ્ભશ્ચ બધ્યતે યાસ્તુ વાહયન્ ॥ ૩.૬૮॥ વધ્યતે

તાસાં ક્રમેણ સર્વાસાં નિષ્કૃત્યર્થં મહર્ષિભિઃ ।
પઞ્ચ ક્લૃપ્તા મહાયજ્ઞાઃ પ્રત્યહં ગૃહમેધિનામ્ ॥ ૩.૬૯॥

અધ્યાપનં બ્રહ્મયજ્ઞઃ પિતૃયજ્ઞસ્તુ તર્પણમ્ ।
હોમો દૈવો બલિર્ભૌતો નૃયજ્ઞોઽતિથિપૂજનમ્ ॥ ૩.૭૦॥

પઞ્ચૈતાન્ યો મહાઽયજ્ઞાન્ન હાપયતિ શક્તિતઃ ।
સ ગૃહેઽપિ વસન્નિત્યં સૂનાદોષૈર્ન લિપ્યતે ॥ ૩.૭૧॥

દેવતાઽતિથિભૃત્યાનાં પિતૃણામાત્મનશ્ચ યઃ ।
ન નિર્વપતિ પઞ્ચાનામુચ્છ્વસન્ન સ જીવતિ ॥ ૩.૭૨॥

અહુતં ચ હુતં ચૈવ તથા પ્રહુતમેવ ચ ।
બ્રાહ્મ્યં હુતં પ્રાશિતં ચ પઞ્ચયજ્ઞાન્ પ્રચક્ષતે ॥ ૩.૭૩॥

જપોઽહુતો હુતો હોમઃ પ્રહુતો ભૌતિકો બલિઃ ।
બ્રાહ્મ્યં હુતં દ્વિજાગ્ર્યાર્ચા પ્રાશિતં પિતૃતર્પણમ્ ॥ ૩.૭૪॥

સ્વાધ્યાયે નિત્યયુક્તઃ સ્યાદ્દૈવે ચૈવેહ કર્મણિ ।
દૈવકર્મણિ યુક્તો હિ બિભર્તીદં ચરાચરમ્ ॥ ૩.૭૫॥

અગ્નૌ પ્રાસ્તાઽહુતિઃ સમ્યગાદિત્યમુપતિષ્ઠતે ।
આદિત્યાજ્જાયતે વૃષ્ટિર્વૃષ્ટેરન્નં તતઃ પ્રજાઃ ॥ ૩.૭૬॥

યથા વાયું સમાશ્રિત્ય વર્તન્તે સર્વજન્તવઃ । સર્વે જીવન્તિ જન્તવઃ

તથા ગૃહસ્થમાશ્રિત્ય  વર્તન્તે સર્વ આશ્રમાઃ ॥ ૩.૭૭॥ વર્તન્ત ઇતરાશ્રમઃ

યસ્માત્ત્રયોઽપ્યાશ્રમિણો જ્ઞાનેનાન્નેન ચાન્વહમ્ ।
ગૃહસ્થેનૈવ ધાર્યન્તે તસ્માજ્જ્યેષ્ઠાશ્રમો ગૃહી ॥ ૩.૭૮॥ ગૃહં

સ સંધાર્યઃ પ્રયત્નેન સ્વર્ગમક્ષયમિચ્છતા ।
સુખં ચેહેચ્છતાઽત્યન્તં યોઽધાર્યો દુર્બલેન્દ્રિયૈઃ ॥ ૩.૭૯॥

ઋષયઃ પિતરો દેવા ભૂતાન્યતિથયસ્તથા ।
આશાસતે કુટુમ્બિભ્યસ્તેભ્યઃ કાર્યં વિજાનતા ॥ ૩.૮૦॥

સ્વાધ્યાયેનાર્ચયેતઋષીન્ હોમૈર્દેવાન્ યથાવિધિ ।
પિતૄંશ્રાદ્ધૈશ્ચ નૄનન્નૈર્ભૂતાનિ બલિકર્મણા ॥ ૩.૮૧॥

કુર્યાદહરહઃ શ્રાદ્ધમન્નાદ્યેનોદકેન વા । દદ્યાદહરહઃ
પયોમૂલફલૈર્વાઽપિ પિતૃભ્યઃ પ્રીતિમાવહન્ ॥ ૩.૮૨॥

એકમપ્યાશયેદ્વિપ્રં પિત્ર્યર્થે પાઞ્ચયજ્ઞિકે । પિત્ર્યર્થં
ન ચૈવાત્રાશયેત્કિં ચિદ્વૈશ્વદેવં પ્રતિ દ્વિજમ્ ॥ ૩.૮૩॥

વૈશ્વદેવસ્ય સિદ્ધસ્ય ગૃહ્યેઽગ્નૌ વિધિપૂર્વકમ્ ।
આભ્યઃ કુર્યાદ્દેવતાભ્યો બ્રાહ્મણો હોમમન્વહમ્ ॥ ૩.૮૪॥

અગ્નેઃ સોમસ્ય ચૈવાદૌ તયોશ્ચૈવ સમસ્તયોઃ ।
વિશ્વેભ્યશ્ચૈવ દેવેભ્યો ધન્વન્તરય એવ ચ ॥ ૩.૮૫॥

કુહ્વૈ ચૈવાનુમત્યૈ ચ પ્રજાપતય એવ ચ  ।
સહ દ્યાવાપૃથિવ્યોશ્ચ તથા સ્વિષ્ટકૃતેઽન્તતઃ ॥ ૩.૮૬॥

એવં સમ્યગ્ઘવિર્હુત્વા સર્વદિક્ષુ પ્રદક્ષિણમ્ ।
ઇન્દ્રાન્તકાપ્પતીન્દુભ્યઃ સાનુગેભ્યો બલિં હરેત્ ॥ ૩.૮૭॥

મરુદ્ભ્ય ઇતિ તુ દ્વારિ ક્ષિપેદપ્સ્વદ્ભ્ય ઇત્યપિ ।
વનસ્પતિભ્ય ઇત્યેવં મુસલોલૂખલે હરેત્ ॥ ૩.૮૮॥

ઉચ્છીર્ષકે શ્રિયૈ કુર્યાદ્ભદ્રકાલ્યૈ ચ પાદતઃ ।
બ્રહ્મવાસ્તોષ્પતિભ્યાં તુ વાસ્તુમધ્યે બલિં હરેત્ ॥ ૩.૮૯॥

વિશ્વેભ્યશ્ચૈવ દેવેભ્યો બલિમાકાશ ઉત્ક્ષિપેત્ ।
દિવાચરેભ્યો ભૂતેભ્યો નક્તઞ્ચારિભ્ય એવ ચ ॥ ૩.૯૦॥

પૃષ્ઠવાસ્તુનિ કુર્વીત બલિં સર્વાત્મભૂતયે । સર્વાન્નભૂતયે
પિતૃભ્યો બલિશેષં તુ સર્વં દક્ષિણતો હરેત્ ॥ ૩.૯૧॥

શૂનાં ચ પતિતાનાં ચ શ્વપચાં પાપરોગિણામ્ ।
વયસાનાં કૃમીણાં ચ શનકૈર્નિર્વપેદ્ભુવિ ॥ ૩.૯૨॥ વયસાં ચ

એવં યઃ સર્વભૂતાનિ બ્રાહ્મણો નિત્યમર્ચતિ ।
સ ગચ્છતિ પરં સ્થાનં તેજોમૂર્તિઃ પથાર્જુના ॥ ૩.૯૩॥

કૃત્વૈતદ્બલિકર્મૈવમતિથિં પૂર્વમાશયેત્ ।
ભિક્ષાં ચ ભિક્ષવે દદ્યાદ્વિધિવદ્બ્રહ્મચારિણે ॥ ૩.૯૪॥

યત્પુણ્યફલમાપ્નોતિ ગાં દત્ત્વા વિધિવદ્ગુરોઃ ।
તત્પુણ્યફલમાપ્નોતિ ભિક્ષાં દત્ત્વા દ્વિજો ગૃહી ॥ ૩.૯૫॥

ભિક્ષામપ્યુદપાત્રં વા સત્કૃત્ય વિધિપૂર્વકમ્ ।
વેદતત્ત્વાર્થવિદુષે બ્રાહ્મણાયોપપાદયેત્ ॥ ૩.૯૬॥

નશ્યન્તિ હવ્યકવ્યાનિ નરાણામવિજાનતામ્ ।
ભસ્મીભૂતેષુ વિપ્રેષુ મોહાદ્દત્તાનિ દાતૃભિઃ ॥ ૩.૯૭॥ ભસ્મભૂતેષુ

વિદ્યાતપસ્સમૃદ્ધેષુ હુતં વિપ્રમુખાગ્નિષુ ।
નિસ્તારયતિ દુર્ગાચ્ચ મહતશ્ચૈવ કિલ્બિષાત્ ॥ ૩.૯૮॥

સમ્પ્રાપ્તાય ત્વતિથયે પ્રદદ્યાદાસનોદકે ।
અન્નં ચૈવ યથાશક્તિ સત્કૃત્ય વિધિપૂર્વકમ્ ॥ ૩.૯૯॥ સંસ્કૃત્ય

શિલાનપ્યુઞ્છતો નિત્યં પઞ્ચાગ્નીનપિ જુહ્વતઃ ।
સર્વં સુકૃતમાદત્તે બ્રાહ્મણોઽનર્ચિતો વસન્ ॥ ૩.૧૦૦॥

તૃણાનિ ભૂમિરુદકં વાક્ચતુર્થી ચ સૂનૃતા ।
એતાન્યપિ સતાં ગેહે નોચ્છિદ્યન્તે કદા ચન ॥ ૩.૧૦૧॥

એકરાત્રં તુ નિવસન્નતિથિર્બ્રાહ્મણઃ સ્મૃતઃ ।
અનિત્યં હિ સ્થિતો યસ્માત્તસ્માદતિથિરુચ્યતે ॥ ૩.૧૦૨॥

નૈકગ્રામીણમતિથિં વિપ્રં સાઙ્ગતિકં તથા ।
ઉપસ્થિતં ગૃહે વિદ્યાદ્ભાર્યા યત્રાગ્નયોઽપિ વા ॥ ૩.૧૦૩॥

ઉપાસતે યે ગૃહસ્થાઃ પરપાકમબુદ્ધયઃ ।
તેન તે પ્રેત્ય પશુતાં વ્રજન્ત્યન્નાદિદાયિનઃ ॥ ૩.૧૦૪॥

અપ્રણોદ્યોઽતિથિઃ સાયં સૂર્યોઢો ગૃહમેધિના ।
કાલે પ્રાપ્તસ્ત્વકાલે વા નાસ્યાનશ્નન્ ગૃહે વસેત્ ॥ ૩.૧૦૫॥

ન વૈ સ્વયં તદશ્નીયાદતિથિં યન્ન ભોજયેત્ ।
ધન્યં યશસ્યમાયુષ્યં સ્વર્ગ્યં વાઽતિથિપૂજનમ્ ॥ ૩.૧૦૬॥

આસનાવસથૌ શય્યામનુવ્રજ્યામુપાસનામ્ ।
ઉત્તમેષૂત્તમં કુર્યાધીને હીનં સમે સમમ્ ॥ ૩.૧૦૭॥

વૈશ્વદેવે તુ નિર્વૃત્તે યદ્યન્યોઽતિથિરાવ્રજેત્ ।
તસ્યાપ્યન્નં યથાશક્તિ પ્રદદ્યાન્ન બલિં હરેત્ ॥ ૩.૧૦૮॥

ન ભોજનાર્થં સ્વે વિપ્રઃ કુલગોત્રે નિવેદયેત્ ।
ભોજનાર્થં હિ તે શંસન્ વાન્તાશીત્યુચ્યતે બુધૈઃ ॥ ૩.૧૦૯॥

ન બ્રાહ્મણસ્ય ત્વતિથિર્ગૃહે રાજન્ય ઉચ્યતે ।
વૈશ્યશૂદ્રૌ સખા ચૈવ જ્ઞાતયો ગુરુરેવ ચ ॥ ૩.૧૧૦॥

યદિ ત્વતિથિધર્મેણ ક્ષત્રિયો ગૃહમાવ્રજેત્ ।
ભુક્તવત્સુ ચ વિપ્રેષુ કામં તમપિ ભોજયેત્ ॥ ૩.૧૧૧॥

વૈશ્યશૂદ્રાવપિ પ્રાપ્તૌ કુટુમ્બેઽતિથિધર્મિણૌ ।
ભોજયેત્સહ ભૃત્યૈસ્તાવાનૃશંસ્યં પ્રયોજયન્ ॥ ૩.૧૧૨॥

ઇતરાનપિ સખ્યાદીન્ સમ્પ્રીત્યા ગૃહમાગતાન્ ।
પ્રકૃત્યાન્નં યથાશક્તિ ભોજયેત્સહ ભાર્યયા ॥ ૩.૧૧૩॥

સુવાસિનીઃ કુમારીશ્ચ રોગિણો ગર્ભિણીઃ સ્ત્રિયઃ ।
અતિથિભ્યોઽગ્ર એવૈતાન્ ભોજયેદવિચારયન્ ॥ ૩.૧૧૪॥ અતિથિભ્યોઽન્વગેવૈતાન્

અદત્ત્વા તુ ય એતેભ્યઃ પૂર્વં ભુઙ્ક્તેઽવિચક્ષણઃ ।
સ ભુઞ્જાનો ન જાનાતિ શ્વગૃધ્રૈર્જગ્ધિમાત્મનઃ ॥ ૩.૧૧૫॥

ભુક્તવત્સ્વથ વિપ્રેષુ સ્વેષુ ભૃત્યેષુ ચૈવ હિ ।
ભુઞ્જીયાતાં તતઃ પશ્ચાદવશિષ્ટં તુ દમ્પતી ॥ ૩.૧૧૬॥

દેવાન્ ઋષીન્ મનુષ્યાંશ્ચ પિતૄન્ ગૃહ્યાશ્ચ દેવતાઃ ।
પૂજયિત્વા તતઃ પશ્ચાદ્ગૃહસ્થઃ શેષભુગ્ભવેત્ ॥ ૩.૧૧૭॥

અઘં સ કેવલં ભુઙ્ક્તે યઃ પચત્યાત્મકારણાત્ ।

યજ્ઞશિષ્ટાશનં હ્યેતત્સતામન્નં વિધીયતે ॥ ૩.૧૧૮॥

રાજર્ત્વિગ્સ્નાતકગુરૂન્ પ્રિયશ્વશુરમાતુલાન્ ।
અર્હયેન્ મધુપર્કેણ પરિસંવત્સરાત્પુનઃ ॥ ૩.૧૧૯॥

રાજા ચ શ્રોત્રિયશ્ચૈવ યજ્ઞકર્મણ્યુપસ્થિતૌ । ઉપસ્થિતે
મધુપર્કેણ સમ્પૂજ્યૌ ન ત્વયજ્ઞ ઇતિ સ્થિતિઃ ॥ ૩.૧૨૦॥

સાયં ત્વન્નસ્ય સિદ્ધસ્ય પત્ન્યમન્ત્રં બલિં હરેત્ ।
વૈશ્વદેવં હિ નામૈતત્સાયં પ્રાતર્વિધીયતે ॥ ૩.૧૨૧॥

પિતૃયજ્ઞં તુ નિર્વર્ત્ય વિપ્રશ્ચન્દ્રક્ષયેઽગ્નિમાન્ । ચૈન્દુક્ષયે
પિણ્ડાન્વાહાર્યકં શ્રાદ્ધં કુર્યાન્ માસાનુમાસિકમ્ ॥ ૩.૧૨૨॥

પિતૃણાં માસિકં શ્રાદ્ધમન્વાહાર્યં વિદુર્બુધાઃ ।
તચ્ચામિષેણા કર્તવ્યં પ્રશસ્તેન પ્રયત્નતઃ ॥ ૩.૧૨૩॥ સમન્તત

તત્ર યે ભોજનીયાઃ સ્યુર્યે ચ વર્જ્યા દ્વિજોત્તમાઃ ।
યાવન્તશ્ચૈવ યૈશ્ચાન્નૈસ્તાન્ પ્રવક્ષ્યામ્યશેષતઃ ॥ ૩.૧૨૪॥

દ્વૌ દૈવે પિતૃકાર્યે ત્રીનેકૈકમુભયત્ર વા । પિતૃકૃત્યે
ભોજયેત્સુસમૃદ્ધોઽપિ ન પ્રસજ્જેત વિસ્તરે ॥ ૩.૧૨૫॥ ન પ્રવર્તેત

સત્ક્રિયાં દેશકાલૌ ચ શૌચં બ્રાહ્મણસમ્પદઃ ।
પઞ્ચૈતાન્ વિસ્તરો હન્તિ તસ્માન્નેહેત વિસ્તરમ્ ॥ ૩.૧૨૬॥

પ્રથિતા પ્રેતકૃત્યૈષા પિત્ર્યં નામ વિધુક્ષયે ।
તસ્મિન્ યુક્તસ્યૈતિ નિત્યં પ્રેતકૃત્યૈવ લૌકિકી ॥ ૩.૧૨૭॥

શ્રોત્રિયાયૈવ દેયાનિ હવ્યકવ્યાનિ દાતૃભિઃ ।
અર્હત્તમાય વિપ્રાય તસ્મૈ દત્તં મહાફલમ્ ॥ ૩.૧૨૮॥

એકૈકમપિ વિદ્વાંસં દૈવે પિત્ર્યે ચ ભોજયેત્ । ભોજયન્
પુષ્કલં ફલમાપ્નોતિ નામન્ત્રજ્ઞાન્ બહૂનપિ ॥ ૩.૧૨૯॥

દૂરાદેવ પરીક્ષેત બ્રાહ્મણં વેદપારગમ્ ।
તીર્થં તદ્ધવ્યકવ્યાનાં પ્રદાને સોઽતિથિઃ સ્મૃતઃ ॥ ૩.૧૩૦॥

સહસ્રં હિ સહસ્રાણામનૃચાં યત્ર ભુઞ્જતે ।
એકસ્તાન્ મન્ત્રવિત્પ્રીતઃ સર્વાનર્હતિ ધર્મતઃ ॥ ૩.૧૩૧॥

જ્ઞાનોત્કૃષ્ટાય દેયાનિ કવ્યાનિ ચ હવીંષિ ચ ।
ન હિ હસ્તાવસૃગ્દિગ્ધૌ રુધિરેણૈવ શુધ્યતઃ ॥ ૩.૧૩૨॥

યાવતો ગ્રસતે ગ્રાસાન્ હવ્યકવ્યેષ્વમન્ત્રવિત્ ।
તાવતો ગ્રસતે પ્રેતો દીપ્તશૂલર્ષ્ટ્યયોગુડાન્ ॥ ૩.૧૩૩॥

જ્ઞાનનિષ્ઠા દ્વિજાઃ કે ચિત્તપોનિષ્ઠાસ્તથાઽપરે ।
તપઃસ્વાધ્યાયનિષ્ઠાશ્ચ કર્મનિષ્ઠાસ્તથાઽપરે ॥ ૩.૧૩૪॥

જ્ઞાનનિષ્ઠેષુ કવ્યાનિ પ્રતિષ્ઠાપ્યાનિ યત્નતઃ ।
હવ્યાનિ તુ યથાન્યાયં સર્વેષ્વેવ ચતુર્ષ્વપિ ॥ ૩.૧૩૫॥

અશ્રોત્રિયઃ પિતા યસ્ય પુત્રઃ સ્યાદ્વેદપારગઃ ।
અશ્રોત્રિયો વા પુત્રઃ સ્યાત્પિતા સ્યાદ્વેદપારગઃ ॥ ૩.૧૩૬॥

જ્યાયાંસમનયોર્વિદ્યાદ્યસ્ય સ્યાત્શ્રોત્રિયઃ પિતા ।
મન્ત્રસમ્પૂજનાર્થં તુ સત્કારમિતરોઽર્હતિ ॥ ૩.૧૩૭॥

ન શ્રાદ્ધે ભોજયેન્ મિત્રં ધનૈઃ કાર્યોઽસ્ય સઙ્ગ્રહઃ ।
નારિં ન મિત્રં યં વિદ્યાત્તં શ્રાદ્ધે ભોજયેદ્દ્વિજમ્ ॥ ૩.૧૩૮॥

યસ્ય મિત્રપ્રધાનાનિ શ્રાદ્ધાનિ ચ હવીંષિ ચ ।
તસ્ય પ્રેત્ય ફલં નાસ્તિ શ્રાદ્ધેષુ ચ હવિઃષુ ચ ॥ ૩.૧૩૯॥

યઃ સઙ્ગતાનિ કુરુતે મોહાત્શ્રાદ્ધેન માનવઃ ।
સ સ્વર્ગાચ્ચ્યવતે લોકાત્શ્રાદ્ધમિત્રો દ્વિજાધમઃ ॥ ૩.૧૪૦॥

સમ્ભોજાનિ સાઽભિહિતા પૈશાચી દક્ષિણા દ્વિજૈઃ ।
ઇહૈવાસ્તે તુ સા લોકે ગૌરન્ધેવૈકવેશ્મનિ ॥ ૩.૧૪૧॥

યથૈરિણે બીજમુપ્ત્વા ન વપ્તા લભતે ફલમ્ ।
તથાઽનૃચે હવિર્દત્ત્વા ન દાતા લભતે ફલમ્ ॥ ૩.૧૪૨॥

દાતૃન્ પ્રતિગ્રહીતૃંશ્ચ કુરુતે ફલભાગિનઃ ।
વિદુષે દક્ષિણાં દત્ત્વા વિધિવત્પ્રેત્ય ચૈહ ચ ॥ ૩.૧૪૩॥

કામં શ્રાદ્ધેઽર્ચયેન્ મિત્રં નાભિરૂપમપિ ત્વરિમ્ ।
દ્વિષતા હિ હવિર્ભુક્તં ભવતિ પ્રેત્ય નિષ્ફલમ્ ॥ ૩.૧૪૪॥

યત્નેન ભોજયેત્શ્રાદ્ધે બહ્વૃચં વેદપારગમ્ ।
શાખાન્તગમથાધ્વર્યું છન્દોગં તુ સમાપ્તિકમ્ ॥ ૩.૧૪૫॥

એષામન્યતમો યસ્ય ભુઞ્જીત શ્રાદ્ધમર્ચિતઃ ।
પિતૃણાં તસ્ય તૃપ્તિઃ સ્યાત્શાશ્વતી સાપ્તપૌરુષી ॥ ૩.૧૪૬॥

એષ વૈ પ્રથમઃ કલ્પઃ પ્રદાને હવ્યકવ્યયોઃ ।
અનુકલ્પસ્ત્વયં જ્ઞેયઃ સદા સદ્ભિરનુષ્ઠિતઃ ॥ ૩.૧૪૭॥

માતામહં માતુલં ચ સ્વસ્રીયં શ્વશુરં ગુરુમ્ ।
દૌહિત્રં વિટ્પતિં બન્ધું ઋત્વિગ્યાજ્યૌ ચ ભોજયેત્ ॥ ૩.૧૪૮॥

ન બ્રાહ્મણં પરીક્ષેત દૈવે કર્મણિ ધર્મવિત્ ।
પિત્ર્યે કર્મણિ તુ પ્રાપ્તે પરીક્ષેત પ્રયત્નતઃ ॥ ૩.૧૪૯॥

યે સ્તેનપતિતક્લીબા યે ચ નાસ્તિકવૃત્તયઃ ।
તાન્ હવ્યકવ્યયોર્વિપ્રાનનર્હાન્ મનુરબ્રવીત્ ॥ ૩.૧૫૦॥

જટિલં ચાનધીયાનં દુર્બાલં કિતવં તથા ।
યાજયન્તિ ચ યે પૂગાંસ્તાંશ્ચ શ્રાદ્ધે ન ભોજયેત્ ॥ ૩.૧૫૧॥

ચિકિત્સકાન્ દેવલકાન્ માંસવિક્રયિણસ્તથા । ચિકિત્સકાદેવલકામાંસવિક્રયિણસ્તથા
વિપણેન ચ જીવન્તો વર્જ્યાઃ સ્યુર્હવ્યકવ્યયોઃ ॥ ૩.૧૫૨॥

પ્રેષ્યો ગ્રામસ્ય રાજ્ઞશ્ચ કુનખી શ્યાવદન્તકઃ ।
પ્રતિરોદ્ધા ગુરોશ્ચૈવ ત્યક્તાગ્નિર્વાર્ધુષિસ્તથા ॥ ૩.૧૫૩॥

યક્ષ્મી ચ પશુપાલશ્ચ પરિવેત્તા નિરાકૃતિઃ ।
બ્રહ્મદ્વિષ્પરિવિત્તિશ્ચ ગણાભ્યન્તર એવ ચ ॥ ૩.૧૫૪॥

કુશીલવોઽવકીર્ણી ચ વૃષલીપતિરેવ ચ ।
પૌનર્ભવશ્ચ કાણશ્ચ યસ્ય ચૌપપતિર્ગૃહે ॥ ૩.૧૫૫॥

ભૃતકાધ્યાપકો યશ્ચ ભૃતકાધ્યાપિતસ્તથા ।
શૂદ્રશિષ્યો ગુરુશ્ચૈવ વાગ્દુષ્ટઃ કુણ્ડગોલકૌ ॥ ૩.૧૫૬॥

અકારણે પરિત્યક્તા માતાપિત્રોર્ગુરોસ્તથા । અકારણપરિત્યક્તા
બ્રાહ્મૈર્યૌનૈશ્ચ સમ્બન્ધૈઃ સંયોગં પતિતૈર્ગતઃ ॥ ૩.૧૫૭॥

અગારદાહી ગરદઃ કુણ્ડાશી સોમવિક્રયી ।
સમુદ્રયાયી બન્દી ચ તૈલિકઃ કૂટકારકઃ ॥ ૩.૧૫૮॥

પિત્રા વિવદમાનશ્ચ કિતવો મદ્યપસ્તથા ।

પાપરોગ્યભિશસ્તશ્ચ દામ્ભિકો રસવિક્રયી ॥ ૩.૧૫૯॥

ધનુઃશરાણાં કર્તા ચ યશ્ચાગ્રેદિધિષૂપતિઃ ।
મિત્રધ્રુગ્દ્યૂતવૃત્તિશ્ચ પુત્રાચાર્યસ્તથૈવ ચ ॥ ૩.૧૬૦॥

ભ્રામરી ગણ્ડમાલી ચ શ્વિત્ર્યથો પિશુનસ્તથા ।
ઉન્મત્તોઽન્ધશ્ચ વર્જ્યાઃ સ્યુર્વેદનિન્દક એવ ચ ॥ ૩.૧૬૧॥

હસ્તિગોઽશ્વૌષ્ટ્રદમકો નક્ષત્રૈર્યશ્ચ જીવતિ ।
પક્ષિણાં પોષકો યશ્ચ યુદ્ધાચાર્યસ્તથૈવ ચ ॥ ૩.૧૬૨॥

સ્રોતસાં ભેદકો યશ્ચ તેષાં ચાવરણે રતઃ ।
ગૃહસંવેશકો દૂતો વૃક્ષારોપક એવ ચ ॥ ૩.૧૬૩॥

શ્વક્રીડી શ્યેનજીવી ચ કન્યાદૂષક એવ ચ ।
હિંસ્રો વૃષલવૃત્તિશ્ચ ગણાનાં ચૈવ યાજકઃ ॥ ૩.૧૬૪॥

આચારહીનઃ ક્લીબશ્ચ નિત્યં યાચનકસ્તથા ।
કૃષિજીવી શ્લીપદી ચ સદ્ભિર્નિન્દિત એવ ચ ॥ ૩.૧૬૫॥

ઔરભ્રિકો માહિષિકઃ પરપૂર્વાપતિસ્તથા ।
પ્રેતનિર્યાપકશ્ચૈવ વર્જનીયાઃ પ્રયત્નતઃ ॥ ૩.૧૬૬॥

એતાન્ વિગર્હિતાચારાનપાઙ્ક્તેયાન્ દ્વિજાધમાન્ ।
દ્વિજાતિપ્રવરો વિદ્વાનુભયત્ર વિવર્જયેત્ ॥ ૩.૧૬૭॥

બ્રાહ્મણો ત્વનધીયાનસ્તૃણાગ્નિરિવ શામ્યતિ । બ્રાહ્મણઃ હ્યનધીયાનઃ
તસ્મૈ હવ્યં ન દાતવ્યં ન હિ ભસ્મનિ હૂયતે ॥ ૩.૧૬૮॥

અપાઙ્ક્તદાને યો દાતુર્ભવત્યૂર્ધ્વં ફલોદયઃ । અપઙ્ક્ત્યદાને
દૈવે હવિષિ પિત્ર્યે વા તં પ્રવક્ષ્યામ્યશેષતઃ ॥ ૩.૧૬૯॥ દૈવે કર્મણિ

અવ્રતૈર્યદ્દ્વિજૈર્ભુક્તં પરિવેત્ર્યાદિભિસ્તથા ।
અપાઙ્ક્તેયૈર્યદન્યૈશ્ચ તદ્વૈ રક્ષાંસિ ભુઞ્જતે ॥ ૩.૧૭૦॥

દારાગ્નિહોત્રસંયોગં કુરુતે યોઽગ્રજે સ્થિતે ।
પરિવેત્તા સ વિજ્ઞેયઃ પરિવિત્તિસ્તુ પૂર્વજઃ ॥ ૩.૧૭૧॥

પરિવિત્તિઃ પરિવેત્તા યયા ચ પરિવિદ્યતે ।
સર્વે તે નરકં યાન્તિ દાતૃયાજકપઞ્ચમાઃ ॥ ૩.૧૭૨॥

ભ્રાતુર્મૃતસ્ય ભાર્યાયાં યોऽનુરજ્યેત કામતઃ ।
ધર્મેણાપિ નિયુક્તાયાં સ જ્ઞેયો દિધિષૂપતિઃ ॥ ૩.૧૭૩॥

પરદારેષુ જાયેતે દ્વૌ સુતૌ કુણ્ડગોલકૌ ।
પત્યૌ જીવતિ કુણ્ડઃ સ્યાન્ મૃતે ભર્તરિ ગોલકઃ ॥ ૩.૧૭૪॥

તૌ તુ જાતૌ પરક્ષેત્રે પ્રાણિનૌ પ્રેત્ય ચેહ ચ । તે તુ જાતાઃ પરક્ષેત્રે પ્રાણિનઃ
દત્તાનિ હવ્યકવ્યાનિ નાશયન્તિ પ્રદાયિનામ્ ॥ ૩.૧૭૫॥

અપાઙ્ક્ત્યો યાવતઃ પઙ્ક્ત્યાન્ ભુઞ્જાનાननुપશ્યતિ । અપઙ્ક્ત્યો યાવતઃ
તાવતાં ન ફલં તત્ર દાતા પ્રાપ્નોતિ બાલિશઃ ॥ ૩.૧૭૬॥

વીક્ષ્યાન્ધો નવતેઃ કાણઃ ષષ્ટેઃ શ્વિત્રી શતસ્ય તુ । શતસ્ય ચ
પાપરોગી સહસ્રસ્ય દાતુર્નાશયતે ફલમ્ ॥ ૩.૧૭૭॥

યાવતઃ સંસ્પૃશેદઙ્ગૈર્બ્રાહ્મણાન્ શૂદ્રયાજકઃ ।
તાવતાં ન ભવેદ્દાતુઃ ફલં દાનસ્ય પૌર્તિકમ્ ॥ ૩.૧૬૮॥

વેદવિદ્યાપિ વિપ્રોऽસ્ય લોભાત્કૃત્વા પ્રતિગ્રહમ્ ।
વિનાશં વ્રજતિ ક્ષિપ્રમામપાત્રમિવામ્ભસિ ॥ ૩.૧૭૯॥

સોમવિક્રયિણે વિષ્ઠા ભિષજે પૂયશોણિતમ્ ।
નષ્ટં દેવલકે દત્તમપ્રતિષ્ઠં તુ વાર્ધુષૌ ॥ ૩.૧૮૦॥

યત્તુ વાણિજકે દત્તં નેહ નામુત્ર તદ્ભવેત્ ।
ભસ્મનીવ હુતં દ્રવ્યં તથા પૌનર્ભવે દ્વિજે ॥ ૩.૧૮૧॥

ઇતરેષુ ત્વપાઙ્ક્ત્યેષુ યથોદ્દિષ્ટેષ્વસાધુષુ ।
મેદોऽસૃઙ્માંસમજ્જાऽસ્થિ વદન્ત્યન્નં મનીષિણઃ ॥ ૩.૧૮૨॥

અપાઙ્ક્ત્યોપહતા પઙ્ક્તિઃ પાવ્યતે યૈર્દ્વિજોત્તમૈઃ । અપઙ્ક્ત્યૌપહતા પઙ્ક્તિઃ
તાન્નિબોધત કાર્ત્સ્ન્યેન દ્વિજાગ્ર્યાન્ પઙ્ક્તિપાવનાન્ ॥ ૩.૧૮૩॥

અગ્ર્યાઃ સર્વેષુ વેદેષુ સર્વપ્રવચનેષુ ચ ।
શ્રોત્રિયાન્વયજાશ્ચૈવ વિજ્ઞેયાઃ પઙ્ક્તિપાવનાઃ ॥ ૩.૧૮૪॥

ત્રિણાચિકેતઃ પઞ્ચાગ્નિસ્ત્રિસુપર્ણઃ ષડઙ્ગવિત્ ।
બ્રહ્મદેયાત્મસન્તાનો જ્યેષ્ઠસામગ એવ ચ ॥ ૩.૧૮૫॥ બ્રહ્મદેયાનુસન્તાનો

વેદાર્થવિત્પ્રવક્તા ચ બ્રહ્મચારી સહસ્રદઃ ।
શતાયુશ્ચૈવ વિજ્ઞેયા બ્રાહ્મણાઃ પઙ્ક્તિપાવનાઃ ॥ ૩.૧૮૬॥

પૂર્વેદ્યુરપરેદ્યુર્વા શ્રાદ્ધકર્મણ્યુપસ્થિતે ।
નિમન્ત્રયેત ત્ર્યવરાન્ સમ્યગ્વિપ્રાન્ યથૌદિતાન્ ॥ ૩.૧૮૭॥ નિમન્ત્રયીત

નિમન્ત્રિતો દ્વિજઃ પિત્ર્યે નિયતાત્મા ભવેત્સદા ।
ન ચ છન્દાંસ્યધીયીત યસ્ય શ્રાદ્ધં ચ તદ્ભવેત્ ॥ ૩.૧૮૮॥

નિમન્ત્રિતાન્ હિ પિતર ઉપતિષ્ઠન્તિ તાન્ દ્વિજાન્ ।
વાયુવત્ચાનુગચ્છન્તિ તથાઽસીનાનુપાસતે ॥ ૩.૧૮૯॥

કેતિતસ્તુ યથાન્યાયં હવ્યે કવ્યે દ્વિજોત્તમઃ ।
કથં ચિદપ્યતિક્રામન્ પાપઃ સૂકરતાં વ્રજેત્ ॥ ૩.૧૯૦॥

આમન્ત્રિતસ્તુ યઃ શ્રાદ્ધે વૃષલ્યા સહ મોદતે ।
દાતુર્યદ્દુષ્કૃતં કિં ચિત્તત્સર્વં પ્રતિપદ્યતે ॥ ૩.૧૯૧॥

અક્રોધનાઃ શૌચપરાઃ સતતં બ્રહ્મચારિણઃ ।
ન્યસ્તશસ્ત્રા મહાભાગાઃ પિતરઃ પૂર્વદેવતાઃ ॥ ૩.૧૯૨॥

યસ્માદુત્પત્તિરેતેષાં સર્વેષામપ્યશેષતઃ ।
યે ચ યૈરુપચર્યાઃ સ્યુર્નિયમૈસ્તાન્નિબોધત ॥ ૩.૧૯૩॥

મનોર્હૈરણ્યગર્ભસ્ય યે મરીચ્યાદયઃ સુતાઃ ।
તેષાં ઋષીણાં સર્વેષાં પુત્રાઃ પિતૃગણાઃ સ્મૃતાઃ ॥ ૩.૧૯૪॥

વિરાટ્સુતાઃ સોમસદઃ સાધ્યાનાં પિતરઃ સ્મૃતાઃ ।
અગ્નિષ્વાત્તાશ્ચ દેવાનાં મારીચા લોકવિશ્રુતાઃ ॥ ૩.૧૯૫॥

દૈત્યદાનવયક્ષાણાં ગન્ધર્વોરગરક્ષસામ્ ।
સુપર્ણકિન્નરાણાં ચ સ્મૃતા બર્હિષદોઽત્રિજાઃ ॥ ૩.૧૯૬॥

સોમપા નામ વિપ્રાણાં ક્ષત્રિયાણાં હવિર્ભુજઃ ।
વૈશ્યાનામાજ્યપા નામ શૂદ્રાણાં તુ સુકાલિનઃ ॥ ૩.૧૯૭॥

સોમપાસ્તુ કવેઃ પુત્રા હવિષ્મન્તોઽઙ્ગિરઃસુતાઃ ।
પુલસ્ત્યસ્યાજ્યપાઃ પુત્રા વસિષ્ઠસ્ય સુકાલિનઃ ॥ ૩.૧૯૮॥

અગ્નિદગ્ધાનગ્નિદગ્ધાન્ કાવ્યાન્ બર્હિષદસ્તથા । અનગ્નિદગ્ધાનગ્નિદગ્ધાન્
અગ્નિષ્વાત્તાંશ્ચ સૌમ્યાંશ્ચ વિપ્રાણામેવ નિર્દિશેત્ ॥ ૩.૧૯૯॥

ય એતે તુ ગણા મુખ્યાઃ પિતૄણાં પરિકીર્તિતાઃ ।

તેષામપીહ વિજ્ઞેયં પુત્રપૌત્રમનન્તકમ્ ॥ ૩.૨૦૦॥

ઋષિભ્યઃ પિતરો જાતાઃ પિતૃભ્યો દેવમાનવાઃ ।
દેવેભ્યસ્તુ જગત્સર્વં ચરં સ્થાણ્વનુપૂર્વશઃ ॥ ૩.૨૦૧॥

રાજતૈર્ભાજનૈરેષામથો વા રજતાન્વિતૈઃ ।
વાર્યપિ શ્રદ્ધયા દત્તમક્ષયાયોપકલ્પતે ॥ ૩.૨૦૨॥

દૈવકાર્યાદ્દ્વિજાતીનાં પિતૃકાર્યં વિશિષ્યતે ।
દૈવં હિ પિતૃકાર્યસ્ય પૂર્વમાપ્યાયનં સ્મૃતમ્ ॥ ૩.૨૦૩॥

તેષામારક્ષભૂતં તુ પૂર્વં દૈવં નિયોજયેત્ ।
રક્ષાંસિ વિપ્રલુમ્પન્તિ શ્રાદ્ધમારક્ષવર્જિતમ્ ॥ ૩.૨૦૪॥

દૈવાદ્યન્તં તદીહેત પિત્ર્યાદ્યન્તં ન તદ્ભવેત્ ।
પિત્ર્યાદ્યન્તં ત્વીહમાનઃ ક્ષિપ્રં નશ્યતિ સાન્વયઃ ॥ ૩.૨૦૫॥

શુચિં દેશં વિવિક્તં ચ ગોમયેનોપલેપયેત્ ।
દક્ષિણાપ્રવણં ચૈવ પ્રયત્નેનોપપાદયેત્ ॥ ૩.૨૦૬॥

અવકાશેષુ ચોક્ષેષુ જલતીરેષુ ચૈવ હિ ।
વિવિક્તેષુ ચ તુષ્યન્તિ દત્તેન પિતરઃ સદા ॥ ૩.૨૦૭॥

આસનેષૂપક્લૃપ્તેષુ બર્હિષ્મત્સુ પૃથક્પૃથક્ ।
ઉપસ્પૃષ્ટોદકાન્ સમ્યગ્વિપ્રાંસ્તાનુપવેશયેત્ ॥ ૩.૨૦૮॥

ઉપવેશ્ય તુ તાન્ વિપ્રાનાસનેષ્વજુગુપ્સિતાન્ ।
ગન્ધમાલ્યૈઃ સુરભિભિરર્ચયેદ્દૈવપૂર્વકમ્ ॥ ૩.૨૦૯॥

તેષામુદકમાનીય સપવિત્રાંસ્તિલાનપિ ।
અગ્નૌ કુર્યાદનુજ્ઞાતો બ્રાહ્મણો બ્રાહ્મણૈઃ સહ ॥ ૩.૨૧૦॥

અગ્નેઃ સોમયમાભ્યાં ચ કૃત્વાઽપ્યાયનમાદિતઃ ।
હવિર્દાનેન વિધિવત્પશ્ચાત્સંતર્પયેત્પિતૄન્ ॥ ૩.૨૧૧॥

અગ્ન્યભાવે તુ વિપ્રસ્ય પાણાવેવોપપાદયેત્ ।
યો હ્યગ્નિઃ સ દ્વિજો વિપ્રૈર્મન્ત્રદર્શિભિરુચ્યતે ॥ ૩.૨૧૨॥

અક્રોધનાન્ સુપ્રસાદાન્ વદન્ત્યેતાન્ પુરાતનાન્ ।
લોકસ્યાપ્યાયને યુક્તાન્ શ્રાદ્ધદેવાન્ દ્વિજોત્તમાન્ ॥ ૩.૨૧૩॥ શ્રાદ્ધે દેવાન્ દ્વિજોત્તમાન્

અપસવ્યમગ્નૌ કૃત્વા સર્વમાવૃત્ય વિક્રમમ્ । આવૃત્પરિક્રમં
અપસવ્યેન હસ્તેન નિર્વપેદુદકં ભુવિ ॥ ૩.૨૧૪॥

ત્રીંસ્તુ તસ્માધવિઃશેષાત્પિણ્ડાન્ કૃત્વા સમાહિતઃ ।
ઔદકેનૈવ વિધિના નિર્વપેદ્દક્ષિણામુખઃ ॥ ૩.૨૧૫॥

ન્યુપ્ય પિણ્ડાંસ્તતસ્તાંસ્તુ પ્રયતો વિધિપૂર્વકમ્ ।
તેષુ દર્ભેષુ તં હસ્તં નિર્મૃજ્યાલ્લેપભાગિનામ્ ॥ ૩.૨૧૬॥

આચમ્યોદક્પરાવૃત્ય ત્રિરાયમ્ય શનૈરસૂન્ ।
ષડૃતૂંશ્ચ નમસ્કુર્યાત્પિતૃનેવ ચ મન્ત્રવત્ ॥ ૩.૨૧૭॥

ઉદકં નિનયેત્શેષં શનૈઃ પિણ્ડાન્તિકે પુનઃ ।
અવજિઘ્રેચ્ચ તાન્ પિણ્ડાન્ યથાન્યુપ્તાન્ સમાહિતઃ ॥ ૩.૨૧૮॥

પિણ્ડેભ્યસ્ત્વલ્પિકાં માત્રાં સમાદાયાનુપૂર્વશઃ । પિણ્ડેભ્યઃ સ્વલ્પિકાં
તાનેવ વિપ્રાનાસીનાન્ વિધિવત્પૂર્વમાશયેત્ ॥ ૩.૨૧૯॥

ધ્રિયમાણે તુ પિતરિ પૂર્વેષામેવ નિર્વપેત્ ।
વિપ્રવદ્વાઽપિ તં શ્રાદ્ધે સ્વકં પિતરમાશયેત્ ॥ ૩.૨૨૦॥ શ્રાદ્ધં

પિતા યસ્ય નિવૃત્તઃ સ્યાજ્જીવેચ્ચાપિ પિતામહઃ । પિતા યસ્ય તુ વૃત્તઃ સ્યાજ્
પિતુઃ સ નામ સઙ્કીર્ત્ય કીર્તયેત્પ્રપિતામહમ્ ॥ ૩.૨૨૧॥

પિતામહો વા તત્શ્રાદ્ધં ભુઞ્જીતેત્યબ્રવીન્ મનુઃ ।
કામં વા સમનુજ્ઞાતઃ સ્વયમેવ સમાચરેત્ ॥ ૩.૨૨૨॥

તેષાં દત્ત્વા તુ હસ્તેષુ સપવિત્રં તિલોદકમ્ ।
તત્પિણ્ડાગ્રં પ્રયચ્છેત સ્વધૈષામસ્ત્વિતિ બ્રુવન્ ॥ ૩.૨૨૩॥ પ્રયચ્છેત્તુ

પાણિભ્યાં તૂપસઙ્ગૃહ્ય સ્વયમન્નસ્ય વર્ધિતમ્ । વર્દ્ધિતમ્
વિપ્રાન્તિકે પિતૄન્ ધ્યાયન્ શનકૈરુપનિક્ષિપેત્ ॥ ૩.૨૨૪॥

ઉભયોર્હસ્તયોર્મુક્તં યદન્નમુપનીયતે ।
તદ્વિપ્રલુમ્પન્ત્યસુરાઃ સહસા દુષ્ટચેતસઃ ॥ ૩.૨૨૫॥

ગુણાંશ્ચ સૂપશાકાદ્યાન્ પયો દધિ ઘૃતં મધુ ।
વિન્યસેત્પ્રયતઃ પૂર્વં ભૂમાવેવ સમાહિતઃ ॥ ૩.૨૨૬॥

ભક્ષ્યં ભોજ્યં ચ વિવિધં મૂલાનિ ચ ફલાનિ ચ ।
હૃદ્યાનિ ચૈવ માંસાનિ પાનાનિ સુરભીણિ ચ ॥ ૩.૨૨૭॥

ઉપનીય તુ તત્સર્વં શનકૈઃ સુસમાહિતઃ ।
પરિવેષયેત પ્રયતો ગુણાન્ સર્વાન્ પ્રચોદયન્ ॥ ૩.૨૨૮॥

નાસ્રમાપાતયેજ્જાતુ ન કુપ્યેન્નાનૃતં વદેત્ ।
ન પાદેન સ્પૃશેદન્નં ન ચૈતદવધૂનયેત્ ॥ ૩.૨૨૯॥

અસ્રં ગમયતિ પ્રેતાન્ કોપોઽરીનનૃતં શુનઃ ।
પાદસ્પર્શસ્તુ રક્ષાંસિ દુષ્કૃતીનવધૂનનમ્ ॥ ૩.૨૩૦॥

યદ્યદ્રોચેત વિપ્રેભ્યસ્તત્તદ્દ્યાદમત્સરઃ ।
બ્રહ્મોદ્યાશ્ચ કથાઃ કુર્યાત્પિતૃણામેતદીપ્સિતમ્ ॥ ૩.૨૩૧॥

સ્વાધ્યાયં શ્રાવયેત્પિત્ર્યે ધર્મશાસ્ત્રાણિ ચૈવ હિ ।
આખ્યાનાનીતિહાસાંશ્ચ પુરાણાનિ ખિલાનિ ચ ॥ ૩.૨૩૨॥

હર્ષયેદ્બ્રાહ્મણાંસ્તુષ્ટો ભોજયેચ્ચ શનૈઃશનૈઃ ।
અન્નાદ્યેનાસકૃચ્ચૈતાન્ ગુણૈશ્ચ પરિચોદયેત્ ॥ ૩.૨૩૩॥

વ્રતસ્થમપિ દૌહિત્રં શ્રાદ્ધે યત્નેન ભોજયેત્ ।
કુતપં ચાસનં દદ્યાત્તિલૈશ્ચ વિકિરેન્ મહીમ્ ॥ ૩.૨૩૪॥

ત્રીણિ શ્રાદ્ધે પવિત્રાણિ દૌહિત્રઃ કુતપસ્તિલાઃ ।
ત્રીણિ ચાત્ર પ્રશંસન્તિ શૌચમક્રોધમત્વરામ્ ॥ ૩.૨૩૫॥

અત્યુષ્ણં સર્વમન્નં સ્યાદ્ભુઞ્જીરંસ્તે ચ વાગ્યતાઃ ।
ન ચ દ્વિજાતયો બ્રૂયુર્દાત્રા પૃષ્ટા હવિર્ગુણાન્ ॥ ૩.૨૩૬॥

યાવદુષ્મા ભવત્યન્નં યાવદશ્નન્તિ વાગ્યતાઃ ।
પિતરસ્તાવદશ્નન્તિ યાવન્નઓક્તા હવિર્ગુણાઃ ॥ ૩.૨૩૭॥

યદ્વેષ્ટિતશિરા ભુઙ્ક્તે યદ્ભુઙ્ક્તે દક્ષિણામુખઃ ।
સૌપાનત્કશ્ચ યદ્ભુઙ્ક્તે તદ્વૈ રક્ષાંસિ ભુઞ્જતે ॥ ૩.૨૩૮॥

ચાણ્ડાલશ્ચ વરાહશ્ચ કુક્કુટઃ શ્વા તથૈવ ચ ।
રજસ્વલા ચ ષણ્ઢશ્ચ નૈક્ષેરન્નશ્નતો દ્વિજાન્ ॥ ૩.૨૩૯॥

હોમે પ્રદાને ભોજ્યે ચ યદેભિરભિવીક્ષ્યતે ।
દૈવે હવિષિ પિત્ર્યે વા તદ્ગચ્છત્યયથાતથમ્ ॥ ૩.૨૪૦॥

ઘ્રાણેન સૂકરો હન્તિ પક્ષવાતેન કુક્કુટઃ । શૂકરો

શ્વા તુ દૃષ્ટિનિપાતેન સ્પર્શેણાવરવર્ણજઃ ॥ ૩.૨૪૧॥

ખઞ્જો વા યદિ વા કાણો દાતુઃ પ્રેષ્યોઽપિ વા ભવેત્ ।
હીનાતિરિક્તગાત્રો વા તમપ્યપનયેત્પુનઃ ॥ ૩.૨૪૨॥

બ્રાહ્મણં ભિક્ષુકં વાઽપિ ભોજનાર્થમુપસ્થિતમ્ ।
બ્રાહ્મણૈરભ્યનુજ્ઞાતઃ શક્તિતઃ પ્રતિપૂજયેત્ ॥ ૩.૨૪૩॥

સાર્વવર્ણિકમન્નાદ્યં સંનીયાપ્લાવ્ય વારિણા ।
સમુત્સૃજેદ્ભુક્તવતામગ્રતો વિકિરન્ ભુવિ ॥ ૩.૨૪૪॥

અસંસ્કૃતપ્રમીતાનાં ત્યાગિનાં કુલયોષિતામ્ ।
ઉચ્છિષ્ટં ભાગધેયં સ્યાદ્દર્ભેષુ વિકિરશ્ચ યઃ ॥ ૩.૨૪૫॥

ઉચ્છેષણં ભૂમિગતમજિહ્મસ્યાશઠસ્ય ચ ।
દાસવર્ગસ્ય તત્પિત્ર્યે ભાગધેયં પ્રચક્ષતે ॥ ૩.૨૪૬॥

આસપિણ્ડક્રિયાકર્મ દ્વિજાતેઃ સંસ્થિતસ્ય તુ ।
અદૈવં ભોજયેત્શ્રાદ્ધં પિણ્ડમેકં ચ નિર્વપેત્ ॥ ૩.૨૪૭॥

સહપિણ્ડક્રિયાયાં તુ કૃતાયામસ્ય ધર્મતઃ ।
અનયૈવાવૃતા કાર્યં પિણ્ડનિર્વપનં સુતૈઃ ॥ ૩.૨૪૮॥

શ્રાદ્ધં ભુક્ત્વા ય ઉચ્છિષ્ટં વૃષલાય પ્રયચ્છતિ ।
સ મૂઢો નરકં યાતિ કાલસૂત્રમવાક્શિરાઃ ॥ ૩.૨૪૯॥

શ્રાદ્ધભુગ્વૃષલીતલ્પં તદહર્યોઽધિગચ્છતિ ।
તસ્યાઃ પુરીષે તં માસં પિતરસ્તસ્ય શેરતે ॥ ૩.૨૫૦॥

પૃષ્ટ્વા સ્વદિતમિત્યેવં તૃપ્તાનાચામયેત્તતઃ ।
આચાન્તાંશ્ચાનુજાનીયાદભિતો રમ્યતામિતિ ॥ ૩.૨૫૧॥

સ્વધાઽસ્ત્વિત્યેવ તં બ્રૂયુર્બ્રાહ્મણાસ્તદનન્તરમ્ ।
સ્વધાકારઃ પરા હ્યાશીઃ સર્વેષુ પિતૃકર્મસુ ॥ ૩.૨૫૨॥

તતો ભુક્તવતાં તેષામન્નશેષં નિવેદયેત્ ।
યથા બ્રૂયુસ્તથા કુર્યાદનુજ્ઞાતસ્તતો દ્વિજૈઃ ॥ ૩.૨૫૩॥

પિત્ર્યે સ્વદિતમિત્યેવ વાચ્યં ગોષ્ઠે તુ સુશૃતમ્ ।
સમ્પન્નમિત્યભ્યુદયે દૈવે રુચિતમિત્યપિ ॥ ૩.૨૫૪॥ સમ્પન્નમ્

અપરાહ્ણસ્તથા દર્ભા વાસ્તુસમ્પાદનં તિલાઃ । સમ્પાદનં
સૃષ્ટિર્મૃષ્ટિર્દ્વિજાશ્ચાગ્ર્યાઃ શ્રાદ્ધકર્મસુ સમ્પદઃ ॥ ૩.૨૫૫॥

દર્ભાઃ પવિત્રં પૂર્વાહ્ણો હવિષ્યાણિ ચ સર્વશઃ ।
પવિત્રં યચ્ચ પૂર્વોક્તં વિજ્ઞેયા હવ્યસમ્પદઃ ॥ ૩.૨૫૬॥

મુન્યન્નાનિ પયઃ સોમો માંસં યચ્ચાનુપસ્કૃતમ્ ।
અક્ષારલવણં ચૈવ પ્રકૃત્યા હવિરુચ્યતે ॥ ૩.૨૫૭॥

વિસૃજ્ય બ્રાહ્મણાંસ્તાંસ્તુ નિયતો વાગ્યતઃ શુચિઃ ।
(વિસર્જ્ય બ્રાહ્મનાંસ્તાંસ્તુ પ્રયતો વિધિપૂર્વકમ્)
દક્ષિણાં દિશમાકાઙ્ક્ષન્ યાચેતૈમાન્ વરાન્ પિતૃન્ ॥ ૩.૨૫૮॥

દાતારો નોઽભિવર્ધન્તાં વેદાઃ સંતતિરેવ ચ ।
શ્રદ્ધા ચ નો મા વ્યગમદ્બહુદેયં ચ નોઽસ્ત્વિતિ ॥ ૩.૨૫૯॥

એવં નિર્વપણં કૃત્વા પિણ્ડાંસ્તાંસ્તદનન્તરમ્ ।
ગાં વિપ્રમજમગ્નિં વા પ્રાશયેદપ્સુ વા ક્ષિપેત્ ॥ ૩.૨૬૦॥

પિણ્ડનિર્વપણં કે ચિત્પરસ્તાદેવ કુર્વતે ।
વયોભિઃ ખાદયન્ત્યન્યે પ્રક્ષિપન્ત્યનલેઽપ્સુ વા ॥ ૩.૨૬૧॥

પતિવ્રતા ધર્મપત્ની પિતૃપૂજનતત્પરા ।
મધ્યમં તુ તતઃ પિણ્ડમદ્યાત્સમ્યક્સુતાર્થિની ॥ ૩.૨૬૨॥

આયુષ્મન્તં સુતં સૂતે યશોમેધાસમન્વિતમ્ ।
ધનવન્તં પ્રજાવન્તં સાત્ત્વિકં ધાર્મિકં તથા ॥ ૩.૨૬૩॥

પ્રક્ષાલ્ય હસ્તાવાચામ્ય જ્ઞાતિપ્રાયં પ્રકલ્પયેત્ ।
જ્ઞાતિભ્યઃ સત્કૃતં દત્ત્વા બાન્ધવાનપિ ભોજયેત્ ॥ ૩.૨૬૪॥ દત્વા

ઉચ્છેષણં તુ તત્તિષ્ઠેદ્યાવદ્વિપ્રા વિસર્જિતાઃ । યત્તિષ્ઠેદ્
તતો ગૃહબલિં કુર્યાદિતિ ધર્મો વ્યવસ્થિતઃ ॥ ૩.૨૬૫॥

હવિર્યચ્ચિરરાત્રાય યચ્ચાનન્ત્યાય કલ્પતે ।
પિતૃભ્યો વિધિવદ્દત્તં તત્પ્રવક્ષ્યામ્યશેષતઃ ॥ ૩.૨૬૬॥

તિલૈર્વ્રીહિયવૈર્માષૈરદ્ભિર્મૂલફલેન વા ।
દત્તેન માસં તૃપ્યન્તિ વિધિવત્પિતરો નૃણામ્ ॥ ૩.૨૬૭॥

દ્વૌ માસૌ મત્સ્યમાંસેન ત્રીન્ માસાન્ હારિણેન તુ ।

ઔરભ્રેણાથ ચતુરઃ શાકુનેનાથ પઞ્ચ વૈ ॥ ૩.૨૬૮॥

ષણ્માસાંશ્છાગમાંસેન પાર્ષતેન ચ સપ્ત વૈ ।
અષ્ટાવેનસ્ય માંસેન રૌરવેણ નવૈવ તુ ॥ ૩.૨૬૯॥ ઐણેયમાંસેન

દશમાસાંસ્તુ તૃપ્યન્તિ વરાહમહિષામિષૈઃ ।
શશકૂર્મયોસ્તુ માંસેન માસાનેકાદશૈવ તુ ॥ ૩.૨૭૦॥

સંવત્સરં તુ ગવ્યેન પયસા પાયસેન ચ । સંવત્સરે
વાર્ધ્રીણસસ્ય માંસેન તૃપ્તિર્દ્વાદશવાર્ષિકી ॥ ૩.૨૭૧॥

કાલશાકં મહાશલ્કાઃ ખડ્ગલોહામિષં મધુ ।
આનન્ત્યાયૈવ કલ્પ્યન્તે મુન્યન્નાનિ ચ સર્વશઃ ॥ ૩.૨૭૨॥

યત્કિં ચિન્ મધુના મિશ્રં પ્રદદ્યાત્તુ ત્રયોદશીમ્ ।
તદપ્યક્ષયમેવ સ્યાદ્વર્ષાસુ ચ મઘાસુ ચ ॥ ૩.૨૭૩॥

અપિ નઃ સ કુલે ભૂયાદ્યો નો દદ્યાત્ત્રયોદશીમ્ ।
પાયસં મધુસર્પિર્ભ્યાં પ્રાક્છાયે કુઞ્જરસ્ય ચ ॥ ૩.૨૭૪॥

યદ્યદ્દદાતિ વિધિવત્સમ્યક્શ્રદ્ધાસમન્વિતઃ ।
તત્તત્પિતૃણાં ભવતિ પરત્રાનન્તમક્ષયમ્ ॥ ૩.૨૭૫॥

કૃષ્ણપક્ષે દશમ્યાદૌ વર્જયિત્વા ચતુર્દશીમ્ ।
શ્રાદ્ધે પ્રશસ્તાસ્તિથયો યથૈતા ન તથૈતરાઃ ॥ ૩.૨૭૬॥

યુક્ષુ કુર્વન્ દિનર્ક્ષેષુ સર્વાન્ કામાન્ સમશ્નુતે ।
અયુક્ષુ તુ પિતૄન્ સર્વાન્ પ્રજાં પ્રાપ્નોતિ પુષ્કલામ્ ॥ ૩.૨૭૭॥

યથા ચૈવાપરઃ પક્ષઃ પૂર્વપક્ષાદ્વિશિષ્યતે ।
તથા શ્રાદ્ધસ્ય પૂર્વાહ્ણાદપરાહ્ણો વિશિષ્યતે ॥ ૩.૨૭૮॥

પ્રાચીનાવીતિના સમ્યગપસવ્યમતન્દ્રિણા ।
પિત્ર્યમાનિધનાત્કાર્યં વિધિવદ્દર્ભપાણિના ॥ ૩.૨૭૯॥

રાત્રૌ શ્રાદ્ધં ન કુર્વીત રાક્ષસી કીર્તિતા હિ સા ।
સંધ્યયોરુભયોશ્ચૈવ સૂર્યે ચૈવાચિરોદિતે ॥ ૩.૨૮૦॥

અનેન વિધિના શ્રાદ્ધં ત્રિરબ્દસ્યૈહ નિર્વપેત્ ।
હેમન્તગ્રીષ્મવર્ષાસુ પાઞ્ચયજ્ઞિકમન્વહમ્ ॥ ૩.૨૮૧॥

ન પૈતૃયજ્ઞિયો હોમો લૌકિકેઽગ્નૌ વિધીયતે ।
ન દર્શેન વિના શ્રાદ્ધમાહિતાગ્નેર્દ્વિજન્મનઃ ॥ ૩.૨૮૨॥

યદેવ તર્પયત્યદ્ભિઃ પિતૄન્ સ્નાત્વા દ્વિજોત્તમઃ ।
તેનૈવ કૃત્સ્નમાપ્નોતિ પિતૃયજ્ઞક્રિયાફલમ્ ॥ ૩.૨૮૩॥

વસૂન્ વદન્તિ તુ પિતૄન્ રુદ્રાંશ્ચૈવ પિતામહાન્ ।
પ્રપિતામહાંસ્તથાઽદિત્યાન્ શ્રુતિરેષા સનાતની ॥ ૩.૨૮૪॥

વિઘસાશી ભવેન્નિત્યં નિત્યં વાઽમૃતભોજનઃ ।
વિઘસો ભુક્તશેષં તુ યજ્ઞશેષં તથાઽમૃતમ્ ॥ ૩.૨૮૫॥

એતદ્વોઽભિહિતં સર્વં વિધાનં પાઞ્ચયજ્ઞિકમ્ ।
દ્વિજાતિમુખ્યવૃત્તીનાં વિધાનં શ્રૂયતામિતિ ॥ ૩.૨૮૬॥

## અધ્યાય ૪

ચતુર્થમાયુષો ભાગમુષિત્વાઽદ્યં ગુરૌ દ્વિજાઃ ।
દ્વિતીયમાયુષો ભાગં કૃતદારો ગૃહે વસેત્ ॥ ૪.૧॥

અદ્રોહેણૈવ ભૂતાનામલ્પદ્રોહેણ વા પુનઃ ।
યા વૃત્તિસ્તાં સમાસ્થાય વિપ્રો જીવેદનાપદિ ॥ ૪.૨॥

યાત્રામાત્રપ્રસિદ્ધ્યર્થં સ્વૈઃ કર્મભિરગર્હિતૈઃ ।
અક્લેશેન શરીરસ્ય કુર્વીત ધનસઞ્ચયમ્ ॥ ૪.૩॥

ઋતામૃતાભ્યાં જીવેત્તુ મૃતેન પ્રમૃતેન વા ।
સત્યાનૃતાભ્યામપિ વા ન શ્વવૃત્ત્યા કદા ચન ॥ ૪.૪॥

ઋતમુઞ્છશિલં જ્ઞેયમમૃતં સ્યાદયાચિતમ્ ।
મૃતં તુ યાચિતં ભૈક્ષં પ્રમૃતં કર્ષણં સ્મૃતમ્ ॥ ૪.૫॥

સત્યાનૃતં તુ વાણિજ્યં તેન ચૈવાપિ જીવ્યતે ।
સેવા શ્વવૃત્તિરાખ્યાતા તસ્માત્તાં પરિવર્જયેત્ ॥ ૪.૬॥

કુસૂલધાન્યકો વા સ્યાત્કુમ્ભીધાન્યક એવ વા ।
ત્ર્યહેહિકો વાઽપિ ભવેદશ્વસ્તનિક એવ વા ॥ ૪.૭॥

ચતુર્ણામપિ ચૈતેષાં દ્વિજાનાં ગૃહમેધિનામ્ ।
જ્યાયાન્ પરઃ પરો જ્ઞેયો ધર્મતો લોકજિત્તમઃ ॥ ૪.૮॥

ષટ્કર્મૈકો ભવત્યેષાં ત્રિભિરન્યઃ પ્રવર્તતે ।
દ્વાભ્યામેકશ્ચતુર્થસ્તુ બ્રહ્મસત્રેણ જીવતિ ॥ ૪.૯॥

વર્તયંશ્ચ શિલૌઞ્છાભ્યામગ્નિહોત્રપરાયણઃ ।
ઇષ્ટીઃ પાર્વાયણાન્તીયાઃ કેવલા નિર્વપેત્સદા ॥ ૪.૧૦॥

ન લોકવૃત્તં વર્તેત વૃત્તિહેતોઃ કથં ચન ।
અજિહ્મામશઠાં શુદ્ધાં જીવેદ્બ્રાહ્મણજીવિકામ્ ॥ ૪.૧૧॥

સંતોષં પરમાસ્થાય સુખાર્થી સંયતો ભવેત્ ।
સંતોષમૂલં હિ સુખં દુઃખમૂલં વિપર્યયઃ ॥ ૪.૧૨॥

અતોઽન્યતમયા વૃત્ત્યા જીવંસ્તુ સ્નાતકો દ્વિજઃ ।
સ્વર્ગાયુષ્યયશસ્યાનિ વ્રતાણીમાનિ ધારયેત્ ॥ ૪.૧૩॥ સ્વર્ગ્યાયુષ્ય

વેદોદિતં સ્વકં કર્મ નિત્યં કુર્યાદતન્દ્રિતઃ ।
તદ્ધિ કુર્વન્ યથાશક્તિ પ્રાપ્નોતિ પરમાં ગતિમ્ ॥ ૪.૧૪॥

નેહેતાર્થાન્ પ્રસઙ્ગેન ન વિરુદ્ધેન કર્મણા ।
ન વિદ્યમાનેષ્વર્થેષુ નાર્ત્યામપિ યતસ્તતઃ ॥ ૪.૧૫॥ ન કલ્પમાનેષ્વર્થેષુ

ઇન્દ્રિયાર્થેષુ સર્વેષુ ન પ્રસજ્યેત કામતઃ ।
અતિપ્રસક્તિં ચૈતેષાં મનસા સંનિવર્તયેત્ ॥ ૪.૧૬॥

સર્વાન્ પરિત્યજેદર્થાન્ સ્વાધ્યાયસ્ય વિરોધિનઃ ।
યથા તથાઽધ્યાપયંસ્તુ સા હ્યસ્ય કૃતકૃત્યતા ॥ ૪.૧૭॥

વયસઃ કર્મણોઽર્થસ્ય શ્રુતસ્યાભિજનસ્ય ચ ।
વેષવાગ્બુદ્ધિસારૂપ્યમાચરન્ વિચરેદિહ ॥ ૪.૧૮॥

બુદ્ધિવૃદ્ધિકરાણ્યાશુ ધન્યાનિ ચ હિતાનિ ચ ।
નિત્યં શાસ્ત્રાણ્યવેક્ષેત નિગમાંશ્ચૈવ વૈદિકાન્ ॥ ૪.૧૯॥

યથા યથા હિ પુરુષઃ શાસ્ત્રં સમધિગચ્છતિ ।
તથા તથા વિજાનાતિ વિજ્ઞાનં ચાસ્ય રોચતે ॥ ૪.૨૦॥

ઋષિયજ્ઞં દેવયજ્ઞં ભૂતયજ્ઞં ચ સર્વદા ।
નૃયજ્ઞં પિતૃયજ્ઞં ચ યથાશક્તિ ન હાપયેત્ ॥ ૪.૨૧॥

એતાનેકે મહાયજ્ઞાન્ યજ્ઞશાસ્ત્રવિદો જનાઃ ।

અનીહમાનાઃ સતતમિન્દ્રિયેષ્વેવ જુહ્વતિ ॥ ૪.૨૨॥

વાચ્યેકે જુહ્વતિ પ્રાણં પ્રાણે વાચં ચ સર્વદા ।
વાચિ પ્રાણે ચ પશ્યન્તો યજ્ઞનિર્વૃત્તિમક્ષયામ્ ॥ ૪.૨૩॥

જ્ઞાનેનૈવાપરે વિપ્રા યજન્ત્યેતૈર્મખૈઃ સદા । યજન્તે તૈર્મખૈઃ સદા
જ્ઞાનમૂલાં ક્રિયામેષાં પશ્યન્તો જ્ઞાનચક્ષુષા ॥ ૪.૨૪॥

અગ્નિહોત્રં ચ જુહુયાદાદ્યન્તે દ્યુનિશોઃ સદા ।
દર્શેન ચાર્ધમાસાન્તે પૌર્ણમાસેન ચૈવ હિ ॥ ૪.૨૫॥

સસ્યાન્તે નવસસ્યેષ્ટ્યા તથાર્તુઅન્તે દ્વિજોઽધ્વરૈઃ ।
પશુના ત્વયનસ્યાદૌ સમાન્તે સૌમિકૈર્મખૈઃ ॥ ૪.૨૬॥ અયનાન્તે તુ સમાંતે

નાનિષ્ટ્વા નવસસ્યેષ્ટ્યા પશુના ચાગ્નિમાન્ દ્વિજઃ ।
નવાન્નમદ્યાત્માંસં વા દીર્ઘમાયુર્જિજીવિષુઃ ॥ ૪.૨૭॥

નવેનાનર્ચિતા હ્યસ્ય પશુહવ્યેન ચાગ્નયઃ ।
પ્રાણાનેવાત્તુમિચ્છન્તિ નવાન્નામિષગર્ધિનઃ ॥ ૪.૨૮॥

આસનાશનશય્યાભિરદ્ભિર્મૂલફલેન વા ।
નાસ્ય કશ્ચિદ્વસેદ્ગેહે શક્તિતોઽનર્ચિતોઽતિથિઃ ॥ ૪.૨૯॥

પાષણ્ડિનો વિકર્મસ્થાન્ બૈડાલવ્રતિકાન્ શઠાન્ ।
હૈતુકાન્ બકવૃત્તીંશ્ચ વાઙ્માત્રેણાપિ નાર્ચયેત્ ॥ ૪.૩૦॥

વેદવિદ્યાવ્રતસ્નાતાંશ્રોત્રિયાન્ ગૃહમેધિનઃ ।
પૂજયેધવ્યકવ્યેન વિપરીતાંશ્ચ વર્જયેત્ ॥ ૪.૩૧॥

શક્તિતોઽપચમાનેભ્યો દાતવ્યં ગૃહમેધિના ।
સંવિભાગશ્ચ ભૂતેભ્યઃ કર્તવ્યોઽનુપરોધતઃ ॥ ૪.૩૨॥

રાજતો ધનમન્વિચ્છેત્સંસીદન્ સ્નાતકઃ ક્ષુધા ।
યાજ્યાન્તેવાસિનોર્વાઽપિ ન ત્વન્યત ઇતિ સ્થિતિઃ ॥ ૪.૩૩॥

ન સીદેત્સ્નાતકો વિપ્રઃ ક્ષુધા શક્તઃ કથં ચન ।
ન જીર્ણમલવદ્વાસા ભવેચ્ચ વિભવે સતિ ॥ ૪.૩૪॥

કૢપ્તકેશનખશ્મશ્રુર્દાન્તઃ શુક્લામ્બરઃ શુચિઃ ।
સ્વાધ્યાયે ચૈવ યુક્તઃ સ્યાન્નિત્યમાત્મહિતેષુ ચ ॥ ૪.૩૫॥

વૈણવીં ધારયેદ્યષ્ટિં સોદકં ચ કમણ્ડલુમ્ ।
યજ્ઞોપવીતં વેદં ચ શુભં રૌક્મે ચ કુણ્ડલે ॥ ૪.૩૬॥

નેક્ષેતોદ્યન્તમાદિત્યં નાસ્તં યાન્તં કદા ચન ।
નોપસૃષ્ટં ન વારિસ્થં ન મધ્યં નભસો ગતમ્ ॥ ૪.૩૭॥

ન લઙ્ઘયેદ્વત્સતન્ત્રીં ન પ્રધાવેચ્ચ વર્ષતિ ।
ન ચોદકે નિરીક્ષેત સ્વરૂપમિતિ ધારણા ॥ ૪.૩૮॥

મૃદં ગાં દૈવતં વિપ્રં ઘૃતં મધુ ચતુષ્પથમ્ ।
પ્રદક્ષિણાનિ કુર્વીત પ્રજ્ઞાતાંશ્ચ વનસ્પતીન્ ॥ ૪.૩૯॥

નોપગચ્છેત્પ્રમત્તોઽપિ સ્ત્રિયમાર્તવદર્શને ।
સમાનશયને ચૈવ ન શયીત તયા સહ ॥ ૪.૪૦॥

રજસાઽભિપ્લુતાં નારીં નરસ્ય હ્યુપગચ્છતઃ ।
પ્રજ્ઞા તેજો બલં ચક્ષુરાયુશ્ચૈવ પ્રહીયતે ॥ ૪.૪૧॥

તાં વિવર્જયતસ્તસ્ય રજસા સમભિપ્લુતામ્ ।
પ્રજ્ઞા તેજો બલં ચક્ષુરાયુશ્ચૈવ પ્રવર્ધતે ॥ ૪.૪૨॥

નાશ્નીયાદ્ભાર્યયા સાર્ધં નૈનામીક્ષેત ચાશ્નતીમ્ ।
ક્ષુવતીં જૃમ્ભમાણાં વા ન ચાસીનાં યથાસુખમ્ ॥ ૪.૪૩॥

નાઞ્જયન્તીં સ્વકે નેત્રે ન ચાભ્યક્તામનાવૃતામ્ ।
ન પશ્યેત્પ્રસવન્તીં ચ તેજસ્કામો દ્વિજોત્તમઃ ॥ ૪.૪૪॥

નાન્નમદ્યાદેકવાસા ન નગ્નઃ સ્નાનમાચરેત્ ।
ન મૂત્રં પથિ કુર્વીત ન ભસ્મનિ ન ગોવ્રજે ॥ ૪.૪૫॥

ન ફાલકૃષ્ટે ન જલે ન ચિત્યાં ન ચ પર્વતે ।
ન જીર્ણદેવાયતને ન વલ્મીકે કદા ચન ॥ ૪.૪૬॥

ન સસત્ત્વેષુ ગર્તેષુ ન ગચ્છન્નપિ ન સ્થિતઃ ।
ન નદીતીરમાસાદ્ય ન ચ પર્વતમસ્તકે ॥ ૪.૪૭॥

વાયુઅગ્નિવિપ્રમાદિત્યમપઃ પશ્યંસ્તથૈવ ગાઃ ।
ન કદા ચન કુર્વીત વિણ્મૂત્રસ્ય વિસર્જનમ્ ॥ ૪.૪૮॥

તિરસ્કૃત્યોચ્ચરેત્કાષ્ઠલોષ્ઠપત્રતૃણાદિના । તૃણાદિ ચ
નિયમ્ય પ્રયતો વાચં સંવીતાઙ્ગોઽવગુણ્ઠિતઃ ॥ ૪.૪૯॥

મૂત્રોચ્ચારસમુત્સર્ગં દિવા કુર્યાદુદઙ્મુખઃ ।
દક્ષિણાઽભિમુખો રાત્રૌ સંધ્યાયોશ્ચ યથા દિવા ॥ ૪.૫૦॥

છાયાયામન્ધકારે વા રાત્રાવહનિ વા દ્વિજઃ ।
યથાસુખમુખઃ કુર્યાત્પ્રાણબાધભયેષુ ચ ॥ ૪.૫૧॥

પ્રત્યગ્નિં પ્રતિસૂર્યં ચ પ્રતિસોમોદકદ્વિજમ્ ।
પ્રતિગુ પ્રતિવાતં ચ પ્રજ્ઞા નશ્યતિ મેહતઃ ॥ ૪.૫૨॥ પ્રતિગાં પ્રતિવાતં

નાગ્નિં મુખેનોપધમેન્નગ્નાં નૈક્ષેત ચ સ્ત્રિયમ્ ।
નામેધ્યં પ્રક્ષિપેદગ્નૌ ન ચ પાદૌ પ્રતાપયેત્ ॥ ૪.૫૩॥

અધસ્તાન્નોપદધ્યાચ્ચ ન ચૈનમભિલઙ્ઘયેત્ ।
ન ચૈનં પાદતઃ કુર્યાન્ન પ્રાણાબાધમાચરેત્ ॥ ૪.૫૪॥

નાશ્નીયાત્સંધિવેલાયાં ન ગચ્છેન્નાપિ સંવિશેત્ ।
ન ચૈવ પ્રલિખેદ્ભૂમિં નાત્મનોઽપહરેત્સ્રજમ્ ॥ ૪.૫૫॥

નાપ્સુ મૂત્રં પુરીષં વા ષ્ઠીવનં વા સમુત્સૃજેત્ ।
અમેધ્યલિપ્તમન્યદ્વા લોહિતં વા વિષાણિ વા ॥ ૪.૫૬॥

નૈકઃ સુપ્યાત્શૂન્યગેહે ન શ્રેયાંસં પ્રબોધયેત્ । શૂન્યગૃહે સ્વપ્યાન્
નોદક્યયાઽભિભાષેત યજ્ઞં ગચ્છેન્ન ચાવૃતઃ ॥ ૪.૫૭॥

અગ્ન્યગારે ગવાં ગોષ્ઠે બ્રાહ્મણાનાં ચ સંનિધૌ ।
સ્વાધ્યાયે ભોજને ચૈવ દક્ષિણં પાણિમુદ્ધરેત્ ॥ ૪.૫૮॥

ન વારયેદ્ગાં ધયન્તીં ન ચાચક્ષીત કસ્ય ચિત્ ।
ન દિવીન્દ્રાયુધં દૃષ્ટ્વા કસ્ય ચિદ્દર્શયેદ્બુધઃ ॥ ૪.૫૯॥

નાધર્મિકે વસેદ્ગ્રામે ન વ્યાધિબહુલે ભૃશમ્ ।
નૈકઃ પ્રપદ્યેતાધ્વાનં ન ચિરં પર્વતે વસેત્ ॥ ૪.૬૦॥

ન શૂદ્રરાજ્યે નિવસેન્નાધાર્મિકજનાવૃતે ।
ન પાષણ્ડિગણાક્રાન્તે નોપસ્સૃષ્ટેઽન્ત્યજૈર્નૃભિઃ ॥ ૪.૬૧॥

ન ભુઞ્જીતોદ્ધૃતસ્નેહં નાતિસૌહિત્યમાચરેત્ ॥

નાતિપ્રગે નાતિસાયં ન સાયં પ્રાતરાશિતઃ ॥ ૪.૬૨॥

ન કુર્વીત વૃથાચેષ્ટાં ન વાર્યઞ્જલિના પિબેત્ ।
નોત્સઙ્ગે ભક્ષયેદ્ભક્ષ્યાન્ન જાતુ સ્યાત્કુતૂહલી ॥ ૪.૬૩॥

ન નૃત્યેદથ વા ગાયેન્ન વાદિત્રાણિ વાદયેત્ । ન નૃત્યેન્નૈવ ગાયેચ્ચ ન વાદિત્રાણિ વાદયેત્)
નાસ્ફોટયેન્ન ચ ક્ષ્વેડેન્ન ચ રક્તો વિરાવયેત્ ॥ ૪.૬૪॥ ન ચ રક્તો વિરોધયેત્

ન પાદૌ ધાવયેત્કાંસ્યે કદા ચિદપિ ભાજને ।
ન ભિન્નભાણ્ડે ભુઞ્જીત ન ભાવપ્રતિદૂષિતે ॥ ૪.૬૫॥

ઉપાનહૌ ચ વાસશ્ચ ધૃતમન્યૈર્ન ધારયેત્ ।
ઉપવીતમલઙ્કારં સ્રજં કરકમેવ ચ ॥ ૪.૬૬॥

નાવિનીતૈર્ભજેદ્ધુર્યૈર્ન ચ ક્ષુધ્વ્યાધિપીડિતૈઃ । નાવિનીતૈર્વ્રજેદ્)
ન ભિન્નશ ૃઙ્ગાક્ષિખુરૈર્ન વાલધિવિરૂપિતૈઃ ॥ ૪.૬૭॥

વિનીતૈસ્તુ વ્રજેન્નિત્યમાશુગૈર્લક્ષણાન્વિતૈઃ ।
વર્ણરૂપોપસમ્પન્નૈઃ પ્રતોદેનાતુદન્ ભૃશમ્ ॥ ૪.૬૮॥ પ્રતોદેનાક્ષિપન્

બાલાતપઃ પ્રેતધૂમો વર્જ્યં ભિન્નં તથાઽસનમ્ ।
ન છિન્દ્યાન્નખરોમાણિ દન્તૈર્નોત્પાટયેન્નખાન્ ॥ ૪.૬૯॥ ન ચ્છિન્દ્યાન્

ન મૃત્લોષ્ઠં ચ મૃદ્નીયાન્ન છિન્દ્યાત્કરજૈસ્તૃણમ્ । ચ્છિન્દ્યાત્
ન કર્મ નિષ્ફલં કુર્યાન્નાયત્યામસુખોદયમ્ ॥ ૪.૭૦॥

લોષ્ઠમર્દી તૃણચ્છેદી નખખાદી ચ યો નરઃ ।
સ વિનાશં વ્રજત્યાશુ સૂચકાઽશુચિરેવ ચ ॥ ૪.૭૧॥ સૂચકોઽશુચિરેવ ચ

ન વિગર્હ્ય કથાં કુર્યાદ્બહિર્માલ્યં ન ધારયેત્ । ન વિગૃહ્ય કથાં કુર્યાદ્
ગવાં ચ યાનં પૃષ્ઠેન સર્વથૈવ વિગર્હિતમ્ ॥ ૪.૭૨॥

અદ્વારેણ ચ નાતીયાદ્ગ્રામં વા વેશ્મ વાઽવૃતમ્ ।
રાત્રૌ ચ વૃક્ષમૂલાનિ દૂરતઃ પરિવર્જયેત્ ॥ ૪.૭૩॥

નાક્ષૈર્દીવ્યેત્કદા ચિત્તુ સ્વયં નોપાનહૌ હરેત્ ।
શયનસ્થો ન ભુઞ્જીત ન પાણિસ્થં ન ચાસને ॥ ૪.૭૪॥

સર્વં ચ તિલસમ્બદ્ધં નાદ્યાદસ્તમિતે રવૌ ।
ન ચ નગ્નઃ શયીતેહ ન ચોચ્છિષ્ટઃ ક્વ ચિદ્વ્રજેત્ ॥ ૪.૭૫॥

આર્દ્રપાદસ્તુ ભુઞ્જીત નાર્દ્રપાદસ્તુ સંવિશેત્ ।
આર્દ્રપાદસ્તુ ભુઞ્જાનો દીર્ઘમાયુરવાપ્નુયાત્ ॥ ૪.૭૬॥

અચક્ષુર્વિષયં દુર્ગં ન પ્રપદ્યેત કર્હિ ચિત્ ।
ન વિણ્મૂત્રમુદીક્ષેત ન બાહુભ્યાં નદીં તરેત્ ॥ ૪.૭૭॥

અધિતિષ્ઠેન્ન કેશાંસ્તુ ન ભસ્માસ્થિકપાલિકાઃ ।
ન કાર્પાસાસ્થિ ન તુષાન્ દીર્ઘમાયુર્જિજીવિષુઃ ॥ ૪.૭૮॥

ન સંવસેચ્ચ પતિતૈર્ન ચાણ્ડાલૈર્ન પુલ્કસૈઃ ।
ન મૂર્ખૈર્નાવલિપ્તૈશ્ચ નાન્ત્યૈર્નાન્ત્યાવસાયિભિઃ ॥ ૪.૭૯॥

ન શૂદ્રાય મતિં દદ્યાન્નોચ્છિષ્ટં ન હવિષ્કૃતમ્ ।
ન ચાસ્યોપદિશેદ્ધર્મં ન ચાસ્ય વ્રતમાદિશેત્ ॥ ૪.૮૦॥

યો હ્યસ્ય ધર્મમાચષ્ટે યશ્ચૈવાદિશતિ વ્રતમ્ ।
સોઽસંવૃતં નામ તમઃ સહ તેનૈવ મજ્જતિ ॥ ૪.૮૧॥

ન સંહતાભ્યાં પાણિભ્યાં કણ્ડૂયેદાત્મનઃ શિરઃ ।
ન સ્પૃશેચ્ચૈતદુચ્છિષ્ટો ન ચ સ્નાયાદ્વિના તતઃ ॥ ૪.૮૨॥

કેશગ્રહાન્ પ્રહારાંશ્ચ શિરસ્યેતાન્ વિવર્જયેત્ ।
શિરઃસ્નાતશ્ચ તૈલેન નાઙ્ગં કિં ચિદપિ સ્પૃશેત્ ॥ ૪.૮૩॥

ન રાજ્ઞઃ પ્રતિગૃહ્ણીયાદરાજન્યપ્રસૂતિતઃ ।
સૂનાચક્રધ્વજવતાં વેશેનૈવ ચ જીવતામ્ ॥ ૪.૮૪॥

દશસૂનાસમં ચક્રં દશચક્રસમો ધ્વજઃ ।
દશધ્વજસમો વેશો દશવેશસમો નૃપઃ ॥ ૪.૮૫॥

દશ સૂણાસહસ્રાણિ યો વાહયતિ સૌનિકઃ ।
તેન તુલ્યઃ સ્મૃતો રાજા ઘોરસ્તસ્ય પ્રતિગ્રહઃ ॥ ૪.૮૬॥

યો રાજ્ઞઃ પ્રતિગૃહ્ણાતિ લુબ્ધસ્યોચ્છાસ્ત્રવર્તિનઃ ।
સ પર્યાયેણ યાતીમાન્નરકાનેકવિંશતિમ્ ॥ ૪.૮૭॥

તામિસ્રમન્ધતામિસ્રં મહારૌરવરૌરવૌ ।
નરકં કાલસૂત્રં ચ મહાનરકમેવ ચ ॥ ૪.૮૮॥

સઞ્જીવનં મહાવીચિં તપનં સમ્પ્રતાપનમ્ ।
સંહાતં ચ સકાકોલં કુડ્મલં પ્રતિમૂર્તિકમ્ ॥ ૪.૮૯॥ પૂતિમૃત્તિકં

લોહશઙ્કું ઋજીષં ચ પન્થાનં શાલ્મલીં નદીમ્ ।

અસિપત્રવનં ચૈવ લોહદારકમેવ ચ ॥ ૪.૯૦॥

એતદ્વિદન્તો વિદ્વાંસો બ્રાહ્મણા બ્રહ્મવાદિનઃ ।
ન રાજ્ઞઃ પ્રતિગૃહ્ણન્તિ પ્રેત્ય શ્રેયોઽભિકાઙ્ક્ષિણઃ ॥ ૪.૯૧॥

બ્રાહ્મે મુહૂર્તે બુધ્યેત ધર્માર્થૌ ચાનુચિન્તયેત્ ।
કાયક્લેશાંશ્ચ તન્મૂલાન્ વેદતત્ત્વાર્થમેવ ચ ॥ ૪.૯૨॥

ઉત્થાયાવશ્યકં કૃત્વા કૃતશૌચઃ સમાહિતઃ ।
પૂર્વાં સંધ્યાં જપંસ્તિષ્ઠેત્સ્વકાલે ચાપરાં ચિરમ્ ॥ ૪.૯૩॥

ઋષયો દીર્ઘસંધ્યત્વાદ્દીર્ઘમાયુરવાપ્નુયુઃ ।
પ્રજ્ઞાં યશશ્ચ કીર્તિં ચ બ્રહ્મવર્ચસમેવ ચ ॥ ૪.૯૪॥

શ્રાવણ્યાં પ્રૌષ્ઠપદ્યાં વાઽપ્યુપાકૃત્ય યથાવિધિ ।
યુક્તશ્છન્દાંસ્યધીયીત માસાન્ વિપ્રોઽર્ધપઞ્ચમાન્ ॥ ૪.૯૫॥

પુષ્યે તુ છન્દસાં કુર્યાદ્બહિરુત્સર્જનં દ્વિજઃ ।
માઘશુક્લસ્ય વા પ્રાપ્તે પૂર્વાહ્ણે પ્રથમેઽહનિ ॥ ૪.૯૬॥

યથાશાસ્ત્રં તુ કૃત્વૈવમુત્સર્ગં છન્દસાં બહિઃ ।
વિરમેત્પક્ષિણીં રાત્રિં તદેવૈકમહર્નિશમ્ ॥ ૪.૯૭॥

અત ઊર્ધ્વં તુ છન્દાંસિ શુક્લેષુ નિયતઃ પઠેત્ ।
વેદાઙ્ગાનિ ચ સર્વાણિ કૃષ્ણપક્ષેષુ સમ્પઠેત્ ॥ ૪.૯૮॥

નાવિસ્પષ્ટમધીયીત ન શૂદ્રજનસન્નિધૌ ।
ન નિશાન્તે પરિશ્રાન્તો બ્રહ્માધીત્ય પુનઃ સ્વપેત્ ॥ ૪.૯૯॥

યથોદિતેન વિધિના નિત્યં છન્દસ્કૃતં પઠેત્ ।
બ્રહ્મ છન્દસ્કૃતં ચૈવ દ્વિજો યુક્તો હ્યનાપદિ ॥ ૪.૧૦૦॥

ઇમાન્નિત્યમનધ્યાયાનધીયાનો વિવર્જયેત્ ।
અધ્યાપનં ચ કુર્વાણઃ શિષ્યાણાં વિધિપૂર્વકમ્ ॥ ૪.૧૦૧॥

કર્ણશ્રવેઽનિલે રાત્રૌ દિવા પાંસુસમૂહને ।
એતૌ વર્ષાસ્વનધ્યાયાવધ્યાયજ્ઞાઃ પ્રચક્ષતે ॥ ૪.૧૦૨॥

વિદ્યુત્સ્તનિતવર્ષેષુ મહોલ્કાનાં ચ સમ્પ્લવે ।
આકાલિકમનધ્યાયમેતેષુ મનુરબ્રવીત્ ॥ ૪.૧૦૩॥

એતાંસ્ત્વભ્યુદિતાન્ વિદ્યાદ્યદા પ્રાદુષ્કૃતાગ્નિષુ ।
તદા વિદ્યાદનધ્યાયમનૃતૌ ચાભ્રદર્શને ॥ ૪.૧૦૪॥

નિર્ઘાતે ભૂમિચલને જ્યોતિષાં ચોપસર્જને ।
એતાનાકાલિકાન્ વિદ્યાદનધ્યાયાન્ ઋતાવપિ ॥ ૪.૧૦૪॥

પ્રાદુષ્કૃતેષ્વગ્નિષુ તુ વિદ્યુત્સ્તનિતનિઃસ્વને ।
સજ્યોતિઃ સ્યાદનધ્યાયઃ શેષે રાત્રૌ યથા દિવા ॥ ૪.૧૦૬॥

નિત્યાનધ્યાય એવ સ્યાદ્ગ્રામેષુ નગરેષુ ચ ।
ધર્મનૈપુણ્યકામાનાં પૂતિગન્ધે ચ સર્વદા ॥ ૪.૧૦૭॥ સર્વશઃ

અન્તર્ગતશવે ગ્રામે વૃષલસ્ય ચ સન્નિધૌ ।
અનધ્યાયો રુદ્યમાને સમવાયે જનસ્ય ચ ॥ ૪.૧૦૮॥

ઉદકે મધ્યરાત્રે ચ વિણ્મૂત્રસ્ય વિસર્જને ।
ઉચ્છિષ્ટઃ શ્રાદ્ધભુક્ચૈવ મનસાઽપિ ન ચિન્તયેત્ ॥ ૪.૧૦૯॥

પ્રતિગૃહ્ય દ્વિજો વિદ્વાનેકોદ્દિષ્ટસ્ય કેતનમ્ । એકોદ્દિષ્ટનિકેતનમ્
ત્ર્યહં ન કીર્તયેદ્બ્રહ્મ રાજ્ઞો રાહોશ્ચ સૂતકે ॥ ૪.૧૧૦॥

યાવદેકાનુદિષ્ટસ્ય ગન્ધો લેપશ્ચ તિષ્ઠતિ ।
વિપ્રસ્ય વિદુષો દેહે તાવદ્બ્રહ્મ ન કીર્તયેત્ ॥ ૪.૧૧૧॥

શયાનઃ પ્રૌઢપાદશ્ચ કૃત્વા ચૈવાવસક્થિકામ્ ।
નાધીયીતામિષં જગ્ધ્વા સૂતકાન્નાદ્યમેવ ચ ॥ ૪.૧૧૨॥

નીહારે બાણશબ્દે ચ સંધ્યયોરેવ ચોભયોઃ ।
અમાવાસ્યાચતુર્દશ્યોઃ પૌર્ણમાસ્ય્ઽષ્ટકાસુ ચ ॥ ૪.૧૧૩॥

અમાવાસ્યા ગુરું હન્તિ શિષ્યં હન્તિ ચતુર્દશી ।
બ્રહ્માષ્ટકપૌર્ણમાસ્યૌ તસ્માત્તાઃ પરિવર્જયેત્ ॥ ૪.૧૧૪॥

પાંસુવર્ષે દિશાં દાહે ગોમાયુવિરુતે તથા ।
શ્વખરોષ્ટ્રે ચ રુવતિ પઙ્ક્તૌ ચ ન પઠેદ્દ્વિજઃ ॥ ૪.૧૧૫॥

નાધીયીત શ્મશાનાન્તે ગ્રામાન્તે ગોવ્રજેઽપિ વા ।
વસિત્વા મૈથુનં વાસઃ શ્રાદ્ધિકં પ્રતિગૃહ્ય ચ ॥ ૪.૧૧૬॥

પ્રાણિ વા યદિ વાઽપ્રાણિ યત્કિં ચિત્શ્રાદ્ધિકં ભવેત્ ।
તદાલભ્યાપ્યનધ્યાયઃ પાણ્યાસ્યો હિ દ્વિજઃ સ્મૃતઃ ॥ ૪.૧૧૭॥

ચોરૈરુપદ્રુતે ગ્રામે સમ્ભ્રમે ચાગ્નિકારિતે ।  ચોરૈરુપપ્લુતે સમ્ભ્રમે
આકાલિકમનધ્યાયં વિદ્યાત્સર્વાદ્ભુતેષુ ચ ॥ ૪.૧૧૮॥

ઉપાકર્મણિ ચોત્સર્ગે ત્રિરાત્રં ક્ષેપણં સ્મૃતમ્ ।
અષ્ટકાસુ ત્વહોરાત્રં ઋત્વન્તાસુ ચ રાત્રિષુ ॥ ૪.૧૧૯॥

નાધીયીતાશ્વમારૂઢો ન વૃક્ષં ન ચ હસ્તિનમ્ ।
ન નાવં ન ખરં નોષ્ટ્રં નૈરિણસ્થો ન યાનગઃ ॥ ૪.૧૨૦॥

ન વિવાદે ન કલહે ન સેનાયાં ન સઙ્ગરે ।
ન ભુક્તમાત્રે નાજીર્ણે ન વમિત્વા ન શુક્તકે ॥ ૪.૧૨૧॥

અતિથિં ચાનનુજ્ઞાપ્ય મારુતે વાતિ વા ભૃશમ્ ।
રુધિરે ચ સ્રુતે ગાત્રાત્શસ્ત્રેણ ચ પરિક્ષતે ॥ ૪.૧૨૨॥

સામધ્વનાવૃગ્યજુષી નાધીયીત કદા ચન ।
વેદસ્યાધીત્ય વાઽપ્યન્તમારણ્યકમધીત્ય ચ ॥ ૪.૧૨૩॥

ઋગ્વેદો દેવદૈવત્યો યજુર્વેદસ્તુ માનુષઃ ।
સામવેદઃ સ્મૃતઃ પિત્ર્યસ્તસ્માત્તસ્યાશુચિર્ધ્વનિઃ ॥ ૪.૧૨૪॥

એતદ્વિદન્તો વિદ્વાંસસ્ત્રયીનિષ્કર્ષમન્વહમ્ ।
ક્રમતઃ પૂર્વમભ્યસ્ય પશ્ચાદ્વેદમધીયતે ॥ ૪.૧૨૫॥

પશુમણ્ડૂકમાર્જારશ્વસર્પનકુલાખુભિઃ ।
અન્તરાગમને વિદ્યાદનધ્યાયમહર્નિશમ્ ॥ ૪.૧૨૬॥

દ્વાવેવ વર્જયેન્નિત્યમનધ્યાયૌ પ્રયત્નતઃ ।
સ્વાધ્યાયભૂમિં ચાશુદ્ધમાત્માનં ચાશુચિં દ્વિજઃ ॥ ૪.૧૨૭॥

અમાવાસ્યામષ્ટમીં ચ પૌર્ણમાસીં ચતુર્દશીમ્ ।
બ્રહ્મચારી ભવેન્નિત્યમપ્યર્તૌ સ્નાતકો દ્વિજઃ ॥ ૪.૧૨૮॥

ન સ્નાનમાચરેદ્ભુક્ત્વા નાતુરો ન મહાનિશિ ।
ન વાસોભિઃ સહાજસ્રં નાવિજ્ઞાતે જલાશયે ॥ ૪.૧૨૯॥

દેવતાનાં ગુરો રાજ્ઞઃ સ્નાતકાચાર્યયોસ્તથા ।
નાક્રામેત્કામતશ્છાયાં બભ્રુણો દીક્ષિતસ્ય ચ ॥ ૪.૧૩૦॥

મધ્યંદિનેઽર્ધરાત્રે ચ શ્રાદ્ધં ભુક્ત્વા ચ સામિષમ્ ।

સંધ્યયોરુભયોશ્ચૈવ ન સેવેત ચતુષ્પથમ્ ॥ ૪.૧૩૧॥

ઉદ્વર્તનમપસ્નાનં વિણ્મૂત્રે રક્તમેવ ચ ।
શ્લેશ્મનિષ્ઠ્યૂતવાન્તાનિ નાધિતિષ્ઠેત્તુ કામતઃ ॥ ૪.૧૩૨॥

વૈરિણં નોપસેવેત સહાયં ચૈવ વૈરિણઃ ।
અધાર્મિકં તસ્કરં ચ પરસ્યૈવ ચ યોષિતમ્ ॥ ૪.૧૩૩॥

ન હીદૃશમનાયુષ્યં લોકે કિં ચન વિદ્યતે ।
યાદૃશં પુરુષસ્યેહ પરદારોપસેવનમ્ ॥ ૪.૧૩૪॥

ક્ષત્રિયં ચૈવ સર્પં ચ બ્રાહ્મણં ચ બહુશ્રુતમ્ ।
નાવમન્યેત વૈ ભૂષ્ણુઃ કૃશાનપિ કદા ચન ॥ ૪.૧૩૫॥

એતત્ત્રયં હિ પુરુષં નિર્દહેદવમાનિતમ્ ।
તસ્માદેતત્ત્રયં નિત્યં નાવમન્યેત બુદ્ધિમાન્ ॥ ૪.૧૩૬॥

નાત્માનમવમન્યેત પુર્વાભિરસમૃદ્ધિભિઃ ।
આ મૃત્યોઃ શ્રિયમન્વિચ્છેન્નૈનાં મન્યેત દુર્લભામ્ ॥ ૪.૧૩૭॥

સત્યં બ્રૂયાત્પ્રિયં બ્રૂયાન્ન બ્રૂયાત્સત્યમપ્રિયમ્ ।
પ્રિયં ચ નાનૃતં બ્રૂયાદેષ ધર્મઃ સનાતનઃ ॥ ૪.૧૩૮॥

ભદ્રં ભદ્રમિતિ બ્રૂયાદ્ભદ્રમિત્યેવ વા વદેત્ ।
શુષ્કવૈરં વિવાદં ચ ન કુર્યાત્કેન ચિત્સહ ॥ ૪.૧૩૯॥

નાતિકલ્યં નાતિસાયં નાતિમધ્યંદિને સ્થિતે ।
નાજ્ઞાતેન સમં ગચ્છેન્નૈકો ન વૃષલૈઃ સહ ॥ ૪.૧૪૦॥

હીનાઙ્ગાનતિરિક્તાઙ્ગાન્ વિદ્યાહીનાન્ વયોઽધિકાન્ । વયોઽતિગાન્
રૂપદ્રવિણહીનાંશ્ચ જાતિહીનાંશ્ચ નાક્ષિપેત્ ॥ ૪.૧૪૧॥ રૂપદ્રવ્યહીનાંશ્ચ

ન સ્પૃશેત્પાણિનોચ્છિષ્ટો વિપ્રો ગોબ્રાહ્મણાનલાણ્ ।
ન ચાપિ પશ્યેદશુચિઃ સુસ્થો જ્યોતિર્ગણાન્ દિવા ॥ ૪.૧૪૨॥ સ્વસ્થો જ્યોતિર્ગણાન્ દિવિ

સ્પૃષ્ટ્વૈતાનશુચિર્નિત્યમદ્ભિઃ પ્રાણાનુપસ્પૃશેત્ ।
ગાત્રાણિ ચૈવ સર્વાણિ નાભિં પાણિતલેન તુ ॥ ૪.૧૪૩॥

અનાતુરઃ સ્વાનિ ખાનિ ન સ્પૃશેદનિમિત્તતઃ ।
રોમાણિ ચ રહસ્યાનિ સર્વાણ્યેવ વિવર્જયેત્ ॥ ૪.૧૪૪॥

મઙ્ગલાચારયુક્તઃ સ્યાત્પ્રયતાત્મા જિતેન્દ્રિયઃ ।
જપેચ્ચ જુહુયાચ્ચૈવ નિત્યમગ્નિમતન્દ્રિતઃ ॥ ૪.૧૪૫॥

મઙ્ગલાચારયુક્તાનાં નિત્યં ચ પ્રયતાત્મનામ્ ।
જપતાં જુહ્વતાં ચૈવ વિનિપાતો ન વિદ્યતે ॥ ૪.૧૪૬॥

વેદમેવાભ્યસેન્નિત્યં યથાકાલમતન્દ્રિતઃ । વેદમેવ જપેન્
તં હ્યસ્યાહુઃ પરં ધર્મમુપધર્મોઽન્ય ઉચ્યતે ॥ ૪.૧૪૭॥

વેદાભ્યાસેન સતતં શૌચેન તપસૈવ ચ ।
અદ્રોહેણ ચ ભૂતાનાં જાતિં સ્મરતિ પૌર્વિકીમ્ ॥ ૪.૧૪૮॥

પૌર્વિકીં સંસ્મરન્ જાતિં બ્રહ્મૈવાભ્યસ્યતે પુનઃ । દ્વિજઃ
બ્રહ્માભ્યાસેન ચાજસ્રમનન્તં સુખમશ્નુતે ॥ ૪.૧૪૯॥

સાવિત્રાન્ શાન્તિહોમાંશ્ચ કુર્યાત્પર્વસુ નિત્યશઃ । સાવિત્રાન્ શાન્તિહોમાંશ્
પિતૄંશ્ચૈવાષ્ટકાસ્વર્ચેન્નિત્યમન્વષ્ટકાસુ ચ ॥ ૪.૧૫૦॥

દૂરાદાવસથાન્ મૂત્રં દૂરાત્પાદાવસેચનમ્ ।
ઉચ્છિષ્ટાન્નનિષેકં ચ દૂરાદેવ સમાચરેત્ ॥ ૪.૧૫૧॥

મૈત્રં પ્રસાધનં સ્નાનં દન્તધાવનમઞ્જનમ્ ।
પૂર્વાહ્ણ એવ કુર્વીત દેવતાનાં ચ પૂજનમ્ ॥ ૪.૧૫૨॥

દૈવતાન્યભિગચ્છેત્તુ ધાર્મિકાંશ્ચ દ્વિજોત્તમાન્ ।
ઈશ્વરં ચૈવ રક્ષાર્થં ગુરૂનેવ ચ પર્વસુ ॥ ૪.૧૫૩॥

અભિવાદયેદ્વૃદ્ધાંશ્ચ દદ્યાચ્ચૈવાસનં સ્વકમ્ ।
કૃતાઞ્જલિરુપાસીત ગચ્છતઃ પૃષ્ઠતોઽન્વિયાત્ ॥ ૪.૧૫૪॥

શ્રુતિસ્મૃત્યોદિતં સમ્યગ્ં નિબદ્ધં સ્વેષુ કર્મસુ ।
ધર્મમૂલં નિષેવેત સદાચારમતન્દ્રિતઃ ॥ ૪.૧૫૫॥

આચારાત્લભતે હ્યાયુરાચારાદીપ્સિતાઃ પ્રજાઃ ।
આચારાદ્ધનમક્ષય્યમાચારો હન્ત્યલક્ષણમ્ ॥ ૪.૧૫૬॥

દુરાચારો હિ પુરુષો લોકે ભવતિ નિન્દિતઃ ।
દુઃખભાગી ચ સતતં વ્યાધિતોઽલ્પાયુરેવ ચ ॥ ૪.૧૫૭॥

સર્વલક્ષણહીનોઽપિ યઃ સદાચારવાન્નરઃ ।
શ્રદ્દધાનોઽનસૂયશ્ચ શતં વર્ષાણિ જીવતિ ॥ ૪.૧૫૮॥

યદ્યત્પરવશં કર્મ તત્તદ્યત્નેન વર્જયેત્ ।

યદ્યદાત્મવશં તુ સ્યાત્તત્તત્સેવેત યત્નતઃ ॥ ૪.૧૫૯॥

સર્વં પરવશં દુઃખં સર્વમાત્મવશં સુખમ્ ।
એતદ્વિદ્યાત્સમાસેન લક્ષણં સુખદુઃખયોઃ ॥ ૪.૧૬૦॥

યત્કર્મ કુર્વતોઽસ્ય સ્યાત્પરિતોષોઽન્તરાત્મનઃ ।
તત્પ્રયત્નેન કુર્વીત વિપરીતં તુ વર્જયેત્ ॥ ૪.૧૬૧॥

આચાર્યં ચ પ્રવક્તારં પિતરં માતરં ગુરુમ્ ।
ન હિંસ્યાદ્બ્રાહ્મણાન્ ગાશ્ચ સર્વાંશ્ચૈવ તપસ્વિનઃ ॥ ૪.૧૬૨॥

નાસ્તિક્યં વેદનિન્દાં ચ દેવતાનાં ચ કુત્સનમ્ ।
દ્વેષં દમ્ભં ચ માનં ચ ક્રોધં તૈક્ષ્ણ્યં ચ વર્જયેત્ ॥ ૪.૧૬૩॥ દ્વેષં સ્તમ્ભં ચ

પરસ્ય દણ્ડં નોદ્યચ્છેત્ક્રુદ્ધો નૈનં નિપાતયેત્ ।
અન્યત્ર પુત્રાત્શિષ્યાદ્વા શિષ્ટ્યર્થં તાડયેત્તુ તૌ ॥ ૪.૧૬૪॥

બ્રાહ્મણાયાવગુર્યૈવ દ્વિજાતિર્વધકામ્યયા ।
શતં વર્ષાણિ તામિસ્રે નરકે પરિવર્તતે ॥ ૪.૧૬૫॥

તાડયિત્વા તૃણેનાપિ સંરમ્ભાત્મતિપૂર્વકમ્ ।
એકવિંશતીમાજાતીઃ પાપયોનિષુ જાયતે ॥ ૪.૧૬૬॥

અયુધ્યમાનસ્યોત્પાદ્ય બ્રાહ્મણસ્યાસૃગઙ્ગતઃ ।
દુઃખં સુમહદાપ્નોતિ પ્રેત્યાપ્રાજ્ઞતયા નરઃ ॥ ૪.૧૬૭॥

શોણિતં યાવતઃ પાંસૂન્ સઙ્ગૃહ્ણાતિ મહીતલાત્ ।
તાવતોઽબ્દાનમુત્રાન્યૈઃ શોણિતોત્પાદકોઽદ્યતે ॥ ૪.૧૬૮॥

ન કદા ચિદ્દ્વિજે તસ્માદ્વિદ્વાનવગુરેદપિ ।
ન તાડયેત્તૃણેનાપિ ન ગાત્રાત્સ્રાવયેદસૃક્ ॥ ૪.૧૬૯॥

અધાર્મિકો નરો યો હિ યસ્ય ચાપ્યનૃતં ધનમ્ ।
હિંસારતશ્ચ યો નિત્યં નૈહાસૌ સુખમેધતે ॥ ૪.૧૭૦॥ હિંસારતિશ્

ન સીદન્નપિ ધર્મેણ મનોઽધર્મે નિવેશયેત્ ।
અધાર્મિકાનાં પાપાનામાશુ પશ્યન્ વિપર્યયમ્ ॥ ૪.૧૭૧॥

નાધર્મશ્ચરિતો લોકે સદ્યઃ ફલતિ ગૌરિવ ।
શનૈરાવર્ત્યમાનસ્તુ કર્તુર્મૂલાનિ કૃન્તતિ ॥ ૪.૧૭૨॥

યદિ નાત્મનિ પુત્રેષુ ન ચેત્પુત્રેષુ નપ્તૃષુ ।
ન ત્વેવ તુ કૃતોઽધર્મઃ કર્તુર્ભવતિ નિષ્ફલઃ ॥ ૪.૧૭૩॥

અધર્મેણૈધતે તાવત્તતો ભદ્રાણિ પશ્યતિ ।
તતઃ સપત્નાન્ જયતિ સમૂલસ્તુ વિનશ્યતિ ॥ ૪.૧૭૪॥

સત્યધર્માર્યવૃત્તેષુ શૌચે ચૈવારમેત્સદા ।
શિષ્યાંશ્ચ શિષ્યાદ્ધર્મેણ વાચ્।બાહૂદરસંયતઃ ॥ ૪.૧૭૫॥

પરિત્યજેદર્થકામૌ યૌ સ્યાતાં ધર્મવર્જિતૌ ।
ધર્મં ચાપ્યસુખોદર્કં લોકસઙ્કુષ્ટમેવ ચ ॥ ૪.૧૭૬॥

ન પાણિપાદચપલો ન નેત્રચપલોઽનૃજુઃ ।
ન સ્યાદ્વાક્ચપલશ્ચૈવ ન પરદ્રોહકર્મધીઃ ॥ ૪.૧૭૭॥

યેનાસ્ય પિતરો યાતા યેન યાતાઃ પિતામહાઃ ।
તેન યાયાત્સતાં માર્ગં તેન ગચ્છન્ન રિષ્યતિ ॥ ૪.૧૭૮॥

ઋત્વિક્પુરોહિતાચાર્યૈર્માતુલાતિથિસંશ્રિતૈઃ ।
બાલવૃદ્ધાતુરૈર્વૈદ્યૈર્જ્ઞાતિસમ્બન્ધિબાન્ધવૈઃ ॥ ૪.૧૭૯॥

માતાપિતૃભ્યાં જામીભિર્ભ્રાત્રા પુત્રેણ ભાર્યયા ।
દુહિત્રા દાસવર્ગેણ વિવાદં ન સમાચરેત્ ॥ ૪.૧૮૦॥

એતૈર્વિવાદાન્ સંત્યજ્ય સર્વપાપૈઃ પ્રમુચ્યતે ।
એતૈર્જિતૈશ્ચ જયતિ સર્વાન્લોકાનિમાન્ ગૃહી ॥ ૪.૧૮૧॥

આચાર્યો બ્રહ્મલોકેશઃ પ્રાજાપત્યે પિતા પ્રભુઃ ।
અતિથિસ્ત્વિન્દ્રલોકેશો દેવલોકસ્ય ચર્ત્વિજઃ ॥ ૪.૧૮૨॥

જામયોઽપ્સરસાં લોકે વૈશ્વદેવસ્ય બાન્ધવાઃ ।
સમ્બન્ધિનો હ્યપાં લોકે પૃથિવ્યાં માતૃમાતુલૌ ॥ ૪.૧૮૩॥

આકાશેશાસ્તુ વિજ્ઞેયા બાલવૃદ્ધકૃશાતુરાઃ ।
ભ્રાતા જ્યેષ્ઠઃ સમઃ પિત્રા ભાર્યા પુત્રઃ સ્વકા તનુઃ ॥ ૪.૧૮૪॥

છાયા સ્વો દાસવર્ગશ્ચ દુહિતા કૃપણં પરમ્ ।
તસ્માદેતૈરધિક્ષિપ્તઃ સહેતાસઞ્જ્વરઃ સદા ॥ ૪.૧૮૫॥

પ્રતિગ્રહસમર્થોઽપિ પ્રસઙ્ગં તત્ર વર્જયેત્ ।
પ્રતિગ્રહેણ હ્યસ્યાશુ બ્રાહ્મં તેજઃ પ્રશામ્યતિ ॥ ૪.૧૮૬॥

ન દ્રવ્યાણામવિજ્ઞાય વિધિં ધર્મ્યં પ્રતિગ્રહે ।
પ્રાજ્ઞઃ પ્રતિગ્રહં કુર્યાદવસીદન્નપિ ક્ષુધા ॥ ૪.૧૮૭॥

હિરણ્યં ભૂમિમશ્વં ગામન્નં વાસસ્તિલાન્ ઘૃતમ્ ।
પ્રતિગૃહ્ણન્નવિદ્વાંસ્તુ ભસ્મીભવતિ દારુવત્ ॥ ૪.૧૮૮॥

હિરણ્યમાયુરન્નં ચ ભૂર્ગૌશ્ચાપ્યોષતસ્તનુમ્ ।
અશ્વશ્ચક્ષુસ્ત્વચં વાસો ઘૃતં તેજસ્તિલાઃ પ્રજાઃ ॥ ૪.૧૮૯॥

અતપાસ્ત્વનધીયાનઃ પ્રતિગ્રહરુચિર્દ્વિજઃ ।
અમ્ભસ્યશ્મપ્લવેનૈવ સહ તેનૈવ મજ્જતિ ॥ ૪.૧૯૦॥

તસ્માદવિદ્વાન્ બિભિયાદ્યસ્માત્તસ્માત્પ્રતિગ્રહાત્ ।
સ્વલ્પકેનાપ્યવિદ્વાન્ હિ પઙ્કે ગૌરિવ સીદતિ ॥ ૪.૧૯૧॥

ન વાર્યપિ પ્રયચ્છેત્તુ બૈડાલવ્રતિકે દ્વિજે ।
ન બકવ્રતિકે પાપે નાવેદવિદિ ધર્મવિત્ ॥ ૪.૧૯૨॥

ત્રિષ્વપ્યેતેષુ દત્તં હિ વિધિનાઽપ્યર્જિતં ધનમ્ ।
દાતુર્ભવત્યનર્થાય પરત્રાદાતુરેવ ચ ॥ ૪.૧૯૩॥

યથા પ્લવેનોપલેન નિમજ્જત્યુદકે તરન્ ।
તથા નિમજ્જતોઽધસ્તાદજ્ઞૌ દાતૃપ્રતીચ્છકૌ ॥ ૪.૧૯૪॥

ધર્મધ્વજી સદા લુબ્ધશ્છાદ્મિકો લોકદમ્ભકઃ ॥

બૈડાલવ્રતિકો જ્ઞેયો હિંસ્રઃ સર્વાભિસંધકઃ ॥ ૪.૧૯૫॥

અધોદૃષ્ટિર્નૈષ્કૃતિકઃ સ્વાર્થસાધનતત્પરઃ ।
શઠો મિથ્યાવિનીતશ્ચ બકવ્રતચરો દ્વિજઃ ॥ ૪.૧૯૬॥

યે બકવ્રતિનો વિપ્રા યે ચ માર્જારલિઙ્ગિનઃ ।
તે પતન્ત્યન્ધતામિસ્રે તેન પાપેન કર્મણા ॥ ૪.૧૯૭॥

ન ધર્મસ્યાપદેશેન પાપં કૃત્વા વ્રતં ચરેત્ ।
વ્રતેન પાપં પ્રચ્છાદ્ય કુર્વન્ સ્ત્રીશૂદ્રદમ્ભનમ્ ॥ ૪.૧૯૮॥

પ્રેત્યેહ ચેદૃશા વિપ્રા ગર્હ્યન્તે બ્રહ્મવાદિભિઃ ।
છદ્મના ચરિતં યચ્ચ વ્રતં રક્ષાંસિ ગચ્છતિ ॥ ૪.૧૯૯॥

અલિઙ્ગી લિઙ્ગિવેષેણ યો વૃત્તિમુપજીવતિ ।
સ લિઙ્ગિનાં હરત્યેનસ્તિર્યગ્યોનૌ ચ જાયતે ॥ ૪.૨૦૦॥

પરકીયનિપાનેષુ ન સ્નાયાધિ કદા ચન । સ્નાયાચ્ચ કદા ચન
નિપાનકર્તુઃ સ્નાત્વા તુ દુષ્કૃતાંશેન લિપ્યતે ॥ ૪.૨૦૧॥

યાનશય્યાઽઽસનાન્યસ્ય કૂપોદ્યાનગૃહાણિ ચ ।
અદત્તાન્યુપયુઞ્જાન એનસઃ સ્યાત્તુરીયભાક્ ॥ ૪.૨૦૨॥

નદીષુ દેવખાતેષુ તડાગેષુ સરઃસુ ચ ।
સ્નાનં સમાચરેન્નિત્યં ગર્તપ્રસ્રવણેષુ ચ ॥ ૪.૨૦૩॥

યમાન્ સેવેત સતતં ન નિત્યં નિયમાન્ બુધઃ ।
યમાન્ પતત્યકુર્વાણો નિયમાન્ કેવલાન્ ભજન્ ॥ ૪.૨૦૪॥

નાશ્રોત્રિયતતે યજ્ઞે ગ્રામયાજિકૃતે તથા ।
સ્ત્રિયા ક્લીબેન ચ હુતે ભુઞ્જીત બ્રાહ્મણઃ ક્વ ચિત્ ॥ ૪.૨૦૫॥

અશ્લીકમેતત્સાધૂનાં યત્ર જુહ્વત્યમી હવિઃ । અશ્લીલમ્
પ્રતીપમેતદ્દેવાનાં તસ્માત્તત્પરિવર્જયેત્ ॥ ૪.૨૦૬॥

મત્તક્રુદ્ધાતુરાણાં ચ ન ભુઞ્જીત કદા ચન ।
કેશકીટાવપન્નં ચ પદા સ્પૃષ્ટં ચ કામતઃ ॥ ૪.૨૦૭॥

ભ્રૂણઘ્નાવેક્ષિતં ચૈવ સંસ્પૃષ્ટં ચાપ્યુદક્યયા ।
પતત્રિણાવલીઢં ચ શુના સંસ્પૃષ્ટમેવ ચ ॥ ૪.૨૦૮॥

ગવા ચાન્નમુપઘ્રાતં ઘુષ્ટાન્નં ચ વિશેષતઃ ।
ગણાન્નં ગણિકાન્નં ચ વિદુષા ચ જુગુપ્સિતમ્ ॥ ૪.૨૦૯॥

સ્તેનગાયનયોશ્ચાન્નં તક્ષ્ણો વાર્ધુષિકસ્ય ચ ।
દીક્ષિતસ્ય કદર્યસ્ય બદ્ધસ્ય નિગડસ્ય ચ ॥ ૪.૨૧૦॥

અભિશસ્તસ્ય ષણ્ઢસ્ય પુંશ્ચલ્યા દામ્ભિકસ્ય ચ ।
શુક્તં પર્યુષિતં ચૈવ શૂદ્રસ્યોચ્છિષ્ટમેવ ચ ॥ ૪.૨૧૧॥

ચિકિત્સકસ્ય મૃગયોઃ ક્રૂરસ્યોચ્છિષ્ટભોજિનઃ ।
ઉગ્રાન્નં સૂતિકાન્નં ચ પર્યાચાન્તમનિર્દશમ્ ॥ ૪.૨૧૨॥

અનર્ચિતં વૃથામાંસમવીરાયાશ્ચ યોષિતઃ ।
દ્વિષદન્નં નગર્યન્નં પતિતાન્નમવક્ષુતમ્ ॥ ૪.૨૧૩॥

પિશુનાનૃતિનોશ્ચાન્નં ક્રતુવિક્રયિણસ્તથા ॥ । ક્રતુવિક્રયકસ્ય ચ
શૈલૂષતુન્નવાયાન્નં કૃતઘ્નસ્યાન્નમેવ ચ ॥ ૪.૨૧૪॥

કર્માંરસ્ય નિષાદસ્ય રઙ્ગાવતારકસ્ય ચ ।
સુવર્ણકર્તુર્વેણસ્ય શસ્ત્રવિક્રયિણસ્તથા ॥ ૪.૨૧૫॥

શ્વવતાં શૌણ્ડિકાનાં ચ ચૈલનિર્ણેજકસ્ય ચ ।
રઞ્જકસ્ય નૃશંસસ્ય યસ્ય ચોપપતિર્ગૃહે ॥ ૪.૨૧૬॥ રજકસ્ય

મૃષ્યન્તિ યે ચોપપતિં સ્ત્રીજિતાનાં ચ સર્વશઃ ।
અનિર્દશં ચ પ્રેતાન્નમતુષ્ટિકરમેવ ચ ॥ ૪.૨૧૭॥

રાજાન્નં તેજ આદત્તે શૂદ્રાન્નં બ્રહ્મવર્ચસમ્ ।
આયુઃ સુવર્ણકારાન્નં યશશ્ચર્માવકર્તિનઃ ॥ ૪.૨૧૮॥

કારુકાન્નં પ્રજાં હન્તિ બલં નિર્ણેજકસ્ય ચ ।
ગણાન્નં ગણિકાન્નં ચ લોકેભ્યઃ પરિકૃન્તતિ ॥ ૪.૨૧૯॥

પૂયં ચિકિત્સકસ્યાન્નં પુંશ્ચલ્યાસ્ત્વન્નમિન્દ્રિયમ્ ।
વિષ્ઠા વાર્ધુષિકસ્યાન્નં શસ્ત્રવિક્રયિણો મલમ્ ॥ ૪.૨૨૦॥

ય એતેઽન્યે ત્વભોજ્યાન્નાઃ ક્રમશઃ પરિકીર્તિતાઃ ।
તેષાં ત્વગસ્થિરોમાણિ વદન્ત્યન્નં મનીષિણઃ ॥ ૪.૨૨૧॥

ભુક્ત્વાઽતોઽન્યતમસ્યાન્નમમત્યા ક્ષપણં ત્ર્યહમ્ ।
મત્યા ભુક્ત્વાઽચરેત્કૃચ્છ્રં રેતોવિણ્મૂત્રમેવ ચ ॥ ૪.૨૨૨॥

નાદ્યાત્શૂદ્રસ્ય પક્વાન્નં વિદ્વાનશ્રાદ્ધિનો દ્વિજઃ ।
આદદીતામમેવાસ્માદવૃત્તાવેકરાત્રિકમ્ ॥ ૪.૨૨૩॥

શ્રોત્રિયસ્ય કદર્યસ્ય વદાન્યસ્ય ચ વાર્ધુષેઃ ।
મીમાંસિત્વોભયં દેવાઃ સમમન્નમકલ્પયન્ ॥ ૪.૨૨૪॥

તાન્ પ્રજાપતિરાહૈત્ય મા કૃધ્વં વિષમં સમમ્ ।
શ્રદ્ધાપૂતં વદાન્યસ્ય હતમશ્રદ્ધયેતરત્ ॥ ૪.૨૨૫॥

શ્રદ્ધયેષ્ટં ચ પૂર્તં ચ નિત્યં કુર્યાદતન્દ્રિતઃ ।

શ્રદ્ધાકૃતે હ્યક્ષયે તે ભવતઃ સ્વાગતૈર્ધનૈઃ ॥ ૪.૨૨૬॥

દાનધર્મં નિષેવેત નિત્યમૈષ્ટિકપૌર્તિકમ્ ।
પરિતુષ્ટેન ભાવેન પાત્રમાસાદ્ય શક્તિતઃ ॥ ૪.૨૨૭॥

યત્કિં ચિદપિ દાતવ્યં યાચિતેનાનસૂયયા ।
ઉત્પત્સ્યતે હિ તત્પાત્રં યત્તારયતિ સર્વતઃ ॥ ૪.૨૨૮॥

વારિદસ્તૃપ્તિમાપ્નોતિ સુખમક્ષય્યમન્નદઃ । અક્ષયમ્
તિલપ્રદઃ પ્રજામિષ્ટાં દીપદશ્ચક્ષુરુત્તમમ્ ॥ ૪.૨૨૯॥

ભૂમિદો ભૂમિમાપ્નોતિ દીર્ઘમાયુર્હિરણ્યદઃ ।
ગૃહદોઽગ્ર્યાણિ વેશ્માનિ રૂપ્યદો રૂપમુત્તમમ્ ॥ ૪.૨૩૦॥

વાસોદશ્ચન્દ્રસાલોક્યમશ્વિસાલોક્યમશ્વદઃ ।
અનડુહઃ શ્રિયં પુષ્ટાં ગોદો બ્રધ્નસ્ય વિષ્ટપમ્ ॥ ૪.૨૩૧॥

યાનશય્યાપ્રદો ભાર્યામૈશ્વર્યમભયપ્રદઃ ।
ધાન્યદઃ શાશ્વતં સૌખ્યં બ્રહ્મદો બ્રહ્મસાર્ષ્ટિતામ્ ॥ ૪.૨૩૨॥

સર્વેષામેવ દાનાનાં બ્રહ્મદાનં વિશિષ્યતે ।
વાર્યન્નગોમહીવાસસ્। તિલકાઞ્ચનસર્પિષામ્ ॥ ૪.૨૩૩॥

યેન યેન તુ ભાવેન યદ્યદ્દાનં પ્રયચ્છતિ ।
તત્તત્તેનૈવ ભાવેન પ્રાપ્નોતિ પ્રતિપૂજિતઃ ॥ ૪.૨૩૪॥

યોઽર્ચિતં પ્રતિગૃહ્ણાતિ દદાત્યર્ચિતમેવ વા ।
તાવુભૌ ગચ્છતઃ સ્વર્ગં નરકં તુ વિપર્યયે ॥ ૪.૨૩૫॥

ન વિસ્મયેત તપસા વદેદિષ્ટ્વા ચ નાનૃતમ્ ।
નાર્તોઽપ્યપવદેદ્વિપ્રાન્ન દત્ત્વા પરિકીર્તયેત્ ॥ ૪.૨૩૬॥ દત્વા

યજ્ઞોઽનૃતેન ક્ષરતિ તપઃ ક્ષરતિ વિસ્મયાત્ ।
આયુર્વિપ્રાપવાદેન દાનં ચ પરિકીર્તનાત્ ॥ ૪.૨૩૭॥

ધર્મં શનૈઃ સઞ્ચિનુયાદ્વલ્મીકમિવ પુત્તિકાઃ । સઞ્ચિનુયાદ્
પરલોકસહાયાર્થં સર્વભૂતાન્યપીડયન્ ॥ ૪.૨૩૮॥

નામુત્ર હિ સહાયાર્થં પિતા માતા ચ તિષ્ઠતઃ ।
ન પુત્રદારં ન જ્ઞાતિર્ધર્મસ્તિષ્ઠતિ કેવલઃ ॥ ૪.૨૩૯॥

એકઃ પ્રજાયતે જન્તુરેક એવ પ્રલીયતે ।
એકોઽનુભુઙ્ક્તે સુકૃતમેક એવ ચ દુષ્કૃતમ્ ॥ ૪.૨૪૦॥

મૃતં શરીરમુત્સૃજ્ય કાષ્ઠલોષ્ટસમં ક્ષિતૌ ।
વિમુખા બાન્ધવા યાન્તિ ધર્મસ્તમનુગચ્છતિ ॥ ૪.૨૪૧॥

તસ્માદ્ધર્મં સહાયાર્થં નિત્યં સઞ્ચિનુયાત્શનૈઃ ।
ધર્મેણ હિ સહાયેન તમસ્તરતિ દુસ્તરમ્ ॥ ૪.૨૪૨॥

ધર્મપ્રધાનં પુરુષં તપસા હતકિલ્બિષમ્ ।
પરલોકં નયત્યાશુ ભાસ્વન્તં ખશરીરિણમ્ ॥ ૪.૨૪૩॥

ઉત્તમૈરુત્તમૈર્નિત્યં સમ્બન્ધાનાચરેત્સહ । સમ્ભન્ધાન્
નિનીષુઃ કુલમુત્કર્ષમધમાનધમાંસ્ત્યજેત્ ॥ ૪.૨૪૪॥

ઉત્તમાનુત્તમાનેવ ગચ્છન્ હીનાંસ્તુ વર્જયન્ ।
બ્રાહ્મણઃ શ્રેષ્ઠતામેતિ પ્રત્યવાયેન શૂદ્રતામ્ ॥ ૪.૨૪૫॥

દૃઢકારી મૃદુર્દાન્તઃ ક્રૂરાચારૈરસંવસન્ ।
અહિંસ્રો દમદાનાભ્યાં જયેત્સ્વર્ગં તથાવ્રતઃ ॥ ૪.૨૪૬॥

એધૌદકં મૂલફલમન્નમભ્યુદ્યતં ચ યત્ ।
સર્વતઃ પ્રતિગૃહ્ણીયાન્મધ્વથાભયદક્ષિણામ્ ॥ ૪.૨૪૭॥

આહૃતાભ્યુદ્યતાં ભિક્ષાં પુરસ્તાદપ્રચોદિતામ્ ।
મેને પ્રજાપતિર્ગ્રાહ્યામપિ દુષ્કૃતકર્મણઃ ॥ ૪.૨૪૮॥

નાશ્નન્તિ પિતરસ્તસ્ય દશવર્ષાણિ પઞ્ચ ચ ॥

ન ચ હવ્યં વહત્યગ્નિર્યસ્તામભ્યવમન્યતે ॥ ૪.૨૪૯॥

શય્યાં ગૃહાન્ કુશાન્ ગન્ધાનપઃ પુષ્પં મણીન્ દધિ ।
ધાના મત્સ્યાન્ પયો માંસં શાકં ચૈવ ન નિર્ણુદેત્ ॥ ૪.૨૫૦॥

ગુરૂન્ ભૃત્યાંશ્ચોજ્જિહીર્ષન્નર્ચિષ્યન્ દેવતાતિથીન્ ।
સર્વતઃ પ્રતિગૃહ્ણીયાન્ન તુ તૃપ્યેત્સ્વયં તતઃ ॥ ૪.૨૫૧॥

ગુરુષુ ત્વભ્યતીતેષુ વિના વા તૈર્ગૃહે વસન્ ।
આત્મનો વૃત્તિમન્વિચ્છન્ ગૃહ્ણીયાત્સાધુતઃ સદા ॥ ૪.૨૫૨॥

આર્ધિકઃ કુલમિત્રં ચ ગોપાલો દાસનાપિતૌ ।

એતે શૂદ્રેષુ ભોજ્યાન્ના યાશ્ચાત્માનં નિવેદયેત્ ॥ ૪.૨૫૩॥

યાદૃશોઽસ્ય ભવેદાત્મા યાદૃશં ચ ચિકીર્ષિતમ્ ।
યથા ચૌપચરેદેનં તથાઽત્માનં નિવેદયેત્ ॥ ૪.૨૫૪॥

યોઽન્યથા સન્તમાત્માનમન્યથા સત્સુ ભાષતે ।
સ પાપકૃત્તમો લોકે સ્તેન આત્માપહારકઃ ॥ ૪.૨૫૫॥

વાચ્યર્થા નિયતાઃ સર્વે વાઙ્મૂલા વાગ્વિનિઃસૃતાઃ ।
તાંસ્તુ યઃ સ્તેનયેદ્વાચં સ સર્વસ્તેયકૃન્નરઃ ॥ ૪.૨૫૬॥

મહર્ષિપિતૃદેવાનાં ગત્વાઽનૃણ્યં યથાવિધિ ।
પુત્રે સર્વં સમાસજ્ય વસેન્ માધ્યસ્થ્યમાશ્રિતઃ ॥ ૪.૨૫૭॥ આસ્થિતઃ

એકાકી ચિન્તયેન્નિત્યં વિવિક્તે હિતમાત્મનઃ । હિતમાત્મનિ
એકાકી ચિન્તયાનો હિ પરં શ્રેયોઽધિગચ્છતિ ॥ ૪.૨૫૮॥

એષોદિતા ગૃહસ્થસ્ય વૃત્તિર્વિપ્રસ્ય શાશ્વતી ।
સ્નાતકવ્રતકલ્પશ્ચ સત્ત્વવૃદ્ધિકરઃ શુભઃ ॥ ૪.૨૫૯॥

અનેન વિપ્રો વૃત્તેન વર્તયન્ વેદશાસ્ત્રવિત્ ।
વ્યપેતકલ્મષો નિત્યં બ્રહ્મલોકે મહીયતે ॥ ૪.૨૬૦॥

## અધ્યાય ૫

શ્રુત્વૈતાન્ ઋષયો ધર્માન્ સ્નાતકસ્ય યથોદિતાન્ ।
ઇદમૂચુર્મહાત્માનમનલપ્રભવં ભૃગુમ્ ॥ ૫.૧॥

એવં યથોક્તં વિપ્રાણાં સ્વધર્મમનુતિષ્ઠતામ્ ।
કથં મૃત્યુઃ પ્રભવતિ વેદશાસ્ત્રવિદાં પ્રભો ॥ ૫.૨॥

સ તાનુવાચ ધર્માત્મા મહર્ષીન્ માનવો ભૃગુઃ ।
શ્રૂયતાં યેન દોષેણ મૃત્યુર્વિપ્રાન્ જિઘાંસતિ ॥ ૫.૩॥

અનભ્યાસેન વેદાનામાચારસ્ય ચ વર્જનાત્ ।
આલસ્યાદન્નદોષાચ્ચ મૃત્યુર્વિપ્રાઞ્જિઘાંસતિ ॥ ૫.૪॥ વિપ્રાન્

લશુનં ગૃઞ્જનં ચૈવ પલાણ્ડું કવકાનિ ચ ।
અભક્ષ્યાણિ દ્વિજાતીનામમેધ્યપ્રભવાનિ ચ ॥ ૫.૫॥

લોહિતાન્ વૃક્ષનિર્યાસાન્ વૃશ્ચનપ્રભવાંસ્તથા । વ્રશ્ચનપ્રભવાંઃ
શેલું ગવ્યં ચ પેયૂષં પ્રયત્નેન વિવર્જયેત્ ॥ ૫.૬॥ પીયૂષં

વૃથા કૃસરસંયાવં પાયસાપૂપમેવ ચ ।
અનુપાકૃતમાંસાનિ દેવાન્નાનિ હવીંષિ ચ ॥ ૫.૭॥

અનિર્દશાયા ગોઃ ક્ષીરમૌષ્ટ્રમૈકશફં તથા ।
આવિકં સંધિનીક્ષીરં વિવત્સાયાશ્ચ ગોઃ પયઃ ॥ ૫.૮॥ સન્ધિનીક્ષીરં

આરણ્યાનાં ચ સર્વેષાં મૃગાણાં માહિષં વિના ।
સ્ત્રીક્ષીરં ચૈવ વર્જ્યાનિ સર્વશુક્તાનિ ચૈવ હિ ॥ ૫.૯॥

દધિ ભક્ષ્યં ચ શુક્તેષુ સર્વં ચ દધિસમ્ભવમ્ । દધિસમ્ભવમ્
યાનિ ચૈવાભિષૂયન્તે પુષ્પમૂલફલૈઃ શુભૈઃ ॥ ૫.૧૦॥

ક્રવ્યાદાન્ શકુનાન્ સર્વાન્તથા ગ્રામનિવાસિનઃ । ક્રવ્યાદઃ શકુનીન્
અનિર્દિષ્ટાંશ્ચૈકશફાન્ ટિટ્ટિભં ચ વિવર્જયેત્ ॥ ૫.૧૧॥

કલવિઙ્કં પ્લવં હંસં ચક્રાહ્વં ગ્રામકુક્કુટમ્ ।
સારસં રજ્જુવાલં ચ દાત્યૂહં શુકસારિકે ॥ ૫.૧૨॥ રજ્જુદાલં

પ્રતુદાઞ્જાલપાદાંશ્ચ કોયષ્ટિનખવિષ્કિરાન્ । પ્રતુદાન્
નિમજ્જતશ્ચ મત્સ્યાદાન્ સૌનં વલ્લૂરમેવ ચ ॥ ૫.૧૩॥

બકં ચૈવ બલાકાં ચ કાકોલં ખઞ્જરીટકમ્ ।
મત્સ્યાદાન્ વિડ્વરાહાંશ્ચ મત્સ્યાનેવ ચ સર્વશઃ ॥ ૫.૧૪॥

યો યસ્ય માંસમશ્નાતિ સ તન્માંસાદ ઉચ્યતે ।
મત્સ્યાદઃ સર્વમાંસાદસ્તસ્માન્ મત્સ્યાન્ વિવર્જયેત્ ॥ ૫.૧૫॥

પાઠીનરોહિતાવાદ્યૌ નિયુક્તૌ હવ્યકવ્યયોઃ ।
રાજીવાન્ સિંહતુણ્ડાશ્ચ સશલ્કાશ્ચૈવ સર્વશઃ ॥ ૫.૧૬॥ રાજીવાઃ

ન ભક્ષયેદેકચરાનજ્ઞાતાંશ્ચ મૃગદ્વિજાન્ ।
ભક્ષ્યેષ્વપિ સમુદ્દિષ્ટાન્ સર્વાન્ પઞ્ચનખાંસ્તથા ॥ ૫.૧૭॥

શ્વાવિધં શલ્યકં ગોધાં ખડ્ગકૂર્મશશાંસ્તથા ।
ભક્ષ્યાન્ પઞ્ચનખેષ્વાહુરનુષ્ટ્રાંશ્ચૈકતોદતઃ ॥ ૫.૧૮॥

છત્રાકં વિડ્વરાહં ચ લશુનં ગ્રામકુક્કુટમ્ ।
પલાણ્ડું ગૃઞ્જનં ચૈવ મત્યા જગ્ધ્વા પતેદ્દ્વિજઃ ॥ ૫.૧૯॥

અમત્યૈતાનિ ષડ્જગ્ધ્વા કૃચ્છ્રં સાન્તપનં ચરેત્ ।
યતિચાન્દ્રાયણં વાઽપિ શેષેષૂપવસેદહઃ ॥ ૫.૨૦॥

સંવત્સરસ્યૈકમપિ ચરેત્કૃચ્છ્રં દ્વિજોત્તમઃ ।
અજ્ઞાતભુક્તશુદ્ધ્યર્થં જ્ઞાતસ્ય તુ વિશેષતઃ ॥ ૫.૨૧॥

યજ્ઞાર્થં બ્રાહ્મણૈર્વધ્યાઃ પ્રશસ્તા મૃગપક્ષિણઃ ।
ભૃત્યાનાં ચૈવ વૃત્ત્યર્થમગસ્ત્યો હ્યાચરત્પુરા ॥ ૫.૨૨॥

બભૂવુર્હિ પુરોડાશા ભક્ષ્યાણાં મૃગપક્ષિણામ્ ।
પુરાણેષ્વપિ યજ્ઞેષુ બ્રહ્મક્ષત્રસવેષુ ચ ॥ ૫.૨૩॥ પુરાણેષ્વૃષિયજ્ઞેષુ

યત્કિં ચિત્સ્નેહસંયુક્તં ભક્ષ્યં ભોજ્યમગર્હિતમ્ ।
તત્પર્યુષિતમપ્યાદ્યં હવિઃશેષં ચ યદ્ભવેત્ ॥ ૫.૨૪॥

ચિરસ્થિતમપિ ત્વાદ્યમસ્નેહાક્તં દ્વિજાતિભિઃ ।
યવગોધૂમજં સર્વં પયસશ્ચૈવ વિક્રિયા ॥ ૫.૨૫॥

એતદુક્તં દ્વિજાતીનાં ભક્ષ્યાભક્ષ્યમશેષતઃ ।
માંસસ્યાતઃ પ્રવક્ષ્યામિ વિધિં ભક્ષણવર્જને ॥ ૫.૨૬॥

પ્રોક્ષિતં ભક્ષયેન્ માંસં બ્રાહ્મણાનાં ચ કામ્યયા ।
યથાવિધિ નિયુક્તસ્તુ પ્રાણાનામેવ ચાત્યયે ॥ ૫.૨૭॥

પ્રાણસ્યાન્નમિદં સર્વં પ્રજાપતિરકલ્પયત્ ।
સ્થાવરં જઙ્ગમં ચૈવ સર્વં પ્રાણસ્ય ભોજનમ્ ॥ ૫.૨૮॥

ચરાણામન્નમચરા દંષ્ટ્રિણામપ્યદંષ્ટ્રિણઃ ।
અહસ્તાશ્ચ સહસ્તાનાં શૂરાણાં ચૈવ ભીરવઃ ॥ ૫.૨૯॥

નાત્તા દુષ્યત્યદન્નાદ્યાન્ પ્રાણિનોઽહન્યહન્યપિ ।
ધાત્રૈવ સૃષ્ટા હ્યાદ્યાશ્ચ પ્રાણિનોઽત્તાર એવ ચ ॥ ૫.૩૦॥

યજ્ઞાય જગ્ધિર્માંસસ્યેત્યેષ દૈવો વિધિઃ સ્મૃતઃ ।
અતોઽન્યથા પ્રવૃત્તિસ્તુ રાક્ષસો વિધિરુચ્યતે ॥ ૫.૩૧॥

ક્રીત્વા સ્વયં વાઽપ્યુત્પાદ્ય પરોપકૃતમેવ વા ।
દેવાન્ પિતૄંશ્ચાર્ચયિત્વા ખાદન્ માંસં ન દુષ્યતિ ॥ ૫.૩૨॥

નાદ્યાદવિધિના માંસં વિધિજ્ઞોઽનાપદિ દ્વિજઃ ।

જગ્ધ્વા હ્યવિધિના માંસં પ્રેતસ્તૈરદ્યતેઽવશઃ ॥ ૫.૩૩॥

ન તાદૃશં ભવત્યેનો મૃગહન્તુર્ધનાર્થિનઃ ।
યાદૃશં ભવતિ પ્રેત્ય વૃથામાંસાનિ ખાદતઃ ॥ ૫.૩૪॥

નિયુક્તસ્તુ યથાન્યાયં યો માંસં નાત્તિ માનવઃ ।
સ પ્રેત્ય પશુતાં યાતિ સમ્ભવાનેકવિંશતિમ્ ॥ ૫.૩૫॥

અસંસ્કૃતાન્ પશૂન્ મન્ત્રૈર્નાદ્યાદ્વિપ્રઃ કદા ચન ।
મન્ત્રૈસ્તુ સંસ્કૃતાનદ્યાત્શાશ્વતં વિધિમાસ્થિતઃ ॥ ૫.૩૬॥

કુર્યાદ્ઘૃતપશું સઙ્ગે કુર્યાત્પિષ્ટપશું તથા ।
ન ત્વેવ તુ વૃથા હન્તું પશુમિચ્છેત્કદા ચન ॥ ૫.૩૭॥

યાવન્તિ પશુરોમાણિ તાવત્કૃત્વો હ મારણમ્ ।
વૃથાપશુઘ્નઃ પ્રાપ્નોતિ પ્રેત્ય જન્મનિ જન્મનિ ॥ ૫.૩૮॥

યજ્ઞાર્થં પશવઃ સૃષ્ટાઃ સ્વયમેવ સ્વયમ્ભુવા ।
યજ્ઞોઽસ્ય ભૂત્યૈ સર્વસ્ય તસ્માદ્યજ્ઞે વધોઽવધઃ ॥ ૫.૩૯॥

ઓષધ્યઃ પશવો વૃક્ષાસ્તિર્યઞ્ચઃ પક્ષિણસ્તથા ।
યજ્ઞાર્થં નિધનં પ્રાપ્તાઃ પ્રાપ્નુવન્ત્યુત્સૃતીઃ પુનઃ ॥ ૫.૪૦॥ ઉચ્છ્રિતીઃ

મધુપર્કે ચ યજ્ઞે ચ પિતૃદૈવતકર્મણિ ।
અત્રૈવ પશવો હિંસ્યા નાન્યત્રેત્યબ્રવીન્ મનુઃ ॥ ૫.૪૧॥

એષ્વર્થેષુ પશૂન્ હિંસન્ વેદતત્ત્વાર્થવિદ્દ્વિજઃ ।
આત્માનં ચ પશું ચૈવ ગમયત્યુત્તમં ગતિમ્ ॥ ૫.૪૨॥

ગૃહે ગુરાવરણ્યે વા નિવસન્નાત્મવાન્ દ્વિજઃ ।
નાવેદવિહિતાં હિંસામાપદ્યપિ સમાચરેત્ ॥ ૫.૪૩॥

યા વેદવિહિતા હિંસા નિયતાઽસ્મિંશ્ચરાચરે ।
અહિંસામેવ તાં વિદ્યાદ્વેદાદ્ધર્મો હિ નિર્બભૌ ॥ ૫.૪૪॥

યોઽહિંસકાનિ ભૂતાનિ હિનસ્ત્યાત્મસુખેચ્છયા ।
સ જીવાંશ્ચ મૃતશ્ચૈવ ન ક્વ ચિત્સુખમેધતે ॥ ૫.૪૫॥

યો બન્ધનવધક્લેશાન્ પ્રાણિનાં ન ચિકીર્ષતિ ।
સ સર્વસ્ય હિતપ્રેપ્સુઃ સુખમત્યન્તમશ્નુતે ॥ ૫.૪૬॥

યદ્ધ્યાયતિ યત્કુરુતે રતિં બધ્નાતિ યત્ર ચ ।
તદવાપ્નોત્યયત્નેન યો હિનસ્તિ ન કિં ચન ॥ ૫.૪૭॥

નાકૃત્વા પ્રાણિનાં હિંસાં માંસમુત્પદ્યતે ક્વ ચિત્ ।
ન ચ પ્રાણિવધઃ સ્વર્ગ્યસ્તસ્માન્ માંસં વિવર્જયેત્ ॥ ૫.૪૮॥

સમુત્પત્તિં ચ માંસસ્ય વધબન્ધૌ ચ દેહિનામ્ ।
પ્રસમીક્ષ્ય નિવર્તેત સર્વમાંસસ્ય ભક્ષણાત્ ॥ ૫.૪૯॥

ન ભક્ષયતિ યો માંસં વિધિં હિત્વા પિશાચવત્ ।
ન લોકે પ્રિયતાં યાતિ વ્યાધિભિશ્ચ ન પીડ્યતે ॥ ૫.૫૦॥

અનુમન્તા વિશસિતા નિહન્તા ક્રયવિક્રયી ।
સંસ્કર્તા ચોપહર્તા ચ ખાદકશ્ચેતિ ઘાતકાઃ ॥ ૫.૫૧॥

સ્વમાંસં પરમાંસેન યો વર્ધયિતુમિચ્છતિ ।
અનભ્યર્ચ્ય પિતૄન્ દેવાંસ્તતોઽન્યો નાસ્ત્યપુણ્યકૃત્ ॥ ૫.૫૨॥

વર્ષે વર્ષેઽશ્વમેધેન યો યજેત શતં સમાઃ ।
માંસાનિ ચ ન ખાદેદ્યસ્તયોઃ પુણ્યફલં સમમ્ ॥ ૫.૫૩॥

ફલમૂલાશનૈર્મેધ્યૈર્મુન્યન્નાનાં ચ ભોજનૈઃ ।
ન તત્ફલમવાપ્નોતિ યત્માંસપરિવર્જનાત્ ॥ ૫.૫૪॥

માં સ ભક્ષયિતાઽમુત્ર યસ્ય માંસમિહાદ્મ્યહમ્ ।
એતત્માંસસ્ય માંસત્વં પ્રવદન્તિ મનીષિણઃ ॥ ૫.૫૫॥

ન માંસભક્ષણે દોષો ન મદ્યે ન ચ મૈથુને ।
પ્રવૃત્તિરેષા ભૂતાનાં નિવૃત્તિસ્તુ મહાફલા ॥ ૫.૫૬॥

પ્રેતશુદ્ધિં પ્રવક્ષ્યામિ દ્રવ્યશુદ્ધિં તથૈવ ચ ।
ચતુર્ણામપિ વર્ણાનાં યથાવદનુપૂર્વશઃ ॥ ૫.૫૭॥

દન્તજાતેઽનુજાતે ચ કૃતચૂડે ચ સંસ્થિતે ।
અશુદ્ધા બાન્ધવાઃ સર્વે સૂતકે ચ તથોચ્યતે ॥ ૫.૫૮॥

દશાહં શાવમાશૌચં સપિણ્ડેષુ વિધીયતે ।
અર્વાક્સઞ્ચયનાદસ્થ્નાં ત્ર્યહમેકાહમેવ વા ॥ ૫.૫૯॥

સપિણ્ડતા તુ પુરુષે સપ્તમે વિનિવર્તતે ।
સમાનોદકભાવસ્તુ જન્મનામ્નોરવેદને ॥ ૫.૬૦॥

યથેદં શાવમાશૌચં સપિણ્ડેષુ વિધીયતે ।
જનનેઽપ્યેવમેવ સ્યાન્નિપુણં શુદ્ધિમિચ્છતામ્ ॥ ૫.૬૧॥

સર્વેષાં શાવમાશૌચં માતાપિત્રોસ્તુ સૂતકમ્ ।
(જનનેઽપ્યેવમેવ સ્યાન્ માતાપિત્રોસ્તુ સૂતકમ્ ।)
સૂતકં માતુરેવ સ્યાદુપસ્પૃશ્ય પિતા શુચિઃ ॥ ૫.૬૨॥

નિરસ્ય તુ પુમાંશુક્રમુપસ્પૃસ્યૈવ શુધ્યતિ ।
બૈજિકાદભિસમ્બન્ધાદનુરુન્ધ્યાદઘં ત્ર્યહમ્ ॥ ૫.૬૩॥

અહ્ના ચૈકેન રાત્ર્યા ચ ત્રિરાત્રૈરેવ ચ ત્રિભિઃ ।
શવસ્પૃશો વિશુધ્યન્તિ ત્ર્યહાદુદકદાયિનઃ ॥ ૫.૬૪॥

ગુરોઃ પ્રેતસ્ય શિષ્યસ્તુ પિતૃમેધં સમાચરન્ ।
પ્રેતહારૈઃ સમં તત્ર દશરાત્રેણ શુધ્યતિ ॥ ૫.૬૫॥ પ્રેતાહારૈઃ

રાત્રિભિર્માસતુલ્યાભિર્ગર્ભસ્રાવે વિશુધ્યતિ ।
રજસ્યુપરતે સાધ્વી સ્નાનેન સ્ત્રી રજસ્વલા ॥ ૫.૬૬॥

નૃણામકૃતચૂડાનાં વિશુદ્ધિર્નૈશિકી સ્મૃતા ।
નિર્વૃત્તચૂડકાનાં તુ ત્રિરાત્રાત્શુદ્ધિરિષ્યતે ॥ ૫.૬૭॥ નિર્વૃત્તમુણ્ડકાનાં

ઊનદ્વિવાર્ષિકં પ્રેતં નિદધ્યુર્બાન્ધવા બહિઃ ।
અલઙ્કૃત્ય શુચૌ ભૂમાવસ્થિસઞ્ચયનાદૃતે ॥ ૫.૬૮॥

નાસ્ય કાર્યોઽગ્નિસંસ્કારો ન ચ કાર્યોદકક્રિયા ।
અરણ્યે કાષ્ઠવત્ત્યક્ત્વા ક્ષપેયુસ્ત્ર્યહમેવ તુ ॥ ૫.૬૯॥ ક્ષપેત ત્ર્યહમેવ ચ

નાત્રિવર્ષસ્ય કર્તવ્યા બાન્ધવૈરુદકક્રિયા ।
જાતદન્તસ્ય વા કુર્યુર્નામ્નિ વાઽપિ કૃતે સતિ ॥ ૫.૭૦॥

સબ્રહ્મચારિણ્યેકાહમતીતે ક્ષપણં સ્મૃતમ્ ।
જન્મન્યેકોદકાનાં તુ ત્રિરાત્રાત્શુદ્ધિરિષ્યતે ॥ ૫.૭૧॥

સ્ત્રીણામસંસ્કૃતાનાં તુ ત્ર્યહાત્શુધ્યન્તિ બાન્ધવાઃ ।
યથોક્તેનૈવ કલ્પેન શુધ્યન્તિ તુ સનાભયઃ ॥ ૫.૭૨॥

અક્ષારલવણાન્નાઃ સ્યુર્નિમજ્જેયુશ્ચ તે ત્ર્યહમ્ ।
માંસાશનં ચ નાશ્નીયુઃ શયીરંશ્ચ પૃથક્ક્ષિતૌ ॥ ૫.૭૩॥

સંનિધાવેષ વૈ કલ્પઃ શાવાશૌચસ્ય કીર્તિતઃ ।
અસંનિધાવયં જ્ઞેયો વિધિઃ સમ્બન્ધિબાન્ધવૈઃ ॥ ૫.૭૪॥

વિગતં તુ વિદેશસ્થં શ‍ૃણુયાદ્યો હ્યનિર્દશમ્ ।
યત્શેષં દશરાત્રસ્ય તાવદેવાશુચિર્ભવેત્ ॥ ૫.૭૫॥

અતિક્રાન્તે દશાહે ચ ત્રિરાત્રમશુચિર્ભવેત્ ।
સંવત્સરે વ્યતીતે તુ સ્પૃષ્ટ્વૈવાપો વિશુધ્યતિ ॥ ૫.૭૬॥

નિર્દશં જ્ઞાતિમરણં શ્રુત્વા પુત્રસ્ય જન્મ ચ ।
સવાસા જલમાપ્લુત્ય શુદ્ધો ભવતિ માનવઃ ॥ ૫.૭૭॥

બાલે દેશાન્તરસ્થે ચ પૃથક્પિણ્ડે ચ સંસ્થિતે ।
સવાસા જલમાપ્લુત્ય સદ્ય એવ વિશુધ્યતિ ॥ ૫.૭૮॥

અન્તર્દશાહે સ્યાતાં ચેત્પુનર્મરણજન્મની । ચેત્સ્યાતાં
તાવત્સ્યાદશુચિર્વિપ્રો યાવત્તત્સ્યાદનિર્દશમ્ ॥ ૫.૭૯॥

ત્રિરાત્રમાહુરાશૌચમાચાર્યે સંસ્થિતે સતિ ।
તસ્ય પુત્રે ચ પત્ન્યાં ચ દિવારાત્રમિતિ સ્થિતિઃ ॥ ૫.૮૦॥

શ્રોત્રિયે તૂપસમ્પન્ને ત્રિરાત્રમશુચિર્ભવેત્ ।
માતુલે પક્ષિણીં રાત્રિં શિષ્યર્ત્વિગ્બાન્ધવેષુ ચ ॥ ૫.૮૧॥

પ્રેતે રાજનિ સજ્યોતિર્યસ્ય સ્યાદ્વિષયે સ્થિતઃ ।
અશ્રોત્રિયે ત્વહઃ કૃત્સ્નમનૂચાને તથા ગુરૌ ॥ ૫.૮૨॥ કૃત્સ્નાં

શુદ્ધ્યેદ્વિપ્રો દશાહેન દ્વાદશાહેન ભૂમિપઃ ।
વૈશ્યઃ પઞ્ચદશાહેન શૂદ્રો માસેન શુધ્યતિ ॥ ૫.૮૩॥

ન વર્ધયેદઘાહાનિ પ્રત્યૂહેન્નાગ્નિષુ ક્રિયાઃ ।
ન ચ તત્કર્મ કુર્વાણઃ સનાભ્યોઽપ્યશુચિર્ભવેત્ ॥ ૫.૮૪॥

દિવાકીર્તિમુદક્યાં ચ પતિતં સૂતિકાં તથા ।
શવં તત્સ્પૃષ્ટિનં ચૈવ સ્પૃષ્ટ્વા સ્નાનેન શુધ્યતિ ॥ ૫.૮૫॥

આચમ્ય પ્રયતો નિત્યં જપેદશુચિદર્શને ।
સૌરાન્ મન્ત્રાન્ યથોત્સાહં પાવમાનીશ્ચ શક્તિતઃ ॥ ૫.૮૬॥

નારં સ્પૃષ્ટ્વાઽસ્થિ સસ્નેહં સ્નાત્વા વિપ્રો વિશુધ્યતિ ।
આચમ્યૈવ તુ નિઃસ્નેહં ગામાલભ્યાર્કમીક્ષ્ય વા ॥ ૫.૮૭॥

આદિષ્ટી નોદકં કુર્યાદા વ્રતસ્ય સમાપનાત્ ।
સમાપ્તે તૂદકં કૃત્વા ત્રિરાત્રેણૈવ શુધ્યતિ ॥ ૫.૮૮॥

વૃથાસઙ્કરજાતાનાં પ્રવ્રજ્યાસુ ચ તિષ્ઠતામ્ ॥

આત્મનસ્ત્યાગિનાં ચૈવ નિવર્તેતોદકક્રિયા ॥ ૫.૮૯॥

પાષણ્ડમાશ્રિતાનાં ચ ચરન્તીનાં ચ કામતઃ ।
ગર્ભભર્તૃદ્રુહાં ચૈવ સુરાપીનાં ચ યોષિતામ્ ॥ ૫.૯૦॥

આચાર્યં સ્વમુપાધ્યાયં પિતરં માતરં ગુરુમ્ ।
નિર્હૃત્ય તુ વ્રતી પ્રેતાન્ન વ્રતેન વિયુજ્યતે ॥ ૫.૯૧॥

દક્ષિણેન મૃતં શૂદ્રં પુરદ્વારેણ નિર્હરેત્ ।
પશ્ચિમૌત્તરપૂર્વૈસ્તુ યથાયોગં દ્વિજન્મનઃ ॥ ૫.૯૨॥

ન રાજ્ઞામઘદોષોઽસ્તિ વ્રતિનાં ન ચ સત્રિણામ્ ।
ઐન્દ્રં સ્થાનમુપાસીના બ્રહ્મભૂતા હિ તે સદા ॥ ૫.૯૩॥

રાજ્ઞો મહાત્મિકે સ્થાને સદ્યઃશૌચં વિધીયતે ।
પ્રજાનાં પરિરક્ષાર્થમાસનં ચાત્ર કારણમ્ ॥ ૫.૯૪॥

ડિમ્ભાહવહતાનાં ચ વિદ્યુતા પાર્થિવેન ચ । ડિમ્બાહવહતાનાં
ગોબ્રાહ્મણસ્ય ચેવાર્થે યસ્ય ચૈચ્છતિ પાર્થિવઃ ॥ ૫.૯૫॥

સોમાગ્ન્યર્કાનિલેન્દ્રાણાં વિત્તાપ્પત્યોર્યમસ્ય ચ ।
અષ્ટાનાં લોકપાલાનાં વપુર્ધારયતે નૃપઃ ॥ ૫.૯૬॥

લોકેશાધિષ્ઠિતો રાજા નાસ્યાશૌચં વિધીયતે ।
શૌચાશૌચં હિ મર્ત્યાનાં લોકેભ્યઃ પ્રભવાપ્યયૌ ॥ ૫.૯૭॥

ઉદ્યતૈરાહવે શસ્ત્રૈઃ ક્ષત્રધર્મહતસ્ય ચ ।
સદ્યઃ સંતિષ્ઠતે યજ્ઞસ્તથાઽશૌચમિતિ સ્થિતિઃ ॥ ૫.૯૮॥

વિપ્રઃ શુધ્યત્યપઃ સ્પૃષ્ટ્વા ક્ષત્રિયો વાહનાયુધમ્ ।
વૈશ્યઃ પ્રતોદં રશ્મીન્ વા યષ્ટિં શૂદ્રઃ કૃતક્રિયઃ ॥ ૫.૯૯॥

એતદ્વોઽભિહિતં શૌચં સપિણ્ડેષુ દ્વિજોત્તમાઃ ।
અસપિણ્ડેષુ સર્વેષુ પ્રેતશુદ્ધિં નિબોધત ॥ ૫.૧૦૦॥

અસપિણ્ડં દ્વિજં પ્રેતં વિપ્રો નિર્હૃત્ય બન્ધુવત્ ।
વિશુધ્યતિ ત્રિરાત્રેણ માતુરાપ્તાંશ્ચ બાન્ધવાન્ ॥ ૫.૧૦૧॥

યદ્યન્નમત્તિ તેષાં તુ દશાહેનૈવ શુધ્યતિ ।
અનદન્નન્નમહ્નૈવ ન ચેત્તસ્મિન્ ગૃહે વસેત્ ॥ ૫.૧૦૨॥

અનુગમ્યેચ્છયા પ્રેતં જ્ઞાતિમજ્ઞાતિમેવ ચ । અજ્ઞાતિમેવ વા
સ્નાત્વા સચૈલઃ સ્પૃષ્ટ્વાઽગ્નિં ઘૃતં પ્રાશ્ય વિશુધ્યતિ ॥ ૫.૧૦૩॥ સચૈલં, વિશુદ્ધ્યતિ

ન વિપ્રં સ્વેષુ તિષ્ઠત્સુ મૃતં શૂદ્રેણ નાયયેત્ ।
અસ્વર્ગ્યા હ્યાહુતિઃ સા સ્યાત્શૂદ્રસંસ્પર્શદૂષિતા ॥ ૫.૧૦૪॥

જ્ઞાનં તપોઽગ્નિરાહારો મૃન્મનો વાર્યુપાઞ્જનમ્ ।
વાયુઃ કર્માર્કકાલૌ ચ શુદ્ધેઃ કર્તૄણિ દેહિનામ્ ॥ ૫.૧૦૫॥

સર્વેષામેવ શૌચાનામર્થશૌચં પરં સ્મૃતમ્ ।
યોઽર્થે શુચિર્હિ સ શુચિર્ન મૃદ્વારિશુચિઃ શુચિઃ ॥ ૫.૧૦૬॥

ક્ષાન્ત્યા શુધ્યન્તિ વિદ્વાંસો દાનેનાકાર્યકારિણઃ । શુદ્ધ્યન્તિ
પ્રચ્છન્નપાપા જપ્યેન તપસા વેદવિત્તમાઃ ॥ ૫.૧૦૭॥

મૃત્તોયૈઃ શુધ્યતે શોધ્યં નદી વેગેન શુધ્યતિ ।
રજસા સ્ત્રી મનોદુષ્ટા સંન્યાસેન દ્વિજોત્તમાઃ ॥ ૫.૧૦૮॥

અદ્ભિર્ગાત્રાણિ શુધ્યન્તિ મનઃ સત્યેન શુધ્યતિ ।
વિદ્યાતપોભ્યાં ભૂતાત્મા બુદ્ધિર્જ્ઞાનેન શુધ્યતિ ॥ ૫.૧૦૯॥ શુદ્ધ્યતિ

એષ શૌચસ્ય વઃ પ્રોક્તઃ શરીરસ્ય વિનિર્ણયઃ ।
નાનાવિધાનાં દ્રવ્યાણાં શુદ્ધેઃ શ઼ૃણુત નિર્ણયમ્ ॥ ૫.૧૧૦॥

તૈજસાનાં મણીનાં ચ સર્વસ્યાશ્મમયસ્ય ચ ।
ભસ્મનાઽદ્ભિર્મૃદા ચૈવ શુદ્ધિરુક્તા મનીષિભિઃ ॥ ૫.૧૧૧॥

નિર્લેપં કાઞ્ચનં ભાણ્ડમદ્ભિરેવ વિશુધ્યતિ । વિશુદ્ધ્યતિ
અબ્જમશ્મમયં ચૈવ રાજતં ચાનુપસ્કૃતમ્ ॥ ૫.૧૧૨॥

અપામગ્નેશ્ચ સંયોગાદ્ધૈમં રૌપ્યં ચ નિર્બભૌ ।
તસ્માત્તયોઃ સ્વયોન્યૈવ નિર્ણેકો ગુણવત્તરઃ ॥ ૫.૧૧૩॥

તામ્રાયસ્કાંસ્યરૈત્યાનાં ત્રપુણઃ સીસકસ્ય ચ ।
શૌચં યથાર્હં કર્તવ્યં ક્ષારામ્લોદકવારિભિઃ ॥ ૫.૧૧૪॥

દ્રવાણાં ચૈવ સર્વેષાં શુદ્ધિરુત્પવનં સ્મૃતમ્ ।
પ્રોક્ષણં સંહતાનાં ચ દારવાણાં ચ તક્ષણમ્ ॥ ૫.૧૧૫॥

માર્જનં યજ્ઞપાત્રાણાં પાણિના યજ્ઞકર્મણિ ।
ચમસાનાં ગ્રહાણાં ચ શુદ્ધિઃ પ્રક્ષાલનેન તુ ॥ ૫.૧૧૬॥

ચરૂણાં સ્રુક્સ્રુવાણાં ચ શુદ્ધિરુષ્ણેન વારિણા ।
સ્ફ્યશૂર્પશકટાનાં ચ મુસલોલૂખલસ્ય ચ ॥ ૫.૧૧૭॥

અદ્ભિસ્તુ પ્રોક્ષણં શૌચં બહૂનાં ધાન્યવાસસામ્ ।
પ્રક્ષાલનેન ત્વલ્પાનામદ્ભિઃ શૌચં વિધીયતે ॥ ૫.૧૧૮॥

ચૈલવત્ચર્મણાં શુદ્ધિર્વૈદલાનાં તથૈવ ચ ।
શાકમૂલફલાનાં ચ ધાન્યવત્શુદ્ધિરિષ્યતે ॥ ૫.૧૧૯॥

કૌશેયાવિકયોરૂષૈઃ કુતપાનામરિષ્ટકૈઃ ।
શ્રીફલૈરંશુપટ્ટાનાં ક્ષૌમાણાં ગૌરસર્ષપૈઃ ॥ ૫.૧૨૦॥

ક્ષૌમવત્શઙ્ખશૃઙ્ગાણામસ્થિદન્તમયસ્ય ચ ।
શુદ્ધિર્વિજાનતા કાર્યા ગોમૂત્રેણૌદકેન વા ॥ ૫.૧૨૧॥

પ્રોક્ષણાત્તૃણકાષ્ઠં ચ પલાલં ચૈવ શુધ્યતિ ।
માર્જનૌપાઞ્જનૈર્વેશ્મ પુનઃપાકેન મૃણમયમ્ ॥ ૫.૧૨૨॥

મદ્યૈર્મૂત્રૈઃ પુરીષૈર્વા ષ્ઠીવનૈઃ પૂયશોણિતૈઃ ।
સંસ્પૃષ્ટં નૈવ શુદ્ધ્યેત પુનઃપાકેન મૃત્મયમ્ ॥ ૫.૧૨૩॥

સંમાર્જનૌપાઞ્જનેન સેકેનૌલ્લેખનેન ચ ।
ગવાં ચ પરિવાસેન ભૂમિઃ શુદ્ધ્યતિ પઞ્ચભિઃ ॥ ૫.૧૨૪॥

પક્ષિજગ્ધં ગવા ઘ્રાતમવધૂતમવક્ષુતમ્ ।
દૂષિતં કેશકીટૈશ્ચ મૃત્પ્રક્ષેપેણ શુધ્યતિ ॥ ૫.૧૨૫॥

યાવન્નાપેત્યમેધ્યાક્તાદ્ગન્ધો લેપશ્ચ તત્કૃતઃ ।
તાવન્ મૃદ્વારિ ચાદેયં સર્વાસુ દ્રવ્યશુદ્ધિષુ ॥ ૫.૧૨૬॥

ત્રીણિ દેવાઃ પવિત્રાણિ બ્રાહ્મણાનામકલ્પયન્ ।
અદૃષ્ટમદ્ભિર્નિર્ણિક્તં યચ્ચ વાચા પ્રશસ્યતે ॥ ૫.૧૨૭॥

આપઃ શુદ્ધા ભૂમિગતા વૈતૃષ્ણ્યં યાસુ ગોર્ભવેત્ ।

અવ્યાપ્તાશ્ચેદમેધ્યેન ગન્ધવર્ણરસાન્વિતાઃ ॥ ૫.૧૨૮॥

નિત્યં શુદ્ધઃ કારુહસ્તઃ પણ્યે યચ્ચ પ્રસારિતમ્ । પણ્યં
બ્રહ્મચારિગતં ભૈક્ષ્યં નિત્યં મેધ્યમિતિ સ્થિતિઃ ॥ ૫.૧૨૯॥

નિત્યમાસ્યં શુચિ સ્ત્રીણાં શકુનિઃ ફલપાતને ।
પ્રસ્રવે ચ શુચિર્વત્સઃ શ્વા મૃગગ્રહણે શુચિઃ ॥ ૫.૧૩૦॥

શ્વભિર્હતસ્ય યન્ માંસં શુચિ તન્ મનુરબ્રવીત્ ।
ક્રવ્યાદ્ભિશ્ચ હતસ્યાન્યૈશ્ચણ્ડાલાદ્યૈશ્ચ દસ્યુભિઃ ॥ ૫.૧૩૧॥

ઊર્ધ્વં નાભેર્યાનિ ખાનિ તાનિ મેધ્યાનિ સર્વશઃ ।
યાન્યધસ્તાન્યમેધ્યાનિ દેહાચ્ચૈવ મલાશ્ચ્યુતાઃ ॥ ૫.૧૩૨॥

મક્ષિકા વિપ્રુષશ્છાયા ગૌરશ્વઃ સૂર્યરશ્મયઃ ।
રજો ભૂર્વાયુરગ્નિશ્ચ સ્પર્શે મેધ્યાનિ નિર્દિશેત્ ॥ ૫.૧૩૩॥

વિણ્મૂત્રોત્સર્ગશુદ્ધ્યર્થં મૃદ્વાર્યાદેયમર્થવત્ ।
દૈહિકાનાં મલાનાં ચ શુદ્ધિષુ દ્વાદશસ્વપિ ॥ ૫.૧૩૪॥

વસા શુક્રમસૃઙ્મજ્જા મૂત્રવિડ્ઘ્રાણકર્ણવિટ્ ।
શ્લેશ્માશ્રુ દૂષિકા સ્વેદો દ્વાદશૈતે નૃણાં મલાઃ ॥ ૫.૧૩૫॥

એકા લિઙ્ગે ગુદે તિસ્રસ્તથૈકત્ર કરે દશ ।
ઉભયોઃ સપ્ત દાતવ્યા મૃદઃ શુદ્ધિમભીપ્સતા ॥ ૫.૧૩૬॥

એતત્શૌચં ગૃહસ્થાનાં દ્વિગુણં બ્રહ્મચારિણામ્ ।
ત્રિગુણં સ્યાદ્વનસ્થાનાં યતીનાં તુ ચતુર્ગુણમ્ ॥ ૫.૧૩૭॥

કૃત્વા મૂત્રં પુરીષં વા ખાન્યાચાન્ત ઉપસ્પૃશેત્ ।
વેદમધ્યેષ્યમાણશ્ચ અન્નમશ્નંશ્ચ સર્વદા ॥ ૫.૧૩૮॥

ત્રિરાચામેદપઃ પૂર્વં દ્વિઃ પ્રમૃજ્યાત્તતો મુખમ્ ।
શરીરં શૌચમિચ્છન્ હિ સ્ત્રી શૂદ્રસ્તુ સકૃત્સકૃત્ ॥ ૫.૧૩૯॥

શૂદ્રાણાં માસિકં કાર્યં વપનં ન્યાયવર્તિનામ્ ।
વૈશ્યવત્શૌચકલ્પશ્ચ દ્વિજોચ્છિષ્ટં ચ ભોજનમ્ ॥ ૫.૧૪૦॥

નોચ્છિષ્ટં કુર્વતે મુખ્યા વિપ્રુષોઽઙ્ગં ન યાન્તિ યાઃ ।
ન શ્મશ્રૂણિ ગતાન્યાસ્યં ન દન્તાન્તરધિષ્ઠિતમ્ ॥ ૫.૧૪૧॥

સ્પૃશન્તિ બિન્દવઃ પાદૌ ય આચામયતઃ પરાન્ ।
ભૌમિકૈસ્તે સમા જ્ઞેયા ન તૈરાપ્રયતો ભવેત્ ॥ ૫.૧૪૨॥ અપ્રયતો

ઉચ્છિષ્ટેન તુ સંસ્પૃષ્ટો દ્રવ્યહસ્તઃ કથં ચન ।
અનિધાયૈવ તદ્દ્રવ્યમાચાન્તઃ શુચિતામિયાત્ ॥ ૫.૧૪૩॥

વાન્તો વિરિક્તઃ સ્નાત્વા તુ ઘૃતપ્રાશનમાચરેત્ ।
આચામેદેવ ભુક્ત્વાઽન્નં સ્નાનં મૈથુનિનઃ સ્મૃતમ્ ॥ ૫.૧૪૪॥

સુપ્ત્વા ક્ષુત્વા ચ ભુક્ત્વા ચ નિષ્ઠીવ્યૌક્ત્વાઽનૃતાનિ ચ ।
પીત્વાઽપોઽધ્યેષ્યમાણશ્ચ આચામેત્પ્રયતોઽપિ સન્ ॥ ૫.૧૪૫॥

એષાં શૌચવિધિઃ કૃત્સ્નો દ્રવ્યશુદ્ધિસ્તથૈવ ચ । એષ
ઉક્તો વઃ સર્વવર્ણાનાં સ્ત્રીણાં ધર્માન્નિબોધત ॥ ૫.૧૪૬॥

બાલયા વા યુવત્યા વા વૃદ્ધયા વાઽપિ યોષિતા ।
ન સ્વાતન્ત્ર્યેણ કર્તવ્યં કિં ચિદ્કાર્યં ગૃહેષ્વપિ ॥ ૫.૧૪૭॥

બાલ્યે પિતુર્વશે તિષ્ઠેત્પાણિગ્રાહસ્ય યૌવને ।
પુત્રાણાં ભર્તરિ પ્રેતે ન ભજેત્સ્ત્રી સ્વતન્ત્રતામ્ ॥ ૫.૧૪૮॥

પિત્રા ભર્ત્રા સુતૈર્વાઽપિ નેચ્છેદ્વિરહમાત્મનઃ ।
એષાં હિ વિરહેણ સ્ત્રી ગર્હ્યે કુર્યાદુભે કુલે ॥ ૫.૧૪૯॥

સદા પ્રહૃષ્ટયા ભાવ્યં ગૃહકાર્યે ચ દક્ષયા ।
સુસંસ્કૃતોપસ્કરયા વ્યયે ચામુક્તહસ્તયા ॥ ૫.૧૫૦॥

યસ્મૈ દદ્યાત્પિતા ત્વેનાં ભ્રાતા વાઽનુમતે પિતુઃ ।
તં શુશ્રૂષેત જીવન્તં સંસ્થિતં ચ ન લઙ્ઘયેત્ ॥ ૫.૧૫૧॥

મઙ્ગલાર્થં સ્વસ્ત્યયનં યજ્ઞશ્ચાસાં પ્રજાપતેઃ ।
પ્રયુજ્યતે વિવાહે તુ પ્રદાનં સ્વામ્યકારણમ્ ॥ ૫.૧૫૨॥

અનૃતાવૃતુકાલે ચ મન્ત્રસંસ્કારકૃત્પતિઃ ।
સુખસ્ય નિત્યં દાતૈહ પરલોકે ચ યોષિતઃ ॥ ૫.૧૫૩॥

વિશીલઃ કામવૃત્તો વા ગુણૈર્વા પરિવર્જિતઃ ।
ઉપચાર્યઃ સ્ત્રિયા સાધ્વ્યા સતતં દેવવત્પતિઃ ॥ ૫.૧૫૪॥

નાસ્તિ સ્ત્રીણાં પૃથગ્યજ્ઞો ન વ્રતં નાપ્યુપોષણમ્ । ઉપોષિતમ્
પતિં શુશ્રૂષતે યેન તેન સ્વર્ગે મહીયતે ॥ ૫.૧૫૫॥

પાણિગ્રાહસ્ય સાધ્વી સ્ત્રી જીવતો વા મૃતસ્ય વા ।
પતિલોકમભીપ્સન્તી નાચરેત્કિંચિદપ્રિયમ્ ॥ ૫.૧૫૬॥

કામં તુ ક્ષપયેદ્દેહં પુષ્પમૂલફલૈઃ શુભૈઃ ।
ન તુ નામાપિ ગૃહ્ણીયાત્પત્યૌ પ્રેતે પરસ્ય તુ ॥ ૫.૧૫૭॥

આસીતામરણાત્ક્ષાન્તા નિયતા બ્રહ્મચારિણી ।
યો ધર્મ એકપત્નીનાં કાઙ્ક્ષન્તી તમનુત્તમમ્ ॥ ૫.૧૫૮॥

અનેકાનિ સહસ્રાણિ કુમારબ્રહ્મચારિણામ્ ।
દિવં ગતાનિ વિપ્રાણામકૃત્વા કુલસંતતિમ્ ॥ ૫.૧૫૯॥

મૃતે ભર્તરિ સાધ્વી સ્ત્રી બ્રહ્મચર્યે વ્યવસ્થિતા ।
સ્વર્ગં ગચ્છત્યપુત્રાઽપિ યથા તે બ્રહ્મચારિણઃ ॥ ૫.૧૬૦॥

અપત્યલોભાદ્યા તુ સ્ત્રી ભર્તારમતિવર્તતે ।
સેહ નિન્દામવાપ્નોતિ પરલોકાચ્ચ હીયતે ॥ ૫.૧૬૧॥

નાન્યોત્પન્ના પ્રજાઽસ્તીહ ન ચાપ્યન્યપરિગ્રહે । ન ચાન્યસ્ય પરિગ્રહે
ન દ્વિતીયશ્ચ સાધ્વીનાં ક્વ ચિદ્ભર્તોપદિશ્યતે ॥ ૫.૧૬૨॥

પતિં હિત્વાઽપકૃષ્ટં સ્વમુત્કૃષ્ટં યા નિષેવતે । હિત્વાઽવકૃષ્ટં
નિન્દ્યૈવ સા ભવેલ્લોકે પરપૂર્વેતિ ચૌચ્યતે ॥ ૫.૧૬૩॥

વ્યભિચારાત્તુ ભર્તુઃ સ્ત્રી લોકે પ્રાપ્નોતિ નિન્દ્યતામ્ । વ્યભિચારે તુ
શ◌ૃગાલયોનિં પ્રાપ્નોતિ પાપરોગૈશ્ચ પીડ્યતે ॥ ૫.૧૬૪॥

પતિં યા નાભિચરતિ મનોવાગ્દેહસંયુતા । દેહસંયતા
સા ભર્તૃલોકમાપ્નોતિ સદ્ભિઃ સાધ્વીતિ ચોચ્યતે ॥ ૫.૧૬૫॥

અનેન નારી વૃત્તેન મનોવાગ્દેહસંયતા ।
ઇહાગ્ર્યાં કીર્તિમાપ્નોતિ પતિલોકં પરત્ર ચ ॥ ૫.૧૬૬॥

એવં વૃત્તાં સવર્ણાં સ્ત્રીં દ્વિજાતિઃ પૂર્વમારિણીમ્ ।
દાહયેદગ્નિહોત્રેણ યજ્ઞપાત્રૈશ્ચ ધર્મવિત્ ॥ ૫.૧૬૭॥

ભાર્યાયૈ પૂર્વમારિણ્યૈ દત્ત્વાઽગ્નીનન્ત્યકર્મણિ ।
પુનર્દારક્રિયાં કુર્યાત્પુનરાધાનમેવ ચ ॥ ૫.૧૬૮॥

અનેન વિધિના નિત્યં પઞ્ચયજ્ઞાન્ન હાપયેત્ ।

દ્વિતીયમાયુષો ભાગં કૃતદારો ગૃહે વસેત્ ॥ ૫.૧૬૯॥

## અધ્યાય ૬

એવં ગૃહાશ્રમે સ્થિત્વા વિધિવત્સ્નાતકો દ્વિજઃ ।
વને વસેત્તુ નિયતો યથાવદ્વિજિતૈન્દ્રિયઃ ॥ ૬.૧॥

ગૃહસ્થસ્તુ યથા પશ્યેદ્વલીપલિતમાત્મનઃ ।
અપત્યસ્યૈવ ચાપત્યં તદાઽરણ્યં સમાશ્રયેત્ ॥ ૬.૨॥

સંત્યજ્ય ગ્રામ્યમાહારં સર્વં ચૈવ પરિચ્છદમ્ ।
પુત્રેષુ ભાર્યાં નિક્ષિપ્ય વનં ગચ્છેત્સહૈવ વા ॥ ૬.૩॥

અગ્નિહોત્રં સમાદાય ગૃહ્યં ચાગ્નિપરિચ્છદમ્ ।
ગ્રામાદરણ્યં નિઃસૃત્ય નિવસેન્નિયતેન્દ્રિયઃ ॥ ૬.૪॥ નિષ્ક્રમ્ય

મુન્યન્નૈર્વિવિધૈર્મેધ્યૈઃ શાકમૂલફલેન વા ।
એતાનેવ મહાયજ્ઞાન્નિર્વપેદ્વિધિપૂર્વકમ્ ॥ ૬.૫॥

વસીત ચર્મ ચીરં વા સાયં સ્નાયાત્પ્રગે તથા ।
જટાશ્ચ બિભૃયાન્નિત્યં શ્મશ્રુલોમનખાનિ ચ ॥ ૬.૬॥

યદ્ભક્ષ્યં સ્યાદ્તતો દદ્યાદ્બલિં ભિક્ષાં ચ શક્તિતઃ । યદ્ભક્ષઃ
અબ્મૂલફલભિક્ષાભિરર્ચયેદાશ્રમાગતાન્ ॥ ૬.૭॥ :આશ્રમાગતં

સ્વાધ્યાયે નિત્યયુક્તઃ સ્યાદ્દાન્તો મૈત્રઃ સમાહિતઃ ।
દાતા નિત્યમનાદાતા સર્વભૂતાનુકમ્પકઃ ॥ ૬.૮॥

વૈતાનિકં ચ જુહુયાદગ્નિહોત્રં યથાવિધિ ।
દર્શમસ્કન્દયન્ પર્વ પૌર્ણમાસં ચ યોગતઃ ॥ ૬.૯॥

ઋક્ષેષ્ટ્ય્।આગ્રયણં ચૈવ ચાતુર્માસ્યાનિ ચાહરેત્ । દર્શેષ્ટ્ય્।આગ્રયણં
તુરાયણં ચ ક્રમશો દક્ષસ્યાયનમેવ ચ ॥ ૬.૧૦॥ દાક્ષસ્યાયનં

વાસન્તશારદૈર્મેધ્યૈર્મુન્યન્નૈઃ સ્વયમાહૃતૈઃ ।
પુરોડાશાંશ્ચરૂંશ્ચૈવ વિધિવન્નિર્વપેત્પૃથક્ ॥ ૬.૧૧॥

દેવતાભ્યસ્તુ તદ્ધુત્વા વન્યં મેધ્યતરં હવિઃ ।
શેષમાત્મનિ યુઞ્જીત લવણં ચ સ્વયં કૃતમ્ ॥ ૬.૧૨॥

સ્થલજૌદકશાકાનિ પુષ્પમૂલફલાનિ ચ ।
મેધ્યવૃક્ષોદ્ભવાન્યદ્યાત્સ્નેહાંશ્ચ ફલસમ્ભવાન્ ॥ ૬.૧૩॥

વર્જયેન્ મધુ માંસં ચ ભૌમાનિ કવકાનિ ચ ।
ભૂસ્તૃણં શિગ્રુકં ચૈવ શ્લેશ્માતકફલાનિ ચ ॥ ૬.૧૪॥

ત્યજેદાશ્વયુજે માસિ મુન્યન્નં પૂર્વસઞ્ચિતમ્ ।
જીર્ણાનિ ચૈવ વાસાંસિ શાકમૂલફલાનિ ચ ॥ ૬.૧૫॥

ન ફાલકૃષ્ટમશ્નીયાદુત્સૃષ્ટમપિ કેન ચિત્ ।
ન ગ્રામજાતાન્યાર્તોઽપિ મૂલાણિ ચ ફલાનિ ચ ॥ ૬.૧૬॥ પુષ્પાનિ ચ ફલાનિ ચ

અગ્નિપક્વાશનો વા સ્યાત્કાલપક્વભુજેવ વા ।
અશ્મકુટ્ટો ભવેદ્વાઽપિ દન્તોલૂખલિકોઽપિ વા ॥ ૬.૧૭॥

સદ્યઃ પ્રક્ષાલકો વા સ્યાન્ માસસઞ્ચયિકોઽપિ વા ।
ષણ્માસનિચયો વા સ્યાત્સમાનિચય એવ વા ॥ ૬.૧૮॥

નક્તં ચાન્નં સમશ્નીયાદ્દિવા વાઽહૃત્ય શક્તિતઃ ।
ચતુર્થકાલિકો વા સ્યાત્સ્યાદ્વાઽપ્યષ્ટમકાલિકઃ ॥ ૬.૧૯॥

ચાન્દ્રાયણવિધાનૈર્વા શુક્લકૃષ્ણે ચ વર્તયેત્ ।
પક્ષાન્તયોર્વાઽપ્યશ્નીયાદ્યવાગૂં ક્વથિતાં સકૃત્ ॥ ૬.૨૦॥

પુષ્પમૂલફલૈર્વાઽપિ કેવલૈર્વર્તયેત્સદા ।
કાલપક્વૈઃ સ્વયં શીર્ણૈર્વૈખાનસમતે સ્થિતઃ ॥ ૬.૨૧॥

ભૂમૌ વિપરિવર્તેત તિષ્ઠેદ્વા પ્રપદૈર્દિનમ્ ।
સ્થાનાસનાભ્યાં વિહરેત્સવનેષૂપયન્નપઃ ॥ ૬.૨૨॥

ગ્રીષ્મે પઞ્ચતપાસ્તુ સ્યાદ્વર્ષાસ્વભ્રાવકાશિકઃ ।
આર્દ્રવાસાસ્તુ હેમન્તે ક્રમશો વર્ધયંસ્તપઃ ॥ ૬.૨૩॥

ઉપસ્પૃશંસ્ત્રિષવણં પિતૄન્ દેવાંશ્ચ તર્પયેત્ ।
તપસ્ચરંશ્ચોગ્રતરં શોષયેદ્દેહમાત્મનઃ ॥ ૬.૨૪॥

અગ્નીનાત્મનિ વૈતાનાન્ સમારોપ્ય યથાવિધિ ।
અનગ્નિરનિકેતઃ સ્યાન્ મુનિર્મૂલફલાશનઃ ॥ ૬.૨૫॥

અપ્રયત્નઃ સુખાર્થેષુ બ્રહ્મચારી ધરાઽઽશયઃ ।
શરણેષ્વમમશ્ચૈવ વૃક્ષમૂલનિકેતનઃ ॥ ૬.૨૬॥

તાપસેષ્વેવ વિપ્રેષુ યાત્રિકં ભૈક્ષમાહરેત્ ।
ગૃહમેધિષુ ચાન્યેષુ દ્વિજેષુ વનવાસિષુ ॥ ૬.૨૭॥

ગ્રામાદાહૃત્ય વાઽશ્નીયાદષ્ટૌ ગ્રાસાન્ વને વસન્ ।
પ્રતિગૃહ્ય પુટેનૈવ પાણિના શકલેન વા ॥ ૬.૨૮॥

એતાશ્ચાન્યાશ્ચ સેવેત દીક્ષા વિપ્રો વને વસન્ ।
વિવિધાશ્ચૌપનિષદીરાત્મસંસિદ્ધયે શ્રુતીઃ ॥ ૬.૨૯॥

ઋષિભિર્બ્રાહ્મણૈશ્ચૈવ ગૃહસ્થૈરેવ સેવિતાઃ ।
વિદ્યાતપોવિવૃદ્ધ્યર્થં શરીરસ્ય ચ શુદ્ધયે ॥ ૬.૩૦॥

અપરાજિતાં વાઽસ્થાય વ્રજેદ્દિશમજિહ્મગઃ ।
આ નિપાતાત્શરીરસ્ય યુક્તો વાર્યનિલાશનઃ ॥ ૬.૩૧॥

આસાં મહર્ષિચર્યાણાં ત્યક્ત્વાઽન્યતમયા તનુમ્ ।
વીતશોકભયો વિપ્રો બ્રહ્મલોકે મહીયતે ॥ ૬.૩૨॥

વનેષુ ચ વિહૃત્યૈવં તૃતીયં ભાગમાયુષઃ ।
ચતુર્થમાયુષો ભાગં ત્યક્વા સઙ્ગાન્ પરિવ્રજેત્ ॥ ૬.૩૩॥

આશ્રમાદાશ્રમં ગત્વા હુતહોમો જિતેન્દ્રિયઃ ।
ભિક્ષાબલિપરિશ્રાન્તઃ પ્રવ્રજન્ પ્રેત્ય વર્ધતે ॥ ૬.૩૪॥

ઋણાનિ ત્રીણ્યપાકૃત્ય મનો મોક્ષે નિવેશયેત્ ।
અનપાકૃત્ય મોક્ષં તુ સેવમાનો વ્રજત્યધઃ ॥ ૬.૩૫॥

અધીત્ય વિધિવદ્વેદાન્ પુત્રાંશ્ચોત્પાદ્ય ધર્મતઃ ।
ઇષ્ટ્વા ચ શક્તિતો યજ્ઞૈર્મનો મોક્ષે નિવેશયેત્ ॥ ૬.૩૬॥

અનધીત્ય દ્વિજો વેદાનનુત્પાદ્ય તથા સુતાન્ । તથા પ્રજાં
અનિષ્ટ્વા ચૈવ યજ્ઞૈશ્ચ મોક્ષમિચ્છન્ વ્રજત્યધઃ ॥ ૬.૩૭॥

પ્રાજાપત્યં નિરુપ્યેષ્ટિં સર્વવેદસદક્ષિણામ્ । સાર્વવેદસદક્ષિણામ્
આત્મન્યગ્નીન્ સમારોપ્ય બ્રાહ્મણઃ પ્રવ્રજેદ્ગૃહાત્ ॥ ૬.૩૮॥

યો દત્ત્વા સર્વભૂતેભ્યઃ પ્રવ્રજત્યભયં ગૃહાત્ ।
તસ્ય તેજોમયા લોકા ભવન્તિ બ્રહ્મવાદિનઃ ॥ ૬.૩૯॥

યસ્માદણ્વપિ ભૂતાનાં દ્વિજાન્નોત્પદ્યતે ભયમ્ ।

તસ્ય દેહાદ્વિમુક્તસ્ય ભયં નાસ્તિ કુતશ્ચન ॥ ૬.૪૦॥

અગારાદભિનિષ્ક્રાન્તઃ પવિત્રોપચિતો મુનિઃ ।
સમુપોઢેષુ કામેષુ નિરપેક્ષઃ પરિવ્રજેત્ ॥ ૬.૪૧॥

એક એવ ચરેન્નિત્યં સિદ્ધ્યર્થમસહાયવાન્ ।
સિદ્ધિમેકસ્ય સમ્પશ્યન્ન જહાતિ ન હીયતે ॥ ૬.૪૨॥ સિદ્ધમ્

અનગ્નિરનિકેતઃ સ્યાદ્ગ્રામમન્નાર્થમાશ્રયેત્ ।
ઉપેક્ષકોઽસઙ્કુસુકો મુનિર્ભાવસમાહિતઃ ॥ ૬.૪૩॥ ઽસાઙ્કુસુકો

કપાલં વૃક્ષમૂલાનિ કુચેલમસહાયતા । કુચૈલં
સમતા ચૈવ સર્વસ્મિન્નેતત્મુક્તસ્ય લક્ષણમ્ ॥ ૬.૪૪॥

નાભિનન્દેત મરણં નાભિનન્દેત જીવિતમ્ ।
કાલમેવ પ્રતીક્ષેત નિર્વેશં ભૃતકો યથા ॥ ૬.૪૫॥

દૃષ્ટિપૂતં ન્યસેત્પાદં વસ્ત્રપૂતં જલં પિબેત્ ।
સત્યપૂતાં વદેદ્વાચં મનઃપૂતં સમાચરેત્ ॥ ૬.૪૬॥

અતિવાદાંસ્તિતિક્ષેત નાવમન્યેત કં ચન ।
ન ચેમં દેહમાશ્રિત્ય વૈરં કુર્વીત કેન ચિત્ ॥ ૬.૪૭॥

ક્રુદ્ધ્યન્તં ન પ્રતિક્રુધ્યેદાક્રુષ્ટઃ કુશલં વદેત્ ।
સપ્તદ્વારાવકીર્ણાં ચ ન વાચમનૃતાં વદેત્ ॥ ૬.૪૮॥

અધ્યાત્મરતિરાસીનો નિરપેક્ષો નિરામિષઃ ।
આત્મનૈવ સહાયેન સુખાર્થી વિચરેદિહ ॥ ૬.૪૯॥

ન ચોત્પાતનિમિત્તાભ્યાં ન નક્ષત્રાઙ્ગવિદ્યયા ।
નાનુશાસનવાદાભ્યાં ભિક્ષાં લિપ્સેત કર્હિ ચિત્ ॥ ૬.૫૦॥

ન તાપસૈર્બ્રાહ્મણૈર્વા વયોભિરપિ વા શ્વભિઃ ।
આકીર્ણં ભિક્ષુકૈર્વાઽન્યૈરગારમુપસંવ્રજેત્ ॥ ૬.૫૧॥

ક્લૃપ્તકેશનખશ્મશ્રુઃ પાત્રી દણ્ડી કુસુમ્ભવાન્ ।
વિચરેન્નિયતો નિત્યં સર્વભૂતાન્યપીડયન્ ॥ ૬.૫૨॥

અતૈજસાનિ પાત્રાણિ તસ્ય સ્યુર્નિર્વ્રણાનિ ચ ।
તેષામદ્ભિઃ સ્મૃતં શૌચં ચમસાનામિવાધ્વરે ॥ ૬.૫૩॥

અલાબું દારુપાત્રં ચ મૃણ્મયં વૈદલં તથા ।
એતાણિ યતિપાત્રાણિ મનુઃ સ્વાયમ્ભુવોऽબ્રવીત્ ॥ ૬.૫૪॥

એકકાલં ચરેદ્ભૈક્ષં ન પ્રસજ્જેત વિસ્તરે ।
ભૈક્ષે પ્રસક્તો હિ યતિર્વિષયેષ્વપિ સજ્જતિ ॥ ૬.૫૫॥

વિધૂમે સન્નમુસલે વ્યઙ્ગારે ભુક્તવજ્જને ।
વૃત્તે શરાવસમ્પાતે ભિક્ષાં નિત્યં યતિશ્ચરેત્ ॥ ૬.૫૬॥

અલાભે ન વિષદી સ્યાત્લાભે ચૈવ ન હર્ષયેત્ ।
પ્રાણયાત્રિકમાત્રઃ સ્યાત્માત્રાસઙ્ગાદ્વિનિર્ગતઃ ॥ ૬.૫૭॥

અભિપૂજિતલાભાંસ્તુ જુગુપ્સેતૈવ સર્વશઃ ।
અભિપૂજિતલાભૈશ્ચ યતિર્મુક્તોऽપિ બધ્યતે ॥ ૬.૫૮॥

અલ્પાન્નાભ્યવહારેણ રહઃસ્થાનાસનેન ચ ।
હ્રિયમાણાનિ વિષયૈરિન્દ્રિયાણિ નિવર્તયેત્ ॥ ૬.૫૯॥

ઇન્દ્રિયાણાં નિરોધેન રાગદ્વેષક્ષયેણ ચ ।
અહિંસયા ચ ભૂતાનામમૃતત્વાય કલ્પતે ॥ ૬.૬૦॥

અવેક્ષેત ગતીર્નૄણાં કર્મદોષસમુદ્ભવાઃ ।
નિરયે ચૈવ પતનં યાતનાશ્ચ યમક્ષયે ॥ ૬.૬૧॥

વિપ્રયોગં પ્રિયૈશ્ચૈવ સંયોગં ચ તથાऽપ્રિયૈઃ ।
જરયા ચાભિભવનં વ્યાધિભિશ્ચોપપીડનમ્ ॥ ૬.૬૨॥

દેહાદુત્ક્રમણં ચાસ્માત્પુનર્ગર્ભે ચ સમ્ભવમ્ ।
યોનિકોટિસહસ્રેષુ સૃતીશ્ચાસ્યાન્તરાત્મનઃ ॥ ૬.૬૩॥

અધર્મપ્રભવં ચૈવ દુઃખયોગં શરીરિણામ્ ।
ધર્માર્થપ્રભવં ચૈવ સુખસંયોગમક્ષયમ્ ॥ ૬.૬૪॥

સૂક્ષ્મતાં ચાન્વવેક્ષેત યોગેન પરમાત્મનઃ ।
દેહેષુ ચ સમુત્પત્તિમુત્તમેષ્વધમેષુ ચ ॥ ૬.૬૫॥ દેહેષુ ચૈવોપપત્તિમ્

દૂષિતોऽપિ ચરેદ્ધર્મં યત્ર તત્રાશ્રમે રતઃ । ભૂષિતોऽપિ
સમઃ સર્વેષુ ભૂતેષુ ન લિઙ્ગં ધર્મકારણમ્ ॥ ૬.૬૬॥

ફલં કતકવૃક્ષસ્ય યદ્યપ્યમ્બુપ્રસાદકમ્ ।
ન નામગ્રહણાદેવ તસ્ય વારિ પ્રસીદતિ ॥ ૬.૬૭॥

સંરક્ષણાર્થં જન્તૂનાં રાત્રાવહનિ વા સદા ।
શરીરસ્યાત્યયે ચૈવ સમીક્ષ્ય વસુધાં ચરેત્ ॥ ૬.૬૮॥

અહ્ના રાત્ર્યા ચ યાઞ્જન્તૂન્ હિનસ્ત્યજ્ઞાનતો યતિઃ ।
તેષાં સ્નાત્વા વિશુદ્ધ્યર્થં પ્રાણાયામાન્ ષડાચરેત્ ॥ ૬.૬૯॥

પ્રાણાયામા બ્રાહ્મણસ્ય ત્રયોઽપિ વિધિવત્કૃતાઃ ।
વ્યાહૃતિપ્રણવૈર્યુક્તા વિજ્ઞેયં પરમં તપઃ ॥ ૬.૭૦॥

દહ્યન્તે ધ્માયમાનાનાં ધાતૂનાં હિ યથા મલાઃ ।
તથેન્દ્રિયાણાં દહ્યન્તે દોષાઃ પ્રાણસ્ય નિગ્રહાત્ ॥ ૬.૭૧॥

પ્રાણાયામૈર્દહેદ્દોષાન્ ધારણાભિશ્ચ કિલ્બિષમ્ ।
પ્રત્યાહારેણ સંસર્ગાન્ ધ્યાનેનાનીશ્વરાન્ ગુણાન્ ॥ ૬.૭૨॥

ઉચ્ચાવચેષુ ભૂતેષુ દુર્જ્ઞેયામકૃતાત્મભિઃ ।
ધ્યાનયોગેન સમ્પશ્યેદ્ગતિમસ્યાન્તરાત્મનઃ ॥ ૬.૭૩॥

સમ્યગ્દર્શનસમ્પન્નઃ કર્મભિર્ન નિબધ્યતે ।
દર્શનેન વિહીનસ્તુ સંસારં પ્રતિપદ્યતે ॥ ૬.૭૪॥

અહિંસયેન્દ્રિયાસઙ્ગૈર્વૈદિકૈશ્ચૈવ કર્મભિઃ ।
તપસશ્ચરણૈશ્ચોગ્રૈઃ સાધયન્તીહ તત્પદમ્ ॥ ૬.૭૫॥

અસ્થિસ્થૂણં સ્નાયુયુતં માંસશોણિતલેપનમ્ ।
ચર્માવનદ્ધં દુર્ગન્ધિ પૂર્ણં મૂત્રપુરીષયોઃ ॥ ૬.૭૬॥

જરાશોકસમાવિષ્ટં રોગાયતનમાતુરમ્ ।
રજસ્વલમનિત્યં ચ ભૂતાવાસમિમં ત્યજેત્ ॥ ૬.૭૭॥

નદીકૂલં યથા વૃક્ષો વૃક્ષં વા શકુનિર્યથા ।
તથા ત્યજન્નિમં દેહં કૃચ્છ્રાદ્ગ્રાહાદ્વિમુચ્યતે ॥ ૬.૭૮॥

પ્રિયેષુ સ્વેષુ સુકૃતમપ્રિયેષુ ચ દુષ્કૃતમ્ ।
વિસૃજ્ય ધ્યાનયોગેન બ્રહ્માભ્યેતિ સનાતનમ્ ॥ ૬.૭૯॥

યદા ભાવેન ભવતિ સર્વભાવેષુ નિઃસ્પૃહઃ ।
તદા સુખમવાપ્નોતિ પ્રેત્ય ચૈહ ચ શાશ્વતમ્ ॥ ૬.૮૦॥

અનેન વિધિના સર્વાંસ્ત્યક્ત્વા સઙ્ગાન્ શનૈઃ શનૈઃ ।

સર્વદ્વન્દ્વવિનિર્મુક્તો બ્રહ્મણ્યેવાવતિષ્ઠતે ॥ ૬.૮૧॥

ધ્યાનિકં સર્વમેવૈતદ્યદેતદભિશબ્દિતમ્ ।
ન હ્યનધ્યાત્મવિત્કશ્ચિત્ક્રિયાફલમુપાશ્નુતે ॥ ૬.૮૨॥

અધિયજ્ઞં બ્રહ્મ જપેદાધિદૈવિકમેવ ચ ।
આધ્યાત્મિકં ચ સતતં વેદાન્તાભિહિતં ચ યત્ ॥ ૬.૮૩॥

ઇદં શરણમજ્ઞાનામિદમેવ વિજાનતામ્ ।
ઇદમન્વિચ્છતાં સ્વર્ગમિદમાનન્ત્યમિચ્છતામ્ ॥ ૬.૮૪॥

અનેન ક્રમયોગેન પરિવ્રજતિ યો દ્વિજઃ ।
સ વિધૂયેહ પાપ્માનં પરં બ્રહ્માધિગચ્છતિ ॥ ૬.૮૫॥

એષ ધર્મોઽનુશિષ્ટો વો યતીનાં નિયતાત્મનામ્ ।
વેદસંન્યાસિકાનાં તુ કર્મયોગં નિબોધત ॥ ૬.૮૬॥

બ્રહ્મચારી ગૃહસ્થશ્ચ વાનપ્રસ્થો યતિસ્તથા ।
એતે ગૃહસ્થપ્રભવાશ્ચત્વારઃ પૃથગાશ્રમાઃ ॥ ૬.૮૭॥

સર્વેઽપિ ક્રમશસ્ત્વેતે યથાશાસ્ત્રં નિષેવિતાઃ ।
યથોક્તકારિણં વિપ્રં નયન્તિ પરમાં ગતિમ્ ॥ ૬.૮૮॥

સર્વેષામપિ ચૈતેષાં વેદસ્મૃતિવિધાનતઃ । વેદશ્રુતિવિધાનતઃ
ગૃહસ્થ ઉચ્યતે શ્રેષ્ઠઃ સ ત્રીનેતાન્ બિભર્તિ હિ ॥ ૬.૮૯॥

યથા નદીનદાઃ સર્વે સાગરે યાન્તિ સંસ્થિતિમ્ ।
તથૈવાશ્રમિણઃ સર્વે ગૃહસ્થે યાન્તિ સંસ્થિતિમ્ ॥ ૬.૯૦॥

ચતુર્ભિરપિ ચૈવૈતૈર્નિત્યમાશ્રમિભિર્દ્વિજૈઃ ।
દશલક્ષણકો ધર્મઃ સેવિતવ્યઃ પ્રયત્નતઃ ॥ ૬.૯૧॥

ધૃતિઃ ક્ષમા દમોઽસ્તેયં શૌચમિન્દ્રિયનિગ્રહઃ ।
ધીર્વિદ્યા સત્યમક્રોધો દશકં ધર્મલક્ષણમ્ ॥ ૬.૯૨॥

દશ લક્ષણાનિ ધર્મસ્ય યે વિપ્રાઃ સમધીયતે ।
અધીત્ય ચાનુવર્તન્તે તે યાન્તિ પરમાં ગતિમ્ ॥ ૬.૯૩॥

દશલક્ષણકં ધર્મમનુતિષ્ઠન્ સમાહિતઃ ।
વેદાન્તં વિધિવચ્છ્રુત્વા સંન્યસેદનૃણો દ્વિજઃ ॥ ૬.૯૪॥

સંન્યસ્ય સર્વકર્માણિ કર્મદોષાનપાનુદન્ ।
નિયતો વેદમભ્યસ્ય પુત્રૈશ્વર્યે સુખં વસેત્ ॥ ૬.૯૫॥

એવં સંન્યસ્ય કર્માણિ સ્વકાર્યપરમોઽસ્પૃહઃ ।
સંન્યાસેનાપહત્યૈનઃ પ્રાપ્નોતિ પરમં ગતિમ્ ॥ ૬.૯૬॥

એષ વોઽભિહિતો ધર્મો બ્રાહ્મણસ્ય ચતુર્વિધઃ ।
પુણ્યોઽક્ષયફલઃ પ્રેત્ય રાજ્ઞાં ધર્મં નિબોધત ॥ ૬.૯૭॥

## અધ્યાય ૭

રાજધર્માન્ પ્રવક્ષ્યામિ યથાવૃત્તો ભવેન્નૃપઃ ।
સમ્ભવશ્ચ યથા તસ્ય સિદ્ધિશ્ચ પરમા યથા ॥ ૭.૧॥

બ્રાહ્મં પ્રાપ્તેન સંસ્કારં ક્ષત્રિયેણ યથાવિધિ ।
સર્વસ્યાસ્ય યથાન્યાયં કર્તવ્યં પરિરક્ષણમ્ ॥ ૭.૨॥

અરાજકે હિ લોકેઽસ્મિન્ સર્વતો વિદ્રુતો ભયાત્ ।
રક્ષાર્થમસ્ય સર્વસ્ય રાજાનમસૃજત્પ્રભુઃ ॥ ૭.૩॥

ઇન્દ્રાનિલયમાર્કાણામગ્નેશ્ચ વરુણસ્ય ચ ।
ચન્દ્રવિત્તેશયોશ્ચૈવ માત્રા નિર્હૃત્ય શાશ્વતીઃ ॥ ૭.૪॥

યસ્માદેષાં સુરેન્દ્રાણાં માત્રાભ્યો નિર્મિતો નૃપઃ ।
તસ્માદભિભવત્યેષ સર્વભૂતાનિ તેજસા ॥ ૭.૫॥

તપત્યાદિત્યવચ્ચૈષ ચક્ષૂંષિ ચ મનાંસિ ચ ।
ન ચૈનં ભુવિ શક્નોતિ કશ્ચિદપ્યભિવીક્ષિતુમ્ ॥ ૭.૬॥

સોઽગ્નિર્ભવતિ વાયુશ્ચ સોઽર્કઃ સોમઃ સ ધર્મરાટ્ ।
સ કુબેરઃ સ વરુણઃ સ મહેન્દ્રઃ પ્રભાવતઃ ॥ ૭.૭॥ સ ચૈન્દ્રઃ સ્વપ્રભાવતઃ

બાલોઽપિ નાવમાન્તવ્યો મનુષ્ય ઇતિ ભૂમિપઃ ।
મહતી દેવતા હ્યેષા નરરૂપેણ તિષ્ઠતિ ॥ ૭.૮॥

એકમેવ દહત્યગ્નિર્નરં દુરુપસર્પિણમ્ ।
કુલં દહતિ રાજાઽગ્નિઃ સપશુદ્રવ્યસઞ્ચયમ્ ॥ ૭.૯॥

કાર્યં સોઽવેક્ષ્ય શક્તિં ચ દેશકાલૌ ચ તત્ત્વતઃ ।
કુરુતે ધર્મસિદ્ધ્યર્થં વિશ્વરૂપં પુનઃ પુનઃ ॥ ૭.૧૦॥

યસ્ય પ્રસાદે પદ્મા શ્રીર્વિજયશ્ચ પરાક્રમે ।
મૃત્યુશ્ચ વસતિ ક્રોધે સર્વતેજોમયો હિ સઃ ॥ ૭.૧૧॥

તં યસ્તુ દ્વેષ્ટિ સંમોહાત્સ વિનશ્યત્યસંશયમ્ ।
તસ્ય હ્યાશુ વિનાશાય રાજા પ્રકુરુતે મનઃ ॥ ૭.૧૨॥

તસ્માદ્ધર્મં યમિષ્ટેષુ સ વ્યવસ્યેન્નરાધિપઃ ।
અનિષ્ટં ચાપ્યનિષ્ટેષુ તં ધર્મં ન વિચાલયેત્ ॥ ૭.૧૩॥

તસ્યાર્થે સર્વભૂતાનાં ગોપ્તારં ધર્મમાત્મજમ્ । તદર્થં
બ્રહ્મતેજોમયં દણ્ડમસૃજત્પૂર્વમીશ્વરઃ ॥ ૭.૧૪॥

તસ્ય સર્વાણિ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ।
ભયાદ્ભોગાય કલ્પન્તે સ્વધર્માન્ન ચલન્તિ ચ ॥ ૭.૧૫॥

તં દેશકાલૌ શક્તિં ચ વિદ્યાં ચાવેક્ષ્ય તત્ત્વતઃ ।
યથાર્હતઃ સમ્પ્રણયેન્નરેષ્વન્યાયવર્તિષુ ॥ ૭.૧૬॥

સ રાજા પુરુષો દણ્ડઃ સ નેતા શાસિતા ચ સઃ ।
ચતુર્ણામાશ્રમાણાં ચ ધર્મસ્ય પ્રતિભૂઃ સ્મૃતઃ ॥ ૭.૧૭॥

દણ્ડઃ શાસ્તિ પ્રજાઃ સર્વા દણ્ડ એવાભિરક્ષતિ ।
દણ્ડઃ સુપ્તેષુ જાગર્તિ દણ્ડં ધર્મં વિદુર્બુધાઃ ॥ ૭.૧૮॥

સમીક્ષ્ય સ ધૃતઃ સમ્યક્સર્વા રઞ્જયતિ પ્રજાઃ ।
અસમીક્ષ્ય પ્રણીતસ્તુ વિનાશયતિ સર્વતઃ ॥ ૭.૧૯॥

યદિ ન પ્રણયેદ્રાજા દણ્ડં દણ્ડ્યેષ્વતન્દ્રિતઃ ।
શૂલે મત્સ્યાનિવાપક્ષ્યન્ દુર્બલાન્ બલવત્તરાઃ ॥ ૭.૨૦॥

અદ્યાત્કાકઃ પુરોડાશં શ્વા ચ લિહ્યાદ્ધવિસ્તથા । શ્વાડવલિહ્યાદ્
સ્વામ્યં ચ ન સ્યાત્કસ્મિંશ્ચિત્પ્રવર્તેતાધરોત્તરમ્ ॥ ૭.૨૧॥

સર્વો દણ્ડજિતો લોકો દુર્લભો હિ શુચિર્નરઃ ।
દણ્ડસ્ય હિ ભયાત્સર્વં જગદ્ભોગાય કલ્પતે ॥ ૭.૨૨॥

દેવદાનવગન્ધર્વા રક્ષાંસિ પતગોરગાઃ ।
તેઽપિ ભોગાય કલ્પન્તે દણ્ડેનૈવ નિપીડિતાઃ ॥ ૭.૨૩॥

દુષ્યેયુઃ સર્વવર્ણાશ્ચ ભિદ્યેરન્ સર્વસેતવઃ ।

સર્વલોકપ્રકોપશ્ચ ભવેદ્દણ્ડસ્ય વિભ્રમાત્ ॥ ૭.૨૪॥

યત્ર શ્યામો લોહિતાક્ષો દણ્ડશ્ચરતિ પાપહા ।
પ્રજાસ્તત્ર ન મુહ્યન્તિ નેતા ચેત્સાધુ પશ્યતિ ॥ ૭.૨૫॥

તસ્યાહુઃ સમ્પ્રણેતારં રાજાનં સત્યવાદિનમ્ ।
સમીક્ષ્યકારિણં પ્રાજ્ઞં ધર્મકામાર્થકોવિદમ્ ॥ ૭.૨૬॥

તં રાજા પ્રણયન્ સમ્યક્ત્રિવર્ગેણાભિવર્ધતે ।
કામાત્મા વિષમઃ ક્ષુદ્રો દણ્ડેનૈવ નિહન્યતે ॥ ૭.૨૭॥ કામાન્ધો

દણ્ડો હિ સુમહત્તેજો દુર્ધરશ્ચાકૃતાત્મભિઃ ।
ધર્માદ્વિચલિતં હન્તિ નૃપમેવ સબાન્ધવમ્ ॥ ૭.૨૮॥

તતો દુર્ગં ચ રાષ્ટ્રં ચ લોકં ચ સચરાચરમ્ ।
અન્તરિક્ષગતાંશ્ચૈવ મુનીન્ દેવાંશ્ચ પીડયેત્ ॥ ૭.૨૯॥

સોઽસહાયેન મૂઢેન લુબ્ધેનાકૃતબુદ્ધિના ।
ન શક્યો ન્યાયતો નેતું સક્તેન વિષયેષુ ચ ॥ ૭.૩૦॥

શુચિના સત્યસંધેન યથાશાસ્ત્રાનુસારિણા ।
પ્રણેતું શક્યતે દણ્ડઃ સુસહાયેન ધીમતા ॥ ૭.૩૧॥

સ્વરાષ્ટ્રે ન્યાયવૃત્તઃ સ્યાદ્ભૃશદણ્ડશ્ચ શત્રુષુ ।
સુહૃત્સ્વજિહ્મઃ સ્નિગ્ધેષુ બ્રાહ્મણેષુ ક્ષમાન્વિતઃ ॥ ૭.૩૨॥

એવંવૃત્તસ્ય નૃપતેઃ શિલોઞ્છેનાપિ જીવતઃ ।
વિસ્તીર્યતે યશો લોકે તૈલબિન્દુરિવામ્ભસિ ॥ ૭.૩૩॥

અતસ્તુ વિપરીતસ્ય નૃપતેરજિતાત્મનઃ ।
સઙ્ક્ષિપ્યતે યશો લોકે ઘૃતબિન્દુરિવામ્ભસિ ॥ ૭.૩૪॥

સ્વે સ્વે ધર્મે નિવિષ્ટાનાં સર્વેષામનુપૂર્વશઃ ।
વર્ણાનામાશ્રમાણાં ચ રાજા સૃષ્ટોઽભિરક્ષિતા ॥ ૭.૩૫॥

તેન યદ્યત્સભૃત્યેન કર્તવ્યં રક્ષતા પ્રજાઃ ।
તત્તદ્વોઽહં પ્રવક્ષ્યામિ યથાવદનુપૂર્વશઃ ॥ ૭.૩૬॥

બ્રાહ્મણાન્ પર્યુપાસીત પ્રાતરુત્થાય પાર્થિવઃ ।
ત્રૈવિદ્યવૃદ્ધાન્ વિદુષસ્તિષ્ઠેત્તેષાં ચ શાસને ॥ ૭.૩૭॥

વૃદ્ધાંશ્ચ નિત્યં સેવેત વિપ્રાન્ વેદવિદઃ શુચીન્ ।
વૃદ્ધસેવી હિ સતતં રક્ષોભિરપિ પૂજ્યતે ॥ ૭.૩૮॥

તેભ્યોઽધિગચ્છેદ્વિનયં વિનીતાત્માઽપિ નિત્યશઃ ।
વિનીતાત્મા હિ નૃપતિર્ન વિનશ્યતિ કર્હિ ચિત્ ॥ ૭.૩૯॥

બહવોઽવિનયાન્નષ્ટા રાજાનઃ સપરિચ્છદાઃ । સપરિગ્રહાઃ
વનસ્થા અપિ રાજ્યાનિ વિનયાત્પ્રતિપેદિરે ॥ ૭.૪૦॥

વેનો વિનષ્ટોઽવિનયાન્નહુષશ્ચૈવ પાર્થિવઃ ।
સુદાઃ પૈજવનશ્ચૈવ સુમુખો નિમિરેવ ચ ॥ ૭.૪૧॥

પૃથુસ્તુ વિનયાદ્રાજ્યં પ્રાપ્તવાન્ મનુરેવ ચ ।
કુબેરશ્ચ ધનૈશ્વર્યં બ્રાહ્મણ્યં ચૈવ ગાધિજઃ ॥ ૭.૪૨॥

ત્રૈવિદ્યેભ્યસ્ત્રયીં વિદ્યાં દણ્ડનીતિં ચ શાશ્વતીમ્ । ત્રયીં વિદ્યાત્
આન્વીક્ષિકીં ચાત્મવિદ્યાં વાર્તારમ્ભાંશ્ચ લોકતઃ ॥ ૭.૪૩॥

ઇન્દ્રિયાણાં જયે યોગં સમાતિષ્ઠેદ્દિવાનિશમ્ ।
જિતેન્દ્રિયો હિ શક્નોતિ વશે સ્થાપયિતું પ્રજાઃ ॥ ૭.૪૪॥

દશ કામસમુત્થાનિ તથાઽષ્ટૌ ક્રોધજાનિ ચ ।
વ્યસનાનિ દુર્ઽન્તાનિ પ્રયત્નેન વિવર્જયેત્ ॥ ૭.૪૫॥

કામજેષુ પ્રસક્તો હિ વ્યસનેષુ મહીપતિઃ ।
વિયુજ્યતેઽર્થધર્માભ્યાં ક્રોધજેષ્વાત્મનૈવ તુ ॥ ૭.૪૬॥

મૃગયાઽક્ષો દિવાસ્વપ્નઃ પરિવાદઃ સ્ત્રિયો મદઃ ।
તૌર્યત્રિકં વૃથાટ્યા ચ કામજો દશકો ગણઃ ॥ ૭.૪૭॥

પૈશુન્યં સાહસં દ્રોહ ઈર્ષ્યાઽસૂયાઽર્થદૂષણમ્ ।
વાગ્દણ્ડજં ચ પારુષ્યં ક્રોધજોઽપિ ગણોઽષ્ટકઃ ॥ ૭.૪૮॥

દ્વયોરપ્યેતયોર્મૂલં યં સર્વે કવયો વિદુઃ ।
તં યત્નેન જયેલ્લોભં તજ્જાવેતાવુભૌ ગણૌ ॥ ૭.૪૯॥

પાનમક્ષાઃ સ્ત્રિયશ્ચૈવ મૃગયા ચ યથાક્રમમ્ ।
એતત્કષ્ટતમં વિદ્યાચ્ચતુષ્કં કામજે ગણે ॥ ૭.૫૦॥

દણ્ડસ્ય પાતનં ચૈવ વાક્પારુષ્યાર્થદૂષણે ।
ક્રોધજેઽપિ ગણે વિદ્યાત્કષ્ટમેતત્ત્રિકં સદા ॥ ૭.૫૧॥

સપ્તકસ્યાસ્ય વર્ગસ્ય સર્વત્રૈવાનુષઙ્ગિણઃ ।
પૂર્વં પૂર્વં ગુરુતરં વિદ્યાદ્વ્યસનમાત્મવાન્ ॥ ૭.૫૨॥

વ્યસનસ્ય ચ મૃત્યોશ્ચ વ્યસનં કષ્ટમુચ્યતે ।
વ્યસન્યધોઽધો વ્રજતિ સ્વર્યાત્યવ્યસની મૃતઃ ॥ ૭.૫૩॥

મૌલાન્ શાસ્ત્રવિદઃ શૂરાન્ લબ્ધલક્ષાન્ કુલોદ્ભવાન્ । કુલોદ્ગતાન્
સચિવાન્ સપ્ત ચાષ્ટૌ વા પ્રકુર્વીત પરીક્ષિતાન્ ॥ ૭.૫૪॥ કુર્વીત સુપરીક્ષિતાન્

અપિ યત્સુકરં કર્મ તદપ્યેકેન દુષ્કરમ્ ।
વિશેષતોઽસહાયેન કિં તુ રાજ્યં મહોદયમ્ ॥ ૭.૫૫॥ કિં નુ

તૈઃ સાર્ધં ચિન્તયેન્નિત્યં સામાન્યં સંધિવિગ્રહમ્ ।
સ્થાનં સમુદયં ગુપ્તિં લબ્ધપ્રશમનાનિ ચ ॥ ૭.૫૬॥

તેષાં સ્વં સ્વમભિપ્રાયમુપલભ્ય પૃથક્પૃથક્ ।
સમસ્તાનાં ચ કાર્યેષુ વિદધ્યાદ્ધિતમાત્મનઃ ॥ ૭.૫૭॥

સર્વેષાં તુ વિશિષ્ટેન બ્રાહ્મણેન વિપશ્ચિતા ।
મન્ત્રયેત્પરમં મન્ત્રં રાજા ષાડ્ગુણ્યસંયુતમ્ ॥ ૭.૫૮॥

નિત્યં તસ્મિન્ સમાશ્વસ્તઃ સર્વકાર્યાણિ નિઃક્ષિપેત્ । નિક્ષિપેત્
તેન સાર્ધં વિનિશ્ચિત્ય તતઃ કર્મ સમારભેત્ ॥ ૭.૫૯॥

અન્યાનપિ પ્રકુર્વીત શુચીન્ પ્રાજ્ઞાનવસ્થિતાન્ ।
સમ્યગર્થસમાહર્તૄનમાત્યાન્ સુપરીક્ષિતાન્ ॥ ૭.૬૦॥

નિર્વર્તેતાસ્ય યાવદ્ભિરિતિકર્તવ્યતા નૃભિઃ ।
તાવતોઽતન્દ્રિતાન્ દક્ષાન્ પ્રકુર્વીત વિચક્ષણાન્ ॥ ૭.૬૧॥

તેષામર્થે નિયુઞ્જીત શૂરાન્ દક્ષાન્ કુલોદ્ગતાન્ ।
શુચીનાકરકર્માન્તે ભીરૂનન્તર્નિવેશને ॥ ૭.૬૨॥

દૂતં ચૈવ પ્રકુર્વીત સર્વશાસ્ત્રવિશારદમ્ ।
ઇઙ્ગિતાકારચેષ્ટજ્ઞં શુચિં દક્ષં કુલોદ્ગતમ્ ॥ ૭.૬૩॥

અનુરક્તઃ શુચિર્દક્ષઃ સ્મૃતિમાન્ દેશકાલવિત્ ।
વપુષ્માન્ વીતભીર્વાગ્મી દૂતો રાજ્ઞઃ પ્રશસ્યતે ॥ ૭.૬૪॥

અમાત્યે દણ્ડ આયત્તો દણ્ડે વૈનયિકી ક્રિયા ।

નૃપતૌ કોશરાષ્ટ્રે ચ દૂતે સંધિવિપર્યયૌ ॥ ૭.૬૫॥

દૂત એવ હિ સંધત્તે ભિનત્ત્યેવ ચ સંહતાન્ ।
દૂતસ્તત્કુરુતે કર્મ ભિદ્યન્તે યેન માનવઃ ॥ ૭.૬૬॥

સ વિદ્યાદસ્ય કૃત્યેષુ નિર્ગૂઢેઙ્ગિતચેષ્ટિતૈઃ ।
આકારમિઙ્ગિતં ચેષ્ટાં ભૃત્યેષુ ચ ચિકીર્ષિતમ્ ॥ ૭.૬૭॥

બુદ્ધ્વા ચ સર્વં તત્ત્વેન પરરાજચિકીર્ષિતમ્ ।
તથા પ્રયત્નમાતિષ્ઠેદ્યથાઽત્માનં ન પીડયેત્ ॥ ૭.૬૮॥

જાઙ્ગલં સસ્યસમ્પન્નમાર્યપ્રાયમનાવિલમ્ ।
રમ્યમાનતસામન્તં સ્વાજીવ્યં દેશમાવસેત્ ॥ ૭.૬૯॥

ધન્વદુર્ગં મહીદુર્ગમબ્દુર્ગં વાર્ક્ષમેવ વા ।
નૃદુર્ગં ગિરિદુર્ગં વા સમાશ્રિત્ય વસેત્પુરમ્ ॥ ૭.૭૦॥

સર્વેણ તુ પ્રયત્નેન ગિરિદુર્ગં સમાશ્રયેત્ ।
એષાં હિ બાહુગુણ્યેન ગિરિદુર્ગં વિશિષ્યતે ॥ ૭.૭૧॥

ત્રીણ્યાદ્યાન્યાશ્રિતાસ્ત્વેષાં મૃગગર્તાશ્રયાપ્ચરાઃ ।
ત્રીણ્યુત્તરાણિ ક્રમશઃ પ્લવઙ્ગમનરામરાઃ ॥ ૭.૭૨॥

યથા દુર્ગાશ્રિતાનેતાન્નોપહિંસન્તિ શત્રવઃ ।
તથાઽરયો ન હિંસન્તિ નૃપં દુર્ગસમાશ્રિતમ્ ॥ ૭.૭૩॥

એકઃ શતં યોધયતિ પ્રાકારસ્થો ધનુર્ધરઃ ।
શતં દશસહસ્રાણિ તસ્માદ્દુર્ગં વિધીયતે ॥ ૭.૭૪॥

તત્સ્યાદાયુધસમ્પન્નં ધનધાન્યેન વાહનૈઃ ।
બ્રાહ્મણૈઃ શિલ્પિભિર્યન્ત્રૈર્યવસેનોદકેન ચ ॥ ૭.૭૫॥

તસ્ય મધ્યે સુપર્યાપ્તં કારયેદ્ગૃહમાત્મનઃ ।
ગુપ્તં સર્વર્તુકં શુભ્રં જલવૃક્ષસમન્વિતમ્ ॥ ૭.૭૬॥

તદધ્યાસ્યોદ્વહેદ્ભાર્યાં સવર્ણાં લક્ષણાન્વિતામ્ ।
કુલે મહતિ સમ્ભૂતાં હૃદ્યાં રૂપગુણાન્વિતામ્ ॥ ૭.૭૭॥

પુરોહિતં ચ કુર્વીત વૃણુયાદેવ ચર્ત્વિજઃ ।
તેઽસ્ય ગૃહ્યાણિ કર્માણિ કુર્યુર્વૈતાનિકાનિ ચ ॥ ૭.૭૮॥

યજેત રાજા ક્રતુભિર્વિવિધૈરાપ્તદક્ષિણૈઃ ।
ધર્માર્થં ચૈવ વિપ્રેભ્યો દદ્યાદ્ભોગાન્ ધનાનિ ચ ॥ ૭.૭૯॥

સાંવત્સરિકમાપ્તૈશ્ચ રાષ્ટ્રાદાહારયેદ્બલિમ્ ।
સ્યાચ્ચામ્નાયપરો લોકે વર્તેત પિતૃવન્નૃષુ ॥ ૭.૮૦॥

અધ્યક્ષાન્ વિવિધાન્ કુર્યાત્તત્ર તત્ર વિપશ્ચિતઃ ।
તેઽસ્ય સર્વાણ્યવેક્ષેરન્નૃણાં કાર્યાણિ કુર્વતામ્ ॥ ૭.૮૧॥

આવૃત્તાનાં ગુરુકુલાદ્વિપ્રાણાં પૂજકો ભવેત્ ।
નૃપાણામક્ષયો હ્યેષ નિધિર્બ્રાહ્મોઽભિધીયતે ॥ ૭.૮૨॥

ન તં સ્તેના ન ચામિત્રા હરન્તિ ન ચ નશ્યતિ ।
તસ્માદ્રાજ્ઞા નિધાતવ્યો બ્રાહ્મણેષ્વક્ષયો નિધિઃ ॥ ૭.૮૩॥

ન સ્કન્દતે ન વ્યથતે ન વિનશ્યતિ કર્હિ ચિત્ । ન સ્કન્દતિ ન ચ્યવતે
વરિષ્ઠમગ્નિહોત્રેભ્યો બ્રાહ્મણસ્ય મુખે હુતમ્ ॥ ૭.૮૪॥

સમમબ્રાહ્મણે દાનં દ્વિગુણં બ્રાહ્મણબ્રુવે ।
પ્રાધીતે શતસાહસ્રમનન્તં વેદપારગે ॥ ૭.૮૫॥ આચાર્યે શતસાહસ્રં સહસ્રગુણમાચાર્યે

પાત્રસ્ય હિ વિશેષેણ શ્રદ્દધાનતયૈવ ચ ।
અલ્પં વા બહુ વા પ્રેત્ય દાનસ્ય ફલમશ્નુતે ॥ ૭.૮૬॥

(દેશકાલવિધાનેન દ્રવ્યં શ્રદ્ધાસમન્વિતમ્ ।
પાત્રે પ્રદીયતે યત્તુ તદ્ધર્મસ્ય પ્રસાધનમ્ ॥ ૭.૮૭)
(AlthougH MedhAtithi comments on the above shloka,
Jha’s edition does not count it in his numbering of the text.)
સમોત્તમાધમૈ રાજા ત્વાહૂતઃ પાલયન્ પ્રજાઃ ।
ન નિવર્તેત સઙ્ગ્રામાત્ક્ષાત્રં ધર્મમનુસ્મરન્ ॥ ૭.૮૭॥

સઙ્ગ્રામેષ્વનિવર્તિત્વં પ્રજાનાં ચૈવ પાલનમ્ ।
શુશ્રૂષા બ્રાહ્મણાનાં ચ રાજ્ઞાં શ્રેયસ્કરં પરમ્ ॥ ૭.૮૮॥

આહવેષુ મિથોઽન્યોન્યં જિઘાંસન્તો મહીક્ષિતઃ ।
યુધ્યમાનાઃ પરં શક્ત્યા સ્વર્ગં યાન્ત્યપરાઙ્મુખાઃ ॥ ૭.૮૯॥

ન કૂટૈરાયુધૈર્હન્યાદ્યુધ્યમાનો રણે રિપૂન્ ।
ન કર્ણિભિર્નાપિ દિગ્ધૈર્નાગ્નિજ્વલિતતેજનૈઃ ॥ ૭.૯૦॥

ન ચ હન્યાત્સ્થલારૂઢં ન ક્લીબં ન કૃતાઞ્જલિમ્ ।
ન મુક્તકેશં નાસીનં ન તવાસ્મીતિ વાદિનમ્ ॥ ૭.૯૧॥

ન સુપ્તં ન વિસંનાહં ન નગ્નં ન નિરાયુધમ્ ।
નાયુધ્યમાનં પશ્યન્તં ન પરેણ સમાગતમ્ ॥ ૭.૯૨॥

નાયુધવ્યસનપ્રાપ્તં નાર્તં નાતિપરિક્ષતમ્ ।
ન ભીતં ન પરાવૃત્તં સતાં ધર્મમનુસ્મરન્ ॥ ૭.૯૩॥

યસ્તુ ભીતઃ પરાવૃત્તઃ સઙ્ગ્રામે હન્યતે પરૈઃ ।
ભર્તુર્યદ્દુષ્કૃતં કિં ચિત્તત્સર્વં પ્રતિપદ્યતે ॥ ૭.૯૪॥

યત્ચાસ્ય સુકૃતં કિં ચિદમુત્રાર્થમુપાર્જિતમ્ ।
ભર્તા તત્સર્વમાદત્તે પરાવૃત્તહતસ્ય તુ ॥ ૭.૯૫॥

રથાશ્વં હસ્તિનં છત્રં ધનં ધાન્યં પશૂન્ સ્ત્રિયઃ ।
સર્વદ્રવ્યાણિ કુપ્યં ચ યો યજ્જયતિ તસ્ય તત્ ॥ ૭.૯૬॥

રાજ્ઞશ્ચ દદ્યુરુદ્ધારમિત્યેષા વૈદિકી શ્રુતિઃ ।
રાજ્ઞા ચ સર્વયોધેભ્યો દાતવ્યમપૃથગ્જિતમ્ ॥ ૭.૯૭॥

એષોઽનુપસ્કૃતઃ પ્રોક્તો યોધધર્મઃ સનાતનઃ ।
અસ્માદ્ધર્માન્ન ચ્યવેત ક્ષત્રિયો ઘ્નન્ રણે રિપૂન્ ॥ ૭.૯૮॥

અલબ્ધં ચૈવ લિપ્સેત લબ્ધં રક્ષેત્પ્રયત્નતઃ ।
રક્ષિતં વર્ધયેચ્ચૈવ વૃદ્ધં પાત્રેષુ નિક્ષિપેત્ ॥ ૭.૯૯॥

એતચ્ચતુર્વિધં વિદ્યાત્પુરુષાર્થપ્રયોજનમ્ ।
અસ્ય નિત્યમનુષ્ઠાનં સમ્યક્કુર્યાદતન્દ્રિતઃ ॥ ૭.૧૦૦॥

અલબ્ધમિચ્છેદ્દણ્ડેન લબ્ધં રક્ષેદવેક્ષયા ।
રક્ષિતં વર્ધયેદ્વૃદ્ધ્યા વૃદ્ધં પાત્રેષુ નિક્ષિપેત્ ॥ ૭.૧૦૧॥

નિત્યમુદ્યતદણ્ડઃ સ્યાન્નિત્યં વિવૃતપૌરુષઃ ।
નિત્યં સંવૃતસંવાર્યો નિત્યં છિદ્રાનુસાર્યરેઃ ॥ ૭.૧૦૨॥

નિત્યમુદ્યતદણ્ડસ્ય કૃત્સ્નમુદ્વિજતે જગત્ ।
તસ્માત્સર્વાણિ ભૂતાનિ દણ્ડેનૈવ પ્રસાધયેત્ ॥ ૭.૧૦૩॥

અમાયયૈવ વર્તેત ન કથં ચન માયયા ।
બુધ્યેતારિપ્રયુક્તાં ચ માયાં નિત્યં સુસંવૃતઃ ॥ ૭.૧૦૪॥

નાસ્ય છિદ્રં પરો વિદ્યાદ્વિદ્યાત્છિદ્રં પરસ્ય ચ ।
ગૂહેત્કૂર્મ ઇવાઙ્ગાનિ રક્ષેદ્વિવરમાત્મનઃ ॥ ૭.૧૦૫॥

બકવચ્ચિન્તયેદર્થાન્ સિંહવચ્ચ પરાક્રમે ।
વૃકવચ્ચાવલુમ્પેત શશવચ્ચ વિનિષ્પતેત્ ॥ ૭.૧૦૬॥

એવં વિજયમાનસ્ય યેઽસ્ય સ્યુઃ પરિપન્થિનઃ ।
તાનાનયેદ્વશં સર્વાન્ સામાદિભિરુપક્રમૈઃ ॥ ૭.૧૦૭॥

યદિ તે તુ ન તિષ્ઠેયુરુપાયૈઃ પ્રથમૈસ્ત્રિભિઃ ।
દણ્ડેનૈવ પ્રસહ્યૈતાંશનકૈર્વશમાનયેત્ ॥ ૭.૧૦૮॥

સામાદીનામુપાયાનાં ચતુર્ણામપિ પણ્ડિતાઃ ।
સામદણ્ડૌ પ્રશંસન્તિ નિત્યં રાષ્ટ્રાભિવૃદ્ધયે ॥ ૭.૧૦૯॥

યથોદ્ધરતિ નિર્દાતા કક્ષં ધાન્યં ચ રક્ષતિ ।
તથા રક્ષેન્નૃપો રાષ્ટ્રં હન્યાચ્ચ પરિપન્થિનઃ ॥ ૭.૧૧૦॥

મોહાદ્રાજા સ્વરાષ્ટ્રં યઃ કર્ષયત્યનવેક્ષયા ।
સોઽચિરાદ્ભ્રશ્યતે રાજ્યાત્જીવિતાચ્ચ સબાન્ધવઃ ॥ ૭.૧૧૧॥

શરીરકર્ષણાત્પ્રાણાઃ ક્ષીયન્તે પ્રાણિનાં યથા ।
તથા રાજ્ઞામપિ પ્રાણાઃ ક્ષીયન્તે રાષ્ટ્રકર્ષણાત્ ॥ ૭.૧૧૨॥

રાષ્ટ્રસ્ય સઙ્ગ્રહે નિત્યં વિધાનમિદમાચરેત્ ।
સુસઙ્ગૃહીતરાષ્ટ્રે હિ પાર્થિવઃ સુખમેધતે ॥ ૭.૧૧૩॥

દ્વયોસ્ત્રયાણાં પઞ્ચાનાં મધ્યે ગુલ્મમધિષ્ઠિતમ્ ।
તથા ગ્રામશતાનાં ચ કુર્યાદ્રાષ્ટ્રસ્ય સઙ્ગ્રહમ્ ॥ ૭.૧૧૪॥

ગ્રામસ્યાધિપતિં કુર્યાદ્દશગ્રામપતિં તથા ।
વિંશતીશં શતેશં ચ સહસ્રપતિમેવ ચ ॥ ૭.૧૧૫॥

ગ્રામદોષાન્ સમુત્પન્નાન્ ગ્રામિકઃ શનકૈઃ સ્વયમ્ ।
શંસેદ્ગ્રામદશેશાય દશેશો વિંશતીશિને ॥ ૭.૧૧૬॥

વિંશતીશસ્તુ તત્સર્વં શતેશાય નિવેદયેત્ ।
શંસેદ્ગ્રામશતેશસ્તુ સહસ્રપતયે સ્વયમ્ ॥ ૭.૧૧૭॥

યાનિ રાજપ્રદેયાનિ પ્રત્યહં ગ્રામવાસિભિઃ ।

અન્નપાનેન્ધનાદીનિ ગ્રામિકસ્તાન્યવાપ્નુયાત્ ॥ ૭.૧૧૮॥

દશી કુલં તુ ભુઞ્જીત વિંશી પઞ્ચ કુલાનિ ચ ।
ગ્રામં ગ્રામશતાધ્યક્ષઃ સહસ્રાધિપતિઃ પુરમ્ ॥ ૭.૧૧૯॥

તેષાં ગ્રામ્યાણિ કાર્યાનિ પૃથક્કાર્યાણિ ચૈવ હિ ।
રાજ્ઞોઽન્યઃ સચિવઃ સ્નિગ્ધસ્તાનિ પશ્યેદતન્દ્રિતઃ ॥ ૭.૧૨૦॥

નગરે નગરે ચૈકં કુર્યાત્સર્વાર્થચિન્તકમ્ ।
ઉચ્ચૈઃસ્થાનં ઘોરરૂપં નક્ષત્રાણામિવ ગ્રહમ્ ॥ ૭.૧૨૧॥

સ તાનનુપરિક્રામેત્સર્વાનેવ સદા સ્વયમ્ ।
તેષાં વૃત્તં પરિણયેત્સમ્યગ્રાષ્ટ્રેષુ તત્ચરૈઃ ॥ ૭.૧૨૨॥

રાજ્ઞો હિ રક્ષાધિકૃતાઃ પરસ્વાદાયિનઃ શઠાઃ ।
ભૃત્યા ભવન્તિ પ્રાયેણ તેભ્યો રક્ષેદિમાઃ પ્રજાઃ ॥ ૭.૧૨૩॥

યે કાર્યિકેભ્યોઽર્થમેવ ગૃહ્ણીયુઃ પાપચેતસઃ ।
તેષાં સર્વસ્વમાદાય રાજા કુર્યાત્પ્રવાસનમ્ ॥ ૭.૧૨૪॥

રાજા કર્મસુ યુક્તાનાં સ્ત્રીણાં પ્રેષ્યજનસ્ય ચ । રાજકર્મસુ
પ્રત્યહં કલ્પયેદ્વૃત્તિં સ્થાનં કર્માનુરૂપતઃ ॥ ૭.૧૨૫॥ સ્થાનકર્માનુરૂપતઃ

પણો દેયોઽવકૃષ્ટસ્ય ષડુત્કૃષ્ટસ્ય વેતનમ્ ।
ષાણ્માસિકસ્તથાઽચ્છાદો ધાન્યદ્રોણસ્તુ માસિકઃ ॥ ૭.૧૨૬॥

ક્રયવિક્રયમધ્વાનં ભક્તં ચ સપરિવ્યયમ્ ।
યોગક્ષેમં ચ સમ્પ્રેક્ષ્ય વણિજો દાપયેત્કરાન્ ॥ ૭.૧૨૭॥

યથા ફલેન યુજ્યેત રાજા કર્તા ચ કર્મણામ્ ।
તથાઽવેક્ષ્ય નૃપો રાષ્ટ્રે કલ્પયેત્સતતં કરાન્ ॥ ૭.૧૨૮॥

યથાઽલ્પાલ્પમદન્ત્યાદ્યં વાર્યોકોવત્સષટ્પદાઃ ।
તથાઽલ્પાલ્પો ગ્રહીતવ્યો રાષ્ટ્રાદ્રાજ્ઞાબ્દિકઃ કરઃ ॥ ૭.૧૨૯॥

પઞ્ચાશદ્ભાગ આદેયો રાજ્ઞા પશુહિરણ્યયોઃ ।
ધાન્યાનામષ્ટમો ભાગઃ ષષ્ઠો દ્વાદશ એવ વા ॥ ૭.૧૩૦॥

આદદીતાથ ષડ્ભાગં દ્રુમાન્ સમધુસર્પિષામ્ ।
ગન્ધૌષધિરસાનાં ચ પુષ્પમૂલફલસ્ય ચ ॥ ૭.૧૩૧॥

પત્રશાકતૃણાનાં ચ ચર્મણાં વૈદલસ્ય ચ ।
મૃન્મયાનાં ચ ભાણ્ડાનાં સર્વસ્યાશ્મમયસ્ય ચ ॥ ૭.૧૩૨॥

મ્રિયમાણોઽપ્યાદદીત ન રાજા શ્રોત્રિયાત્કરમ્ ।
ન ચ ક્ષુધાઽસ્ય સંસીદેત્શ્રોત્રિયો વિષયે વસન્ ॥ ૭.૧૩૩॥

યસ્ય રાજ્ઞસ્તુ વિષયે શ્રોત્રિયઃ સીદતિ ક્ષુધા ।
તસ્યાપિ તત્ક્ષુધા રાષ્ટ્રમચિરેણૈવ સીદતિ ॥ ૭.૧૩૪॥

શ્રુતવૃત્તે વિદિત્વાઽસ્ય વૃત્તિં ધર્મ્યાં પ્રકલ્પયેત્ ।
સંરક્ષેત્સર્વતશ્ચૈનં પિતા પુત્રમિવૌરસમ્ ॥ ૭.૧૩૫॥

સંરક્ષ્યમાણો રાજ્ઞા યં કુરુતે ધર્મમન્વહમ્ । રાજ્ઞાઽયં
તેનાયુર્વર્ધતે રાજ્ઞો દ્રવિણં રાષ્ટ્રમેવ ચ ॥ ૭.૧૩૬॥

યત્કિં ચિદપિ વર્ષસ્ય દાપયેત્કરસંજ્ઞિતમ્ ।
વ્યવહારેણ જીવન્તં રાજા રાષ્ટ્રે પૃથગ્જનમ્ ॥ ૭.૧૩૭॥

કારુકાન્ શિલ્પિનશ્ચૈવ શૂદ્રાંશ્ચાત્મોપજીવિનઃ ।
એકૈકં કારયેત્કર્મ માસિ માસિ મહીપતિઃ ॥ ૭.૧૩૮॥

નોચ્છિન્દ્યાદાત્મનો મૂલં પરેષાં ચાતિતૃષ્ણયા ।
ઉચ્છિન્દન્ હ્યાત્મનો મૂલમાત્માનં તાંશ્ચ પીડયેત્ ॥ ૭.૧૩૯॥

તીક્ષ્ણશ્ચૈવ મૃદુશ્ચ સ્યાત્કાર્યં વીક્ષ્ય મહીપતિઃ ।
તીક્ષ્ણશ્ચૈવ મૃદુશ્ચૈવ રાજ ભવતિ સમ્મતઃ ॥ ૭.૧૪૦॥

અમાત્યમુખ્યં ધર્મજ્ઞં પ્રાજ્ઞં દાન્તં કુલોદ્ગતમ્ ।
સ્થાપયેદાસને તસ્મિન્ ખિન્નઃ કાર્યેક્ષણે નૃણામ્ ॥ ૭.૧૪૧॥

એવં સર્વં વિધાયેદમિતિકર્તવ્યમાત્મનઃ ।
યુક્તશ્ચૈવાપ્રમત્તશ્ચ પરિરક્ષેદિમાઃ પ્રજાઃ ॥ ૭.૧૪૨॥

વિક્રોશન્ત્યો યસ્ય રાષ્ટ્રાધ્રિયન્તે દસ્યુભિઃ પ્રજાઃ ।
સમ્પશ્યતઃ સભૃત્યસ્ય મૃતઃ સ ન તુ જીવતિ ॥ ૭.૧૪૩॥

ક્ષત્રિયસ્ય પરો ધર્મઃ પ્રજાનામેવ પાલનમ્ ।
નિર્દિષ્ટફલભોક્તા હિ રાજા ધર્મેણ યુજ્યતે ॥ ૭.૧૪૪॥

ઉત્થાય પશ્ચિમે યામે કૃતશૌચઃ સમાહિતઃ ।
હુતાગ્નિર્બ્રાહ્મણાંશ્ચાર્ચ્ય પ્રવિશેત્સ શુભાં સભામ્ ॥ ૭.૧૪૫॥

તત્ર સ્થિતઃ પ્રજાઃ સર્વાઃ પ્રતિનન્દ્ય વિસર્જયેત્ ।
વિસૃજ્ય ચ પ્રજાઃ સર્વા મન્ત્રયેત્સહ મન્ત્રિભિઃ ॥ ૭.૧૪૬॥

ગિરિપૃષ્ઠં સમારુહ્ય પ્રાસાદં વા રહોગતઃ ।
અરણ્યે નિઃશલાકે વા મન્ત્રયેદવિભાવિતઃ ॥ ૭.૧૪૭॥

યસ્ય મન્ત્રં ન જાનન્તિ સમાગમ્ય પૃથગ્જનાઃ ।
સ કૃત્સ્નાં પૃથિવીં ભુઙ્ક્તે કોશહીનોઽપિ પાર્થિવઃ ॥ ૭.૧૪૮॥

જડમૂકાન્ધબધિરાંસ્તૈર્યગ્યોનાન્ વયોઽતિગાન્ ।
સ્ત્રીમ્લેચ્છવ્યાધિતવ્યઙ્ગાન્ મન્ત્રકાલેઽપસારયેત્ ॥ ૭.૧૪૯॥

ભિન્દન્ત્યવમતા મન્ત્રં તૈર્યગ્યોનાસ્તથૈવ ચ ।
સ્ત્રિયશ્ચૈવ વિશેષેણ તસ્માત્તત્રાદૃતો ભવેત્ ॥ ૭.૧૫૦॥

મધ્યંદિનેઽર્ધરાત્રે વા વિશ્રાન્તો વિગતક્લમઃ ।
ચિન્તયેદ્ધર્મકામાર્થાન્ સાર્ધં તૈરેક એવ વા ॥ ૭.૧૫૧॥ સાર્થં

પરસ્પરવિરુદ્ધાનાં તેષાં ચ સમુપાર્જનમ્ ।
કન્યાનાં સમ્પ્રદાનં ચ કુમારાણાં ચ રક્ષણમ્ ॥ ૭.૧૫૨॥

દૂતસમ્પ્રેષણં ચૈવ કાર્યશેષં તથૈવ ચ ।
અન્તઃપુરપ્રચારં ચ પ્રણિધીનાં ચ ચેષ્ટિતમ્ ॥ ૭.૧૫૩॥

કૃત્સ્નં ચાષ્ટવિધં કર્મ પઞ્ચવર્ગં ચ તત્ત્વતઃ ।
અનુરાગાપરાગૌ ચ પ્રચારં મણ્ડલસ્ય ચ ॥ ૭.૧૫૪॥

મધ્યમસ્ય પ્રચારં ચ વિજિગીષોશ્ચ ચેષ્ટિતમ્ ।
ઉદાસીનપ્રચારં ચ શત્રોશ્ચૈવ પ્રયત્નતઃ ॥ ૭.૧૫૫॥

એતાઃ પ્રકૃતયો મૂલં મણ્ડલસ્ય સમાસતઃ ।
અષ્ટૌ ચાન્યાઃ સમાખ્યાતા દ્વાદશૈવ તુ તાઃ સ્મૃતાઃ ॥ ૭.૧૫૬॥

અમાત્યરાષ્ટ્રદુર્ગાર્થદણ્ડાખ્યાઃ પઞ્ચ ચાપરાઃ ।
પ્રત્યેકં કથિતા હ્યેતાઃ સઙ્ક્ષેપેણ દ્વિસપ્તતિઃ ॥ ૭.૧૫૭॥

અનન્તરમરિં વિદ્યાદરિસેવિનમેવ ચ ।
અરેરનન્તરં મિત્રમુદાસીનં તયોઃ પરમ્ ॥ ૭.૧૫૮॥

તાન્ સર્વાનભિસંદધ્યાત્સામાદિભિરુપક્રમૈઃ ।

વ્યસ્તૈશ્ચૈવ સમસ્તૈશ્ચ પૌરુષેણ નયેન ચ ॥ ૭.૧૫૯॥

સંધિં ચ વિગ્રહં ચૈવ યાનમાસનમેવ ચ ।
દ્વૈધીભાવં સંશ્રયં ચ ષડ્ગુણાંશ્ચિન્તયેત્સદા ॥ ૭.૧૬૦॥

આસનં ચૈવ યાનં ચ સંધિં વિગ્રહમેવ ચ ।
કાર્યં વીક્ષ્ય પ્રયુઞ્જીત દ્વૈધં સંશ્રયમેવ ચ ॥ ૭.૧૬૧॥

સંધિં તુ દ્વિવિધં વિદ્યાદ્રાજા વિગ્રહમેવ ચ ।
ઉભે યાનાસને ચૈવ દ્વિવિધઃ સંશ્રયઃ સ્મૃતઃ ॥ ૭.૧૬૨॥

સમાનયાનકર્મા ચ વિપરીતસ્તથૈવ ચ ।
તદા ત્વાયતિસંયુક્તઃ સંધિર્જ્ઞેયો દ્વિલક્ષણઃ ॥ ૭.૧૬૩॥

સ્વયઙ્કૃતશ્ચ કાર્યાર્થમકાલે કાલ એવ વા ।
મિત્રસ્ય ચૈવાપકૃતે દ્વિવિધો વિગ્રહઃ સ્મૃતઃ ॥ ૭.૧૬૪॥

એકાકિનશ્ચાત્યયિકે કાર્યે પ્રાપ્તે યદૃચ્છયા ।
સંહતસ્ય ચ મિત્રેણ દ્વિવિધં યાનમુચ્યતે ॥ ૭.૧૬૫॥

ક્ષીણસ્ય ચૈવ ક્રમશો દૈવાત્પૂર્વકૃતેન વા ।
મિત્રસ્ય ચાનુરોધેન દ્વિવિધં સ્મૃતમાસનમ્ ॥ ૭.૧૬૬॥

બલસ્ય સ્વામિનશ્ચૈવ સ્થિતિઃ કાર્યાર્થસિદ્ધયે ।
દ્વિવિધં કીર્ત્યતે દ્વૈધં ષાડ્ગુણ્યગુણવેદિભિઃ ॥ ૭.૧૬૭॥

અર્થસમ્પાદનાર્થં ચ પીડ્યમાનસ્ય શત્રુભિઃ ।
સાધુષુ વ્યપદેશશ્ચ દ્વિવિધઃ સંશ્રયઃ સ્મૃતઃ ॥ ૭.૧૬૮॥

યદાઽવગચ્છેદાયત્યામાધિક્યં ધ્રુવમાત્મનઃ ।
તદાત્વે ચાલ્પિકાં પીડાં તદા સંધિં સમાશ્રયેત્ ॥ ૭.૧૬૯॥

યદા પ્રહૃષ્ટા મન્યેત સર્વાસ્તુ પ્રકૃતીર્ભૃશમ્ ।
અત્યુચ્છ્રિતં તથાત્માનં તદા કુર્વીત વિગ્રહમ્ ॥ ૭.૧૭૦॥

યદા મન્યેત ભાવેન હૃષ્ટં પુષ્ટં બલં સ્વકમ્ ।
પરસ્ય વિપરીતં ચ તદા યાયાદ્રિપું પ્રતિ ॥ ૭.૧૭૧॥

યદા તુ સ્યાત્પરિક્ષીણો વાહનેન બલેન ચ ।
તદાસીત પ્રયત્નેન શનકૈઃ સાન્ત્વયન્નરીન્ ॥ ૭.૧૭૨॥

મન્યેતારિં યદા રાજા સર્વથા બલવત્તરમ્ ।
તદા દ્વિધા બલં કૃત્વા સાધયેત્કાર્યમાત્મનઃ ॥ ૭.૧૭૩॥

યદા પરબલાનાં તુ ગમનીયતમો ભવેત્ ।
તદા તુ સંશ્રયેત્ક્ષિપ્રં ધાર્મિકં બલિનં નૃપમ્ ॥ ૭.૧૭૪॥

નિગ્રહં પ્રકૃતીનાં ચ કુર્યાદ્યોઽરિબલસ્ય ચ ।
ઉપસેવેત તં નિત્યં સર્વયત્નૈર્ગુરું યથા ॥ ૭.૧૭૫॥

યદિ તત્રાપિ સમ્પશ્યેદ્દોષં સંશ્રયકારિતમ્ ।
સુયુદ્ધમેવ તત્રાપિ નિર્વિશઙ્કઃ સમાચરેત્ ॥ ૭.૧૭૬॥

સર્વોપાયૈસ્તથા કુર્યાન્નીતિજ્ઞઃ પૃથિવીપતિઃ ।
યથાઽસ્યાભ્યધિકા ન સ્યુર્મિત્રોદાસીનશત્રવઃ ॥ ૭.૧૭૭॥

આયતિં સર્વકાર્યાણાં તદાત્વં ચ વિચારયેત્ ।
અતીતાનાં ચ સર્વેષાં ગુણદોષૌ ચ તત્ત્વતઃ ॥ ૭.૧૭૮॥

આયત્યાં ગુણદોષજ્ઞસ્તદાત્વે ક્ષિપ્રનિશ્ચયઃ ।
અતીતે કાર્યશેષજ્ઞઃ શત્રુભિર્નાભિભૂયતે ॥ ૭.૧૭૯॥

યથૈનં નાભિસંદધ્યુર્મિત્રોદાસીનશત્રવઃ ।
તથા સર્વં સંવિદધ્યાદેષ સામાસિકો નયઃ ॥ ૭.૧૮૦॥

તદા તુ યાનમાતિષ્ઠેદરિરાષ્ટ્રં પ્રતિ પ્રભુઃ ।
તદાનેન વિધાનેન યાયાદરિપુરં શનૈઃ ॥ ૭.૧૮૧॥

માર્ગશીર્ષે શુભે માસિ યાયાદ્યાત્રાં મહીપતિઃ ।
ફાલ્ગુનં વાથ ચૈત્રં વા માસૌ પ્રતિ યથાબલમ્ ॥ ૭.૧૮૨॥

અન્યેષ્વપિ તુ કાલેષુ યદા પશ્યેદ્ધ્રુવં જયમ્ ।
તદા યાયાદ્વિગૃહ્યૈવ વ્યસને ચોત્થિતે રિપોઃ ॥ ૭.૧૮૩॥

કૃત્વા વિધાનં મૂલે તુ યાત્રિકં ચ યથાવિધિ ।
ઉપગૃહ્યાસ્પદં ચૈવ ચારાન્ સમ્યગ્વિધાય ચ ॥ ૭.૧૮૪॥

સંશોધ્ય ત્રિવિધં માર્ગં ષડ્વિધં ચ બલં સ્વકમ્ ।
સામ્પરાયિકકલ્પેન યાયાદરિપુરં પ્રતિ ॥ ૭.૧૮૫॥

શત્રુસેવિનિ મિત્રે ચ ગૂઢે યુક્તતરો ભવેત્ ।
ગતપ્રત્યાગતે ચૈવ સ હિ કષ્ટતરો રિપુઃ ॥ ૭.૧૮૬॥

દણ્ડવ્યૂહેન તન્ માર્ગં યાયાત્તુ શકટેન વા ।
વરાહમકરાભ્યાં વા સૂચ્યા વા ગરુડેન વા ॥ ૭.૧૮૭॥

યતશ્ચ ભયમાશઙ્કેત્તતો વિસ્તારયેદ્બલમ્ ।
પદ્મેન ચૈવ વ્યૂહેન નિવિશેત સદા સ્વયમ્ ॥ ૭.૧૮૮॥

સેનાપતિબલાધ્યક્ષૌ સર્વદિક્ષુ નિવેશયેત્ ।
યતશ્ચ ભયમાશઙ્કેત્પ્રાચીં તાં કલ્પયેદ્દિશમ્ ॥ ૭.૧૮૯॥

ગુલ્માંશ્ચ સ્થાપયેદાપ્તાન્ કૃતસંજ્ઞાન્ સમન્તતઃ ।
સ્થાને યુદ્ધે ચ કુશલાનભીરૂનવિકારિણઃ ॥ ૭.૧૯૦॥

સંહતાન્ યોધયેદલ્પાન્ કામં વિસ્તારયેદ્બહૂન્ ।
સૂચ્યા વજ્રેણ ચૈવૈતાન્ વ્યૂહેન વ્યૂહ્ય યોધયેત્ ॥ ૭.૧૯૧॥

સ્યન્દનાશ્વૈઃ સમે યુધ્યેદનૂપેનોદ્વિપૈસ્તથા ।
વૃક્ષગુલ્માવૃતે ચાપૈરસિચર્માયુધૈઃ સ્થલે ॥ ૭.૧૯૨॥

કુરુક્ષેત્રાંશ્ચ મત્સ્યાંશ્ચ પઞ્ચાલાંશૂરસેનજાન્ । કૌરક્ષેત્રાંશ્ચ
દીર્ઘાંલ્લઘૂંશ્ચૈવ નરાનગ્રાનીકેષુ યોજયેત્ ॥ ૭.૧૯૩॥

પ્રહર્ષયેદ્બલં વ્યૂહ્ય તાંશ્ચ સમ્યક્પરીક્ષયેત્ । ભૃશં પરીક્ષયેત્)
ચેષ્ટાશ્ચૈવ વિજાનીયાદરીન્ યોધયતામપિ ॥ ૭.૧૯૪॥

ઉપરુધ્યારિમાસીત રાષ્ટ્રં ચાસ્યોપપીડયેત્ ।
દૂષયેચ્ચાસ્ય સતતં યવસાન્નોદકેન્ધનમ્ ॥ ૭.૧૯૫॥

ભિન્દ્યાચ્ચૈવ તડાગાનિ પ્રાકારપરિખાસ્તથા ।
સમવસ્કન્દયેચ્ચૈનં રાત્રૌ વિત્રાસયેત્તથા ॥ ૭.૧૯૬॥

ઉપજપ્યાનુપજપેદ્બુધ્યેતૈવ ચ તત્કૃતમ્ ।
યુક્તે ચ દૈવે યુધ્યેત જયપ્રેપ્સુરપેતભીઃ ॥ ૭.૧૯૭॥

સામ્ના દાનેન ભેદેન સમસ્તૈરથ વા પૃથક્ ।
વિજેતું પ્રયતેતારીન્ન યુદ્ધેન કદા ચન ॥ ૭.૧૯૮॥ અરિં

અનિત્યો વિજયો યસ્માદ્દૃશ્યતે યુધ્યમાનયોઃ ।
પરાજયશ્ચ સઙ્ગ્રામે તસ્માદ્યુદ્ધં વિવર્જયેત્ ॥ ૭.૧૯૯॥

ત્રયાણામપ્યુપાયાનાં પૂર્વોક્તાનામસમ્ભવે ।

તથા યુધ્યેત સમ્પન્નો વિજયેત રિપૂન્ યથા ॥ ૭.૨૦૦॥

જિત્વા સમ્પૂજયેદ્દેવાન્ બ્રાહ્મણાંશ્ચૈવ ધાર્મિકાન્ ।
પ્રદદ્યાત્પરિહારાર્થં ખ્યાપયેદભયાનિ ચ ॥ ૭.૨૦૧॥

સર્વેષાં તુ વિદિત્વૈષાં સમાસેન ચિકીર્ષિતમ્ ।
સ્થાપયેત્તત્ર તદ્વંશ્યં કુર્યાચ્ચ સમયક્રિયામ્ ॥ ૭.૨૦૨॥

પ્રમાણાનિ ચ કુર્વીત તેષાં ધર્માન્ યથોદિતાન્ ।
રત્નૈશ્ચ પૂજયેદેનં પ્રધાનપુરુષૈઃ સહ ॥ ૭.૨૦૩॥

આદાનમપ્રિયકરં દાનં ચ પ્રિયકારકમ્ ।
અભીપ્સિતાનામર્થાનાં કાલે યુક્તં પ્રશસ્યતે ॥ ૭.૨૦૪॥ કાલયુક્તં

સર્વં કર્મેદમાયત્તં વિધાને દૈવમાનુષે ।
તયોર્દૈવમચિન્ત્યં તુ માનુષે વિદ્યતે ક્રિયા ॥ ૭.૨૦૫॥

The followingthree shlokas are found only
in MedhAtithi's commentary
દૈવેન વિધિના યુક્તં માનુષ્યં યત્પ્રવર્તતે ।
પરિક્લેશેન મહતા તદર્થસ્ય સમાધકમ્ ॥ ૭.૨૦૭
સંયુક્તસ્યાપિ દૈવેન પુરુષકારેણ વર્જિતમ્ ।
વિના પુરુષકારેણ ફલં ક્ષેત્રં પ્રયચ્છતિ ॥ ૭.૨૦૮
ચન્દ્રાર્કાદ્યા ગ્રહા વાયુરગ્નિરાપસ્તથૈવ ચ ।
ઇહ દૈવેન સાધ્યન્તે પૌરુષેણ પ્રયત્નતઃ ॥ ૭.૨૦૯)
સહ વાऽપિ વ્રજેદ્યુક્તઃ સંધિં કૃત્વા પ્રયત્નતઃ ।
મિત્રં હિરણ્યં ભૂમિં વા સમ્પશ્યંસ્ત્રિવિધં ફલમ્ ॥ ૭.૨૦૬॥

પાર્ષ્ણિગ્રાહં ચ સમ્પ્રેક્ષ્ય તથાક્રન્દં ચ મણ્ડલે ।
મિત્રાદથાપ્યમિત્રાદ્વા યાત્રાફલમવાપ્નુયાત્ ॥ ૭.૨૦૭॥

હિરણ્યભૂમિસમ્પ્રાપ્ત્યા પાર્થિવો ન તથૈધતે ।
યથા મિત્રં ધ્રુવં લબ્ધ્વા કૃશમપ્યાયતિક્ષમમ્ ॥ ૭.૨૦૮॥

ધર્મજ્ઞં ચ કૃતજ્ઞં ચ તુષ્ટપ્રકૃતિમેવ ચ ।
અનુરક્તં સ્થિરારમ્ભં લઘુમિત્રં પ્રશસ્યતે ॥ ૭.૨૦૯॥

પ્રાજ્ઞં કુલીનં શૂરં ચ દક્ષં દાતારમેવ ચ ।
કૃતજ્ઞં ધૃતિમન્તં ચ કષ્ટમાહુરરિં બુધાઃ ॥ ૭.૨૧૦॥

આર્યતા પુરુષજ્ઞાનં શૌર્યં કરુણવેદિતા ।
સ્થૌલલક્ષ્યં ચ સતતમુદાસીનગુણોદયઃ ॥ ૭.૨૧૧॥

ક્ષેમ્યાં સસ્યપ્રદાં નિત્યં પશુવૃદ્ધિકરીમપિ ।
પરિત્યજેન્નૃપો ભૂમિમાત્માર્થમવિચારયન્ ॥ ૭.૨૧૨॥

આપદર્થં ધનં રક્ષેદ્દારાન્ રક્ષેદ્ધનૈરપિ । આપદર્થે
આત્માનં સતતં રક્ષેદ્દારૈરપિ ધનૈરપિ ॥ ૭.૨૧૩॥

સહ સર્વાઃ સમુત્પન્નાઃ પ્રસમીક્ષ્યાપદો ભૃશમ્ ।
સંયુક્તાંશ્ચ વિયુક્તાંશ્ચ સર્વોપાયાન્ સૃજેદ્બુધઃ ॥ ૭.૨૧૪॥

ઉપેતારમુપેયં ચ સર્વોપાયાંશ્ચ કૃત્સ્નશઃ ।
એતત્ત્રયં સમાશ્રિત્ય પ્રયતેતાર્થસિદ્ધયે ॥ ૭.૨૧૫॥

એવં સર્વમિદં રાજા સહ સમ્મન્ત્ર્ય મન્ત્રિભિઃ ।
વ્યાયમ્યાપ્લુત્ય મધ્યાહ્ને ભોક્તુમન્તઃપુરં વિશેત્ ॥ ૭.૨૧૬॥

તત્રાત્મભૂતૈઃ કાલજ્ઞૈરહાર્યૈઃ પરિચારકૈઃ ।
સુપરીક્ષિતમન્નાદ્યમદ્યાન્ મન્ત્રૈર્વિષાપહૈઃ ॥ ૭.૨૧૭॥

વિષઘ્નૈરગદૈશ્ચાસ્ય સર્વદ્રવ્યાણિ યોજયેત્ । વિષઘ્નૈરુદકૈશ્ચાસ્ય સર્વદ્રવ્યાણિ શોધયેત્
વિષઘ્નાનિ ચ રત્નાનિ નિયતો ધારયેત્સદા ॥ ૭.૨૧૮॥

પરીક્ષિતાઃ સ્ત્રિયશ્ચૈનં વ્યજનોદકધૂપનૈઃ ।
વેષાભરણસંશુદ્ધાઃ સ્પૃશેયુઃ સુસમાહિતાઃ ॥ ૭.૨૧૯॥

એવં પ્રયત્નં કુર્વીત યાનશય્યાઽઽસનાશને ।
સ્નાને પ્રસાધને ચૈવ સર્વાલઙ્કારકેષુ ચ ॥ ૭.૨૨૦॥

ભુક્તવાન્ વિહરેચ્ચૈવ સ્ત્રીભિરન્તઃપુરે સહ ।
વિહૃત્ય તુ યથાકાલં પુનઃ કાર્યાણિ ચિન્તયેત્ ॥ ૭.૨૨૧॥

અલઙ્કૃતશ્ચ સમ્પશ્યેદાયુધીયં પુનર્જનમ્ ।
વાહનાનિ ચ સર્વાણિ શસ્ત્રાણ્યાભરણાનિ ચ ॥ ૭.૨૨૨॥

સંધ્યાં ચોપાસ્ય શ઼ૃણુયાદન્તર્વેશ્મનિ શસ્ત્રભૃત્ ।
રહસ્યાખ્યાયિનાં ચૈવ પ્રણિધીનાં ચ ચેષ્ટિતમ્ ॥ ૭.૨૨૩॥

ગત્વા કક્ષાન્તરં ત્વન્યત્સમનુજ્ઞાપ્ય તં જનમ્ ।

પ્રવિશેદ્ભોજનાર્થં ચ સ્ત્રીવૃતોઽન્તઃપુરં પુનઃ ॥ ૭.૨૨૪॥

તત્ર ભુક્ત્વા પુનઃ કિં ચિત્તૂર્યઘોષૈઃ પ્રહર્ષિતઃ ।
સંવિશેત્તં યથાકાલમુત્તિષ્ઠેચ્ચ ગતક્લમઃ ॥ ૭.૨૫૫॥

એતદ્વિધાનમાતિષ્ઠેદરોગઃ પૃથિવીપતિઃ ।
અસ્વસ્થઃ સર્વમેતત્તુ ભૃત્યેષુ વિનિયોજયેત્ ॥ ૭.૨૨૬॥

## અધ્યાય ૮

વ્યવહારાન્ દિદૃક્ષુસ્તુ બ્રાહ્મણૈઃ સહ પાર્થિવઃ ।
મન્ત્રજ્ઞૈર્મન્ત્રિભિશ્ચૈવ વિનીતઃ પ્રવિશેત્સભામ્ ॥ ૮.૧॥

તત્રાસીનઃ સ્થિતો વાઽપિ પાણિમુદ્યમ્ય દક્ષિણમ્ ।
વિનીતવેષાભરણઃ પશ્યેત્કાર્યાણિ કાર્યિણામ્ ॥ ૮.૨॥

પ્રત્યહં દેશદૃષ્ટૈશ્ચ શાસ્ત્રદૃષ્ટૈશ્ચ હેતુભિઃ ।
અષ્ટાદશસુ માર્ગેષુ નિબદ્ધાનિ પૃથક્પૃથક્ ॥ ૮.૩॥

તેષામાદ્યં ઋણાદાનં નિક્ષેપોઽસ્વામિવિક્રયઃ ।
સમ્ભૂય ચ સમુત્થાનં દત્તસ્યાનપકર્મ ચ ॥ ૮.૪॥

વેતનસ્યૈવ ચાદાનં સંવિદશ્ચ વ્યતિક્રમઃ ।
ક્રયવિક્રયાનુશયો વિવાદઃ સ્વામિપાલયોઃ ॥ ૮.૫॥

સીમાવિવાદધર્મશ્ચ પારુષ્યે દણ્ડવાચિકે ।
સ્તેયં ચ સાહસં ચૈવ સ્ત્રીસઙ્ગ્રહણમેવ ચ ॥ ૮.૬॥

સ્ત્રીપુંધર્મો વિભાગશ્ચ દ્યૂતમાહ્વય એવ ચ ।
પદાન્યષ્ટાદશૈતાનિ વ્યવહારસ્થિતાવિહ ॥ ૮.૭॥

એષુ સ્થાનેષુ ભૂયિષ્ઠં વિવાદં ચરતાં નૃણામ્ ।
ધર્મં શાશ્વતમાશ્રિત્ય કુર્યાત્કાર્યવિનિર્ણયમ્ ॥ ૮.૮॥

યદા સ્વયં ન કુર્યાત્તુ નૃપતિઃ કાર્યદર્શનમ્ ।
તદા નિયુઞ્જ્યાદ્વિદ્વાંસં બ્રાહ્મણં કાર્યદર્શને ॥ ૮.૯॥

સોઽસ્ય કાર્યાણિ સમ્પશ્યેત્સભ્યૈરેવ ત્રિભિર્વૃતઃ ।
સભામેવ પ્રવિશ્યાગ્ર્યામાસીનઃ સ્થિત એવ વા ॥ ૮.૧૦॥

યસ્મિન્ દેશે નિષીદન્તિ વિપ્રા વેદવિદસ્ત્રયઃ ।
રાજ્ઞશ્ચાધિકૃતો વિદ્વાન્ બ્રહ્મણસ્તાં સભાં વિદુઃ ॥ ૮.૧૧॥

ધર્મો વિદ્ધસ્ત્વધર્મેણ સભાં યત્રોપતિષ્ઠતે ।
શલ્યં ચાસ્ય ન કૃન્તન્તિ વિદ્ધાસ્તત્ર સભાસદઃ ॥ ૮.૧૨॥

સભાં વા ન પ્રવેષ્ટવ્યં વક્તવ્યં વા સમઞ્જસમ્ । સભા વા ન પ્રવેષ્ટવ્યા
અબ્રુવન્ વિબ્રુવન્ વાઽપિ નરો ભવતિ કિલ્બિષી ॥ ૮.૧૩॥

યત્ર ધર્મો હ્યધર્મેણ સત્યં યત્રાનૃતેન ચ ।
હન્યતે પ્રેક્ષમાણાનાં હતાસ્તત્ર સભાસદઃ ॥ ૮.૧૪॥

ધર્મ એવ હતો હન્તિ ધર્મો રક્ષતિ રક્ષિતઃ ।
તસ્માદ્ધર્મો ન હન્તવ્યો મા નો ધર્મો હતોઽવધીત્ ॥ ૮.૧૫॥ વધીત્

વૃષો હિ ભગવાન્ ધર્મસ્તસ્ય યઃ કુરુતે હ્યલમ્ । ત્વલમ્
વૃષલં તં વિદુર્દેવાસ્તસ્માદ્ધર્મં ન લોપયેત્ ॥ ૮.૧૬॥

એક એવ સુહૃદ્ધર્મો નિધાનેઽપ્યનુયાતિ યઃ ।
શરીરેણ સમં નાશં સર્વમન્યધિ ગચ્છતિ ॥ ૮.૧૭॥

પાદોઽધર્મસ્ય કર્તારં પાદઃ સાક્ષિણં ઋચ્છતિ ।
પાદઃ સભાસદઃ સર્વાન્ પાદો રાજાનમૃચ્છતિ ॥ ૮.૧૮॥

રાજા ભવત્યનેનાસ્તુ મુચ્યન્તે ચ સભાસદઃ ।
એનો ગચ્છતિ કર્તારં નિન્દાઽર્હો યત્ર નિન્દ્યતે ॥ ૮.૧૯॥

જાતિમાત્રોપજીવી વા કામં સ્યાદ્બ્રાહ્મણબ્રુવઃ ।
ધર્મપ્રવક્તા નૃપતેર્ન શૂદ્રઃ કથંચન ॥ ૮.૨૦॥

યસ્ય શૂદ્રસ્તુ કુરુતે રાજ્ઞો ધર્મવિવેચનમ્ ।
તસ્ય સીદતિ તદ્રાષ્ટ્રં પઙ્કે ગૌરિવ પશ્યતઃ ॥ ૮.૨૧॥

યદ્રાષ્ટ્રં શૂદ્રભૂયિષ્ઠં નાસ્તિકાક્રાન્તમદ્વિજમ્ ।
વિનશ્યત્યાશુ તત્કૃત્સ્નં દુર્ભિક્ષવ્યાધિપીડિતમ્ ॥ ૮.૨૨॥

ધર્માસનમધિષ્ઠાય સંવીતાઙ્ગઃ સમાહિતઃ ।
પ્રણમ્ય લોકપાલેભ્યઃ કાર્યદર્શનમારભેત્ ॥ ૮.૨૩॥

અર્થાનર્થાવુભૌ બુદ્ધ્વા ધર્માધર્મૌ ચ કેવલૌ ।
વર્ણક્રમેણ સર્વાણિ પશ્યેત્કાર્યાણિ કાર્યિણામ્ ॥ ૮.૨૪॥

બાહ્યૈર્વિભાવયેત્લિઙ્ગૈર્ભાવમન્તર્ગતં નૃણામ્ ।
સ્વરવર્ણેઙ્ગિતાકારૈશ્ચક્ષુષા ચેષ્ટિતેન ચ ॥ ૮.૨૫॥

આકારૈરિઙ્ગિતૈર્ગત્યા ચેષ્ટયા ભાષિતેન ચ ।
નેત્રવક્ત્રવિકારૈશ્ચ ગૃહ્યતેऽન્તર્ગતં મનઃ ॥ ૮.૨૬॥

બાલદાયાદિકં રિક્થં તાવદ્રાજાऽનુપાલયેત્ ।
યાવત્સ સ્યાત્સમાવૃત્તો યાવત્ચાતીતશૈશવઃ ॥ યાવદ્વાऽતીતશૈશવઃ ૮.૨૭॥

વશાऽપુત્રાસુ ચૈવં સ્યાદ્રક્ષણં નિષ્કુલાસુ ચ ।
પતિવ્રતાસુ ચ સ્ત્રીષુ વિધવાસ્વાતુરાસુ ચ ॥ ૮.૨૮॥

જીવન્તીનાં તુ તાસાં યે તધરેયુઃ સ્વબાન્ધવાઃ ।
તાંશિષ્યાત્ચૌરદણ્ડેન ધાર્મિકઃ પૃથિવીપતિઃ ॥ ૮.૨૯॥

પ્રણષ્ટસ્વામિકં રિક્થં રાજા ત્ર્યબ્દં નિધાપયેત્ ।
અર્વાક્ત્ર્યબ્દાદ્ધરેત્સ્વામી પરેણ નૃપતિર્હરેત્ ॥ ૮.૩૦॥

મમૈદમિતિ યો બ્રૂયાત્સોऽનુયોજ્યો યથાવિધિ ।
સંવાદ્ય રૂપસઙ્ખ્યાદીન્ સ્વામી તદ્દ્રવ્યમર્હતિ ॥ ૮.૩૧॥

અવેદયાનો નષ્ટસ્ય દેશં કાલં ચ તત્ત્વતઃ ।
વર્ણં રૂપં પ્રમાણં ચ તત્સમં દણ્ડમર્હતિ ॥ ૮.૩૨॥

આદદીતાથ ષડ્ભાગં પ્રનષ્ટાધિગતાન્નૃપઃ ।
દશમં દ્વાદશં વાऽપિ સતાં ધર્મમનુસ્મરન્ ॥ ૮.૩૩॥

પ્રણષ્ટાધિગતં દ્રવ્યં તિષ્ઠેદ્યુક્તૈરધિષ્ઠિતમ્ ।
યાંસ્તત્ર ચૌરાન્ ગૃહ્ણીયાત્તાન્ રાજૈભેન ઘાતયેત્ ॥ ૮.૩૪॥

મમાયમિતિ યો બ્રૂયાન્નિધિં સત્યેન માનવઃ ।
તસ્યાદદીત ષડ્ભાગં રાજા દ્વાદશમેવ વા ॥ ૮.૩૫॥

અનૃતં તુ વદન્ દણ્ડ્યઃ સ્વવિત્તસ્યાંશમષ્ટમમ્ ।
તસ્યૈવ વા નિધાનસ્ય સઙ્ખ્યયાऽલ્પીયસીં કલામ્ ॥ ૮.૩૬॥

વિદ્વાંસ્તુ બ્રાહ્મણો દૃષ્ટ્વા પૂર્વોપનિહિતં નિધિમ્ ।
અશેષતોऽપ્યાદદીત સર્વસ્યાધિપતિર્હિ સઃ ॥ ૮.૩૮॥

યં તુ પશ્યેન્નિધિં રાજા પુરાણં નિહિતં ક્ષિતૌ ।

તસ્માદ્દ્વિજેભ્યો દત્ત્વાઽર્ધમર્ધં કોશે પ્રવેશયેત્ ॥ ૮.૩૮॥

નિધીનાં તુ પુરાણાનાં ધાતૂનામેવ ચ ક્ષિતૌ ।
અર્ધભાગ્રક્ષણાદ્રાજા ભૂમેરધિપતિર્હિ સઃ ॥ ૮.૩૯॥

દાતવ્યં સર્વવર્ણેભ્યો રાજ્ઞા ચૌરૈર્હૃતં ધનમ્ ।
રાજા તદુપયુઞ્જાનશ્ચૌરસ્યાપ્નોતિ કિલ્બિષમ્ ॥ ૮.૪૦॥

જાતિજાનપદાન્ ધર્માન્ શ્રેણીધર્માંશ્ચ ધર્મવિત્ ।
સમીક્ષ્ય કુલધર્માંશ્ચ સ્વધર્મં પ્રતિપાદયેત્ ॥ ૮.૪૧॥

સ્વાનિ કર્માણિ કુર્વાણા દૂરે સન્તોઽપિ માનવાઃ ।
પ્રિયા ભવન્તિ લોકસ્ય સ્વે સ્વે કર્મણ્યવસ્થિતાઃ ॥ ૮.૪૨॥

નોત્પાદયેત્સ્વયં કાર્યં રાજા નાપ્યસ્ય પૂરુષઃ ।
ન ચ પ્રાપિતમન્યેન ગ્રસેદર્થં કથં ચન ॥ ૮.૪૩॥ ગ્રસેતાર્થં

યથા નયત્યસૃક્પાતૈર્મૃગસ્ય મૃગયુઃ પદમ્ ।
નયેત્તથાઽનુમાનેન ધર્મસ્ય નૃપતિઃ પદમ્ ॥ ૮.૪૪॥

સત્યમર્થં ચ સમ્પશ્યેદાત્માનમથ સાક્ષિણઃ । સાક્ષિણમ્
દેશં રૂપં ચ કાલં ચ વ્યવહારવિધૌ સ્થિતઃ ॥ ૮.૪૫॥

સદ્ભિરાચરિતં યત્સ્યાદ્ધાર્મિકૈશ્ચ દ્વિજાતિભિઃ ।
તદ્દેશકુલજાતીનામવિરુદ્ધં પ્રકલ્પયેત્ ॥ ૮.૪૬॥

અધમર્ણાર્થસિદ્ધ્યર્થમુત્તમર્ણેન ચોદિતઃ ।
દાપયેદ્ધનિકસ્યાર્થમધમર્ણાદ્વિભાવિતમ્ ॥ ૮.૪૭॥

યૈર્યૈરુપાયૈરર્થં સ્વં પ્રાપ્નુયાદુત્તમર્ણિકઃ ।
તૈર્તૈરુપાયૈઃ સઙ્ગૃહ્ય દાપયેદધમર્ણિકમ્ ॥ ૮.૪૮॥

ધર્મેણ વ્યવહારેણ છલેનાચરિતેન ચ ।
પ્રયુક્તં સાધયેદર્થં પઞ્ચમેન બલેન ચ ॥ ૮.૪૯॥

યઃ સ્વયં સાધયેદર્થમુત્તમર્ણોઽધમર્ણિકાત્ ।
ન સ રાજ્ઞાઽભિયોક્તવ્યઃ સ્વકં સંસાધયન્ ધનમ્ ॥ ૮.૫૦॥

અર્થેઽપવ્યયમાનં તુ કરણેન વિભાવિતમ્ ।
દાપયેદ્ધનિકસ્યાર્થં દણ્ડલેશં ચ શક્તિતઃ ॥ ૮.૫૧॥

અપહ્નવેઽધમર્ણસ્ય દેહીત્યુક્તસ્ય સંસદિ ।
અભિયોક્તા દિશેદ્દેશ્યં કરણં વાઽન્યદુદ્દિશેત્ ॥ ૮.૫૨॥

અદેશ્યં યશ્ચ દિશતિ નિર્દિશ્યાપહ્નુતે ચ યઃ ।
યશ્ચાધરોત્તરાનર્થાન્ વિગીતાન્નાવબુધ્યતે ॥ ૮.૫૩॥

અપદિશ્યાપદેશ્યં ચ પુનર્યસ્ત્વપધાવતિ । અપદિશ્યાપદેશં
સમ્યક્પ્રણિહિતં ચાર્થં પૃષ્ટઃ સન્નાભિનન્દતિ ॥ ૮.૫૪॥

અસમ્ભાષ્યે સાક્ષિભિશ્ચ દેશે સમ્ભાષતે મિથઃ ।
નિરુચ્યમાનં પ્રશ્નં ચ નેચ્છેદ્યશ્ચાપિ નિષ્પતેત્ ॥ ૮.૫૫॥

બ્રૂહીત્યુક્તશ્ચ ન બ્રૂયાદુક્તં ચ ન વિભાવયેત્ ।
ન ચ પૂર્વાપરં વિદ્યાત્તસ્માદર્થાત્સ હીયતે ॥ ૮.૫૬॥

સાક્ષિણઃ સન્તિ મેત્યુક્ત્વા દિશેત્યુક્તો દિશેન્ન યઃ । જ્ઞાતારઃ સન્તિ મેત્યુક્ત્વા
ધર્મસ્થઃ કારણૈરેતૈર્હીનં તમપિ નિર્દિશેત્ ॥ ૮.૫૭॥ તમિતિ નિર્દિશેત્

અભિયોક્તા ન ચેદ્બ્રૂયાદ્બધ્યો દણ્ડ્યશ્ચ ધર્મતઃ । બન્ધ્યો દણ્ડ્યશ્ચ
ન ચેત્રિપક્ષાત્પ્રબ્રૂયાદ્ધર્મં પ્રતિ પરાજિતઃ ॥ ૮.૫૮॥

યો યાવદ્નિહ્નુવીતાર્થં મિથ્યા યાવતિ વા વદેત્ ।
તૌ નૃપેણ હ્યધર્મજ્ઞૌ દાપ્યૌ તદ્દ્વિગુણં દમમ્ ॥ ૮.૫૯॥

પૃષ્ટોઽપવ્યયમાનસ્તુ કૃતાવસ્થો ધનેષિણા ।
ત્ર્યવરૈઃ સાક્ષિભિર્ભાવ્યો નૃપબ્રાહ્મણસંનિધૌ ॥ ૮.૬૦॥

યાદૃશા ધનિભિઃ કાર્યા વ્યવહારેષુ સાક્ષિણઃ ।
તાદૃશાન્ સમ્પ્રવક્ષ્યામિ યથા વાચ્યં ઋતં ચ તૈઃ ॥ ૮.૬૧॥

ગૃહિણઃ પુત્રિણો મૌલાઃ ક્ષત્રવિદ્શૂદ્રયોનયઃ ।
અર્થ્યુક્તાઃ સાક્ષ્યમર્હન્તિ ન યે કે ચિદનાપદિ ॥ ૮.૬૨॥

આપ્તાઃ સર્વેષુ વર્ણેષુ કાર્યાઃ કાર્યેષુ સાક્ષિણઃ ।
સર્વધર્મવિદોઽલુબ્ધા વિપરીતાંસ્તુ વર્જયેત્ ॥ ૮.૬૩॥

નાર્થસમ્બન્ધિનો નાપ્તા ન સહાયા ન વૈરિણઃ ।
ન દૃષ્ટદોષાઃ કર્તવ્યા ન વ્યાધ્યાર્તા ન દૂષિતાઃ ॥ ૮.૬૪॥

ન સાક્ષી નૃપતિઃ કાર્યો ન કારુકકુશીલવૌ ।
ન શ્રોત્રિયો ન લિઙ્ગસ્થો ન સઙ્ગેભ્યો વિનિર્ગતઃ ॥ ૮.૬૫॥

નાધ્યધીનો ન વક્તવ્યો ન દસ્યુર્ન વિકર્મકૃત્ ।
ન વૃદ્ધો ન શિશુર્નૈકો નાન્ત્યો ન વિકલેન્દ્રિયઃ ॥ ૮.૬૬॥

નાર્તો ન મત્તો નોન્મત્તો ન ક્ષુત્તૃષ્ણોપપીડિતઃ ।
ન શ્રમાર્તો ન કામાર્તો ન ક્રુદ્ધો નાપિ તસ્કરઃ ॥ ૮.૬૭॥

સ્ત્રીણાં સાક્ષ્યં સ્ત્રિયઃ કુર્યુર્દ્વિજાનાં સદૃશા દ્વિજાઃ ।
શૂદ્રાશ્ચ સન્તઃ શૂદ્રાણાં અન્ત્યાનામન્ત્યયોનયઃ ॥ ૮.૬૮॥

અનુભાવી તુ યઃ કશ્ચિત્કુર્યાત્સાક્ષ્યં વિવાદિનામ્ ।
અન્તર્વેશ્મન્યરણ્યે વા શરીરસ્યાપિ ચાત્યયે ॥ ૮.૬૯॥

સ્ત્રિયાઽપ્યસમ્ભાવે કાર્યં બાલેન સ્થવિરેણ વા ।
શિષ્યેણ બન્ધુના વાઽપિ દાસેન ભૃતકેન વા ॥ ૮.૭૦॥

બાલવૃદ્ધાતુરાણાં ચ સાક્ષ્યેષુ વદતાં મૃષા ।
જાનીયાદસ્થિરાં વાચમુત્સિક્તમનસાં તથા ॥ ૮.૭૧॥

સાહસેષુ ચ સર્વેષુ સ્તેયસઙ્ગ્રહણેષુ ચ ।
વાગ્દણ્ડયોશ્ચ પારુષ્યે ન પરીક્ષેત સાક્ષિણઃ ॥ ૮.૭૨॥

બહુત્વં પરિગૃહ્ણીયાત્સાક્ષિદ્વૈધે નરાધિપઃ ।
સમેષુ તુ ગુણોત્કૃષ્ટાન્ ગુણિદ્વૈધે દ્વિજોત્તમાન્ ॥ ૮.૭૩॥

સમક્ષદર્શનાત્સાક્ષ્યં શ્રવણાચ્ચૈવ સિધ્યતિ ।
તત્ર સત્યં બ્રુવન્ સાક્ષી ધર્માર્થાભ્યાં ન હીયતે ॥ ૮.૭૪॥

સાક્ષી દૃષ્ટશ્રુતાદન્યદ્વિબ્રુવન્નાર્યસંસદિ ।
અવાઙ્નરકમભ્યેતિ પ્રેત્ય સ્વર્ગાચ્ચ હીયતે ॥ ૮.૭૫॥

યત્રાનિબદ્ધોઽપીક્ષેત શ઼ૃણુયાદ્વાઽપિ કિં ચન ।
પૃષ્ટસ્તત્રાપિ તદ્બ્રૂયાદ્યથાદૃષ્ટં યથાશ્રુતમ્ ॥ ૮.૭૬॥

એકોઽલુબ્ધસ્તુ સાક્ષી સ્યાદ્બહ્વ્યઃ શુચ્યોઽપિ ન સ્ત્રિયઃ । ત્વસાક્ષી
સ્ત્રીબુદ્ધેરસ્થિરત્વાત્તુ દોષૈશ્ચાન્યેઽપિ યે વૃતાઃ ॥ ૮.૭૭॥

સ્વભાવેનૈવ યદ્બ્રૂયુસ્તદ્ગ્રાહ્યં વ્યાવહારિકમ્ ।
અતો યદન્યદ્વિબ્રૂયુર્ધર્માર્થં તદપાર્થકમ્ ॥ ૮.૭૮॥

સભાન્તઃ સાક્ષિણઃ પ્રાપ્તાનર્થિપ્રત્યર્થિસંનિધૌ ।

પ્રાડ્વિવાકોऽનુયુઞ્જીત વિધિનાऽનેન સાન્ત્વયન્ ॥ ૮.૭૯॥

યદ્દ્વયોરનયોર્વેત્થ કાર્યેऽસ્મિંશ્ચેષ્ટિતં મિથઃ ।
તદ્બ્રૂત સર્વં સત્યેન યુષ્માકં હ્યત્ર સાક્ષિતા ॥ ૮.૮૦॥

સત્યં સાક્ષ્યે બ્રુવન્ સાક્ષી લોકાન્  આપ્નોત્યપુષ્કલાન્ । આપ્નોત્યનિન્દિતાન્
ઇહ ચાનુત્તમાં કીર્તિં વાગેષા બ્રહ્મપૂજિતા ॥ ૮.૮૧॥

સાક્ષ્યેऽનૃતં વદન્ પાશૈર્બધ્યતે વારુણૈર્ભૃશમ્ ।
વિવશઃ શતમાજાતીસ્તસ્માત્સાક્ષ્યં વદેદૃતમ્ ॥ ૮.૮૨॥

સત્યેન પૂયતે સાક્ષી ધર્મઃ સત્યેન વર્ધતે ।
તસ્માત્સત્યં હિ વક્તવ્યં સર્વવર્ણેષુ સાક્ષિભિઃ ॥ ૮.૮૩॥

આત્મૈવ હ્યાત્મનઃ સાક્ષી ગતિરાત્મા તથાऽત્મનઃ ।
માऽવમંસ્થાઃ સ્વમાત્માનં નૃણાં સાક્ષિણમુત્તમમ્ ॥ ૮.૮૪॥

મન્યન્તે વૈ પાપકૃતો ન કશ્ચિત્પશ્યતીતિ નઃ ।
તાંસ્તુ દેવાઃ પ્રપશ્યન્તિ સ્વસ્યૈવાન્તરપૂરુષઃ ॥ ૮.૮૫॥

દ્યૌર્ભૂમિરાપો હૃદયં ચન્દ્રાર્કાગ્નિયમાનિલાઃ ।
રાત્રિઃ સંધ્યે ચ ધર્મશ્ચ વૃત્તજ્ઞાઃ સર્વદેહિનામ્ ॥ ૮.૮૬॥

દેવબ્રાહ્મણસાંનિધ્યે સાક્ષ્યં પૃચ્છેદૃતં દ્વિજાન્ ।
ઉદઙ્મુખાન્ પ્રાઙ્મુખાન્ વા પૂર્વાહ્ણે વૈ શુચિઃ શુચીન્ ॥ ૮.૮૭॥

બ્રૂહીતિ બ્રાહ્મણં પૃચ્છેત્સત્યં બ્રૂહીતિ પાર્થિવમ્ ।
ગોબીજકાઞ્ચનૈર્વૈશ્યં શૂદ્રં સર્વૈસ્તુ પાતકૈઃ ॥ ૮.૮૮॥

બ્રહ્મઘ્નો યે સ્મૃતા લોકા યે ચ સ્ત્રીબાલઘાતિનઃ ।
મિત્રદ્રુહઃ કૃતઘ્નસ્ય તે તે સ્યુર્બ્રુવતો મૃષા ॥ ૮.૮૯॥

જન્મપ્રભૃતિ યત્કિં ચિત્પુણ્યં ભદ્ર ત્વયા કૃતમ્ ।
તત્તે સર્વં શુનો ગચ્છેદ્યદિ બ્રૂયાસ્ત્વમન્યથા ॥ ૮.૯૦॥

એકોऽહમસ્મીત્યાત્માનં યસ્ત્વં કલ્યાણ મન્યસે ।
નિત્યં સ્થિતસ્તે હૃદ્યેષ પુણ્યપાપેક્ષિતા મુનિઃ ॥ ૮.૯૧॥

યમો વૈવસ્વતો દેવો યસ્તવૈષ હૃદિ સ્થિતઃ ।
તેન ચેદવિવાદસ્તે મા ગઙ્ગાં મા કુરૂન્ ગમઃ ॥ ૮.૯૨॥

નગ્નો મુણ્ડઃ કપાલેન ચ ભિક્ષાર્થી ક્ષુત્પિપાસિતઃ । કપાલી
અન્ધઃ શત્રુકુલં ગચ્છેદ્યઃ સાક્ષ્યમનૃતં વદેત્ ॥ ૮.૯૩॥

અવાક્શિરાસ્તમસ્યન્ધે કિલ્બિષી નરકં વ્રજેત્ ।
યઃ પ્રશ્નં વિતથં બ્રૂયાત્પૃષ્ટઃ સન્ ધર્મનિશ્ચયે ॥ ૮.૯૪॥

અન્ધો મત્સ્યાનિવાશ્નાતિ સ નરઃ કણ્ટકૈઃ સહ ।
યો ભાષતેઽર્થવૈકલ્યમપ્રત્યક્ષં સભાં ગતઃ ॥ ૮.૯૫॥

યસ્ય વિદ્વાન્ હિ વદતઃ ક્ષેત્રજ્ઞો નાભિશઙ્કતે । નાતિશઙ્કતે
તસ્માન્ન દેવાઃ શ્રેયાંસં લોકેઽન્યં પુરુષં વિદુઃ ॥ ૮.૯૬॥

યાવતો બાન્ધવાન્ યસ્મિન્ હન્તિ સાક્ષ્યેઽનૃતં વદન્ ।
તાવતઃ સઙ્ખ્યયા તસ્મિન્ શ‍ૃણુ સૌમ્યાનુપૂર્વશઃ ॥ ૮.૯૭॥

પઞ્ચ પશ્વનૃતે હન્તિ દશ હન્તિ ગવાનૃતે ।
શતમશ્વાનૃતે હન્તિ સહસ્રં પુરુષાનૃતે ॥ ૮.૯૮॥

હન્તિ જાતાનજાતાંશ્ચ હિરણ્યાર્થેઽનૃતં વદન્ ।
સર્વં ભૂમિઅનૃતે હન્તિ મા સ્મ ભૂમિઅનૃતં વદીઃ ॥ ૮.૯૯॥

અપ્સુ ભૂમિવદિત્યાહુઃ સ્ત્રીણાં ભોગે ચ મૈથુને ।
અબ્જેષુ ચૈવ રત્નેષુ સર્વેષ્વશ્મમયેષુ ચ ॥ ૮.૧૦૦॥

એતાન્ દોષાનવેક્ષ્ય ત્વં સર્વાનનૃતભાષણે ।
યથાશ્રુતં યથાદૃષ્ટં સર્વમેવાઞ્જસા વદ ॥ ૮.૧૦૧॥

ગોરક્ષકાન્ વાણિજિકાંસ્તથા કારુકુશીલવાન્ । વાણિજકાંસ્તથા
પ્રેષ્યાન્ વાર્ધુષિકાંશ્ચૈવ વિપ્રાન્ શૂદ્રવદાચરેત્ ॥ ૮.૧૦૨॥

તદ્વદન્ ધર્મતોઽર્થેષુ જાનન્નપ્યન્યથા નરઃ ।
ન સ્વર્ગાચ્ચ્યવતે લોકાદ્દૈવીં વાચં વદન્તિ તામ્ ॥ ૮.૧૦૩॥

શૂદ્રવિટ્ક્ષત્રવિપ્રાણાં યત્રર્તોક્તૌ ભવેદ્વધઃ ।
તત્ર વક્તવ્યમનૃતં તદ્ધિ સત્યાદ્વિશિષ્યતે ॥ ૮.૧૦૪॥

વાગ્દૈવત્યૈશ્ચ ચરુભિર્યજેરંસ્તે સરસ્વતીમ્ ।
અનૃતસ્યૈનસસ્તસ્ય કુર્વાણા નિષ્કૃતિં પરામ્ ॥ ૮.૧૦૫॥

કૂષ્માણ્ડૈર્વાઽપિ જુહુયાદ્ઘૃતમગ્નૌ યથાવિધિ ।
ઉદિત્યૃચા વા વારુણ્યા તૃચેનાબ્દૈવતેન વા ॥ ૮.૧૦૬॥

ત્રિપક્ષાદબ્રુવન્ સાક્ષ્યં ઋણાદિષુ નરોऽગદઃ ।
તદૃણં પ્રાપ્નુયાત્સર્વં દશબન્ધં ચ સર્વતઃ ॥ ૮.૧૦૭॥

યસ્ય દૃશ્યેત સપ્તાહાદુક્તવાક્યસ્ય સાક્ષિણઃ ।
રોગોऽગ્નિર્જ્ઞાતિમરણં ઋણં દાપ્યો દમં ચ સઃ ॥ ૮.૧૦૮॥

અસાક્ષિકેષુ ત્વર્થેષુ મિથો વિવદમાનયોઃ ।
અવિન્દંસ્તત્ત્વતઃ સત્યં શપથેનાપિ લમ્ભયેત્ ॥ ૮.૧૦૯॥

મહર્ષિભિશ્ચ દેવૈશ્ચ કાર્યાર્થં શપથાઃ કૃતાઃ ।
વસિષ્ઠશ્ચાપિ શપથં શેપે પૈજવને નૃપે ॥ ૮.૧૧૦॥

ન વૃથા શપથં કુર્યાત્સ્વલ્પેऽપ્યર્થે નરો બુધઃ ।
વૃથા હિ શપથં કુર્વન્ પ્રેત્ય ચેહ ચ નશ્યતિ ॥ ૮.૧૧૧॥

કામિનીષુ વિવાહેષુ ગવાં ભક્ષ્યે તથેન્ધને ।
બ્રાહ્મણાભ્યુપપત્તૌ ચ શપથે નાસ્તિ પાતકમ્ ॥ ૮.૧૧૨॥

સત્યેન શાપયેદ્વિપ્રં ક્ષત્રિયં વાહનાયુધૈઃ ।
ગોબીજકાઞ્ચનૈર્વૈશ્યં શૂદ્રં સર્વૈસ્તુ પાતકૈઃ ॥ ૮.૧૧૩॥

અગ્નિં વાऽહારયેદેનમપ્સુ ચૈનં નિમજ્જયેત્ ।
પુત્રદારસ્ય વાપ્યેનં શિરાંસિ સ્પર્શયેત્પૃથક્ ॥ ૮.૧૧૪॥

યમિદ્ધો ન દહત્યગ્નિરાપો નોન્મજ્જયન્તિ ચ ।
ન ચાર્તિં ઋચ્છતિ ક્ષિપ્રં સ જ્ઞેયઃ શપથે શુચિઃ ॥ ૮.૧૧૫॥

વત્સસ્ય હ્યભિશસ્તસ્ય પુરા ભ્રાત્રા યવીયસા ।
નાગ્નિર્દદાહ રોમાપિ સત્યેન જગતઃ સ્પશઃ ॥ ૮.૧૧૬॥

યસ્મિન્ યસ્મિન્ વિવાદે તુ કૌટસાક્ષ્યં કૃતં ભવેત્ ।
તત્તત્કાર્યં નિવર્તેત કૃતં ચાપ્યકૃતં ભવેત્ ॥ ૮.૧૧૭॥

લોભાન્મોહાદ્ભયાત્મૈત્રાત્કામાત્ક્રોધાત્તથૈવ ચ ।
અજ્ઞાનાદ્બાલભાવાત્ચ સાક્ષ્યં વિતથમુચ્યતે ॥ ૮.૧૧૮॥

એષામન્યતમે સ્થાને યઃ સાક્ષ્યમનૃતં વદેત્ ।
તસ્ય દણ્ડવિશેષાંસ્તુ પ્રવક્ષ્યામ્યનુપૂર્વશઃ ॥ ૮.૧૧૯॥

લોભાત્સહસ્રં દણ્ડ્યસ્તુ મોહાત્પૂર્વં તુ સાહસમ્ ।

ભયાદ્દ્વૌ મધ્યમૌ દણ્ડૌ મૈત્રાત્પૂર્વં ચતુર્ગુણમ્ ॥ ૮.૧૨૦॥

કામાદ્દશગુણં પૂર્વં ક્રોધાત્તુ ત્રિગુણં પરમ્ ।
અજ્ઞાનાદ્દ્વે શતે પૂર્ણે બાલિશ્યાત્શતમેવ તુ ॥ ૮.૧૨૧॥

એતાનાહુઃ કૌટસાક્ષ્યે પ્રોક્તાન્ દણ્ડાન્ મનીષિભિઃ ।
ધર્મસ્યાવ્યભિચારાર્થમધર્મનિયમાય ચ ॥ ૮.૧૨૨॥

કૌટસાક્ષ્યં તુ કુર્વાણાંસ્ત્રીન્ વર્ણાન્ ધાર્મિકો નૃપઃ ।
પ્રવાસયેદ્દણ્ડયિત્વા બ્રાહ્મણં તુ વિવાસયેત્ ॥ ૮.૧૨૩॥

દશ સ્થાનાનિ દણ્ડસ્ય મનુઃ સ્વયમ્ભુવોઽબ્રવીત્ ।
ત્રિષુ વર્ણેષુ યાનિ સ્યુરક્ષતો બ્રાહ્મણો વ્રજેત્ ॥ ૮.૧૨૪॥

ઉપસ્થમુદરં જિહ્વા હસ્તૌ પાદૌ ચ પઞ્ચમમ્ ।
ચક્ષુર્નાસા ચ કર્ણૌ ચ ધનં દેહસ્તથૈવ ચ ॥ ૮.૧૨૫॥

અનુબન્ધં પરિજ્ઞાય દેશકાલૌ ચ તત્ત્વતઃ ।
સારાપરાધો ચાલોક્ય દણ્ડં દણ્ડ્યેષુ પાતયેત્ ॥ ૮.૧૨૬॥

અધર્મદણ્ડનં લોકે યશોઘ્નં કીર્તિનાશનમ્ ।
અસ્વર્ગ્યં ચ પરત્રાપિ તસ્માત્તત્પરિવર્જયેત્ ॥ ૮.૧૨૭॥

અદણ્ડ્યાન્ દણ્ડયન્ રાજા દણ્ડ્યાંશ્ચૈવાપ્યદણ્ડયન્ ।
અયશો મહદાપ્નોતિ નરકં ચૈવ ગચ્છતિ ॥ ૮.૧૨૮॥

વાગ્દણ્ડં પ્રથમં કુર્યાદ્ધિગ્દણ્ડં તદનન્તરમ્ ।
તૃતીયં ધનદણ્ડં તુ વધદણ્ડમતઃ પરમ્ ॥ ૮.૧૨૯॥

વધેનાપિ યદા ત્વેતાન્નિગ્રહીતું ન શક્નુયાત્ ।
તદેષુ સર્વમપ્યેતત્પ્રયુઞ્જીત ચતુષ્ટયમ્ ॥ ૮.૧૩૦॥

લોકસંવ્યવહારાર્થં યાઃ સંજ્ઞાઃ પ્રથિતા ભુવિ ।
તામ્રરૂપ્યસુવર્ણાનાં તાઃ પ્રવક્ષ્યામ્યશેષતઃ ॥ ૮.૧૩૧॥

જાલાન્તરગતે ભાનૌ યત્સૂક્ષ્મં દૃશ્યતે રજઃ ।
પ્રથમં તત્પ્રમાણાનાં ત્રસરેણું પ્રચક્ષતે ॥ ૮.૧૩૨॥

ત્રસરેણવોઽષ્ટૌ વિજ્ઞેયા લિક્ષૈકા પરિમાણતઃ ।
તા રાજસર્ષપસ્તિસ્રસ્તે ત્રયો ગૌરસર્ષપઃ ॥ ૮.૧૩૩॥

સર્ષપાઃ ષટ્ યવો મધ્યસ્ત્રિયવં ત્વેકકૃષ્ણલમ્ ।
પઞ્ચકૃષ્ણલકો માષસ્તે સુવર્ણસ્તુ ષોડશ ॥ ૮.૧૩૪॥

પલં સુવર્ણાશ્ચત્વારઃ પલાનિ ધરણં દશ ।
દ્વે કૃષ્ણલે સમધૃતે વિજ્ઞેયો રૌપ્યમાષકઃ ॥ ૮.૧૩૫॥ રૂપ્યમાષકઃ

તે ષોડશ સ્યાદ્ધરણં પુરાણશ્ચૈવ રાજતઃ ।
કાર્ષાપણસ્તુ વિજ્ઞેયસ્તામ્રિકઃ કાર્ષિકઃ પણઃ ॥ ૮.૧૩૬॥

ધરણાનિ દશ જ્ઞેયઃ શતમાનસ્તુ રાજતઃ ।
ચતુઃસૌવર્ણિકો નિષ્કો વિજ્ઞેયસ્તુ પ્રમાણતઃ ॥ ૮.૧૩૭॥

પણાનાં દ્વે શતે સાર્ધે પ્રથમઃ સાહસઃ સ્મૃતઃ ।
મધ્યમઃ પઞ્ચ વિજ્ઞેયઃ સહસ્રં ત્વેવ ચોત્તમઃ ॥ ૮.૧૩૮॥

ઋણે દેયે પ્રતિજ્ઞાતે પઞ્ચકં શતમર્હતિ ।
અપહ્નવે તદ્દ્વિગુણં તન્ મનોરનુશાસનમ્ ॥ ૮.૧૩૯॥

વસિષ્ઠવિહિતાં વૃદ્ધિં સૃજેદ્વિત્તવિવર્ધિનીમ્ ।
અશીતિભાગં ગૃહ્ણીયાન્ માસાદ્વાર્ધુષિકઃ શતે ॥ ૮.૧૪૦॥

દ્વિકં શતં વા ગૃહ્ણીયાત્સતાં ધર્મમનુસ્મરન્ ।
દ્વિકં શતં હિ ગૃહ્ણાનો ન ભવત્યર્થકિલ્બિષી ॥ ૮.૧૪૧॥

દ્વિકં ત્રિકં ચતુષ્કં ચ પઞ્ચકં ચ શતં સમમ્ ।
માસસ્ય વૃદ્ધિં ગૃહ્ણીયાદ્વર્ણાનામનુપૂર્વશઃ ॥ ૮.૧૪૨॥

ન ત્વેવાધૌ સોપકારે કૌસીદીં વૃદ્ધિમાપ્નુયાત્ ।
ન ચાધેઃ કાલસંરોધાન્નિસર્ગોऽસ્તિ ન વિક્રયઃ ॥ ૮.૧૪૩॥

ન ભોક્તવ્યો બલાદાધિર્ભુઞ્જાનો વૃદ્ધિમુત્સૃજેત્ ।
મૂલ્યેન તોષયેચ્ચૈનમાધિસ્તેનોऽન્યથા ભવેત્ ॥ ૮.૧૪૪॥

આધિશ્ચોપનિધિશ્ચોભૌ ન કાલાત્યયમર્હતઃ ।
અવહાર્યૌ ભવેતાં તૌ દીર્ઘકાલમવસ્થિતૌ ॥ ૮.૧૪૫॥

સમ્પ્રીત્યા ભુજ્યમાનાનિ ન નશ્યન્તિ કદા ચન ।
ધેનુરુષ્ટ્રો વહન્નશ્વો યશ્ચ દમ્યઃ પ્રયુજ્યતે ॥ ૮.૧૪૬॥

યત્કિં ચિદ્દશવર્ષાણિ સંનિધૌ પ્રેક્ષતે ધની ।
ભુજ્યમાનં પરૈસ્તૂષ્ણીં ન સ તત્લબ્ધુમર્હતિ ॥ ૮.૧૪૭॥

અજડશ્ચેદપોગણ્ડો વિષયે ચાસ્ય ભુજ્યતે ।
ભગ્નં તદ્વ્યવહારેણ ભોક્તા તદ્દ્રવ્યમર્હતિ ॥ ૮.૧૪૮॥ તદ્ધનમર્હતિ

આધિઃ સીમા બાલધનં નિક્ષેપોપનિધિઃ સ્ત્રિયઃ । નિક્ષેપૌપનિધી
રાજસ્વં શ્રોત્રિયસ્વં ચ ન ભોગેન પ્રણશ્યતિ ॥ ૮.૧૪૯॥

યઃ સ્વામિનાઽનનુજ્ઞાતમાધિં ભૂઙ્ક્તેઽવિચક્ષણઃ ।
તેનાર્ધવૃદ્ધિર્મોક્તવ્યા તસ્ય ભોગસ્ય નિષ્કૃતિઃ ॥ ૮.૧૫૦॥

કુસીદવૃદ્ધિર્દ્વૈગુણ્યં નાત્યેતિ સકૃદાહૃતા । સકૃદાહિતા)
ધાન્યે સદે લવે વાહ્યે નાતિક્રામતિ પઞ્ચતામ્ ॥ ૮.૧૫૧॥

કૃતાનુસારાદધિકા વ્યતિરિક્તા ન સિધ્યતિ ।
કુસીદપથમાહુસ્તં પઞ્ચકં શતમર્હતિ ॥ ૮.૧૫૨॥

નાતિસાંવત્સરીં વૃદ્ધિં ન ચાદૃષ્ટાં પુનર્હરેત્ । વિનિર્હરેત્)
ચક્રવૃદ્ધિઃ કાલવૃદ્ધિઃ કારિતા કાયિકા ચ યા ॥ ૮.૧૫૩॥

ઋણં દાતુમશક્તો યઃ કર્તુમિચ્છેત્પુનઃ ક્રિયામ્ ।
સ દત્ત્વા નિર્જિતાં વૃદ્ધિં કરણં પરિવર્તયેત્ ॥ ૮.૧૫૪॥

અદર્શયિત્વા તત્રૈવ હિરણ્યં પરિવર્તયેત્ ।
યાવતી સમ્ભવેદ્વૃદ્ધિસ્તાવતીં દાતુમર્હતિ ॥ ૮.૧૫૫॥

ચક્રવૃદ્ધિં સમારૂઢો દેશકાલવ્યવસ્થિતઃ ।
અતિક્રામન્ દેશકાલૌ ન તત્ફલમવાપ્નુયાત્ ॥ ૮.૧૫૬॥

સમુદ્રયાનકુશલા દેશકાલાર્થદર્શિનઃ ।
સ્થાપયન્તિ તુ યાં વૃદ્ધિં સા તત્રાધિગમં પ્રતિ ॥ ૮.૧૫૭॥

યો યસ્ય પ્રતિભૂસ્તિષ્ઠેદ્દર્શનાયેહ માનવઃ ।
અદર્શયન્ સ તં તસ્ય પ્રયચ્છેત્સ્વધનાદૃણમ્ ॥ ૮.૧૫૮॥ તસ્ય યતેત)

પ્રાતિભાવ્યં વૃથાદાનમાક્ષિકં સૌરિકાં ચ યત્ ।
દણ્ડશુલ્કાવશેષં ચ ન પુત્રો દાતુમર્હતિ ॥ ૮.૧૫૯॥

દર્શનપ્રાતિભાવ્યે તુ વિધિઃ સ્યાત્પૂર્વચોદિતઃ ।
દાનપ્રતિભુવિ પ્રેતે દાયાદાનપિ દાપયેત્ ॥ ૮.૧૬૦॥

અદાતરિ પુનર્દાતા વિજ્ઞાતપ્રકૃતાવૃણમ્ ।

પશ્ચાત્પ્રતિભુવિ પ્રેતે પરીપ્સેત્કેન હેતુના ॥ ૮.૧૬૧॥

નિરાદિષ્ટધનશ્ચેત્તુ પ્રતિભૂઃ સ્યાદલંધનઃ ।
સ્વધનાદેવ તદ્દ્યાન્નિરાદિષ્ટ ઇતિ સ્થિતિઃ ॥ ૮.૧૬૨॥

મત્તોન્મત્તાર્તાધ્યધીનૈર્બાલેન સ્થવિરેણ વા ।
અસમ્બદ્ધકૃતશ્ચૈવ વ્યવહારો ન સિધ્યતિ ॥ ૮.૧૬૩॥

સત્યા ન ભાષા ભવતિ યદ્યપિ સ્યાત્પ્રતિષ્ઠિતા ।
બહિશ્ચેદ્ભાષ્યતે ધર્માન્નિયતાદ્વ્યવહારિકાત્ ॥ ૮.૧૬૪॥

યોગાધમનવિક્રીતં યોગદાનપ્રતિગ્રહમ્ ।
યત્ર વાઽપ્યુપધિં પશ્યેત્તત્સર્વં વિનિવર્તયેત્ ॥ ૮.૧૬૫॥

ગ્રહીતા યદિ નષ્ટઃ સ્યાત્કુટુમ્બાર્થે કૃતો વ્યયઃ । કુટુમ્બે ચ
દાતવ્યં બાન્ધવૈસ્તત્સ્યાત્પ્રવિભક્તૈરપિ સ્વતઃ ॥ ૮.૧૬૬॥

કુટુમ્બાર્થેઽધ્યધીનોઽપિ વ્યવહારં યમાચરેત્ ।
સ્વદેશે વા વિદેશે વા તં જ્યાયાન્ન વિચાલયેત્ ॥ ૮.૧૬૭॥

બલાદ્દત્તં બલાદ્ભુક્તં બલાદ્યચ્ચાપિ લેખિતમ્ ।
સર્વાન્ બલકૃતાનર્થાનકૃતાન્ મનુરબ્રવીત્ ॥ ૮.૧૬૮॥

ત્રયઃ પરાર્થે ક્લિશ્યન્તિ સાક્ષિણઃ પ્રતિભૂઃ કુલમ્ ।
ચત્વારસ્તૂપચીયન્તે વિપ્ર આઢ્યો વણિઙ્નૃપઃ ॥ ૮.૧૬૯॥

અનાદેયં નાદદીત પરિક્ષીણોઽપિ પાર્થિવઃ ।
ન ચાદેયં સમૃદ્ધોઽપિ સૂક્ષ્મમપ્યર્થમુત્સૃજેત્ ॥ ૮.૧૭૦॥

અનાદેયસ્ય ચાદાનાદાદેયસ્ય ચ વર્જનાત્ ।
દૌર્બલ્યં ખ્યાપ્યતે રાજ્ઞઃ સ પ્રેત્યૈહ ચ નશ્યતિ ॥ ૮.૧૭૧॥

સ્વાદાનાદ્વર્ણસંસર્ગાત્ત્વબલાનાં ચ રક્ષણાત્ ।
બલં સઞ્જાયતે રાજ્ઞઃ સ પ્રેત્યૈહ ચ વર્ધતે ॥ ૮.૧૭૨॥

તસ્માદ્યમ ઇવ સ્વામી સ્વયં હિત્વા પ્રિયાપ્રિયે ।
વર્તેત યામ્યયા વૃત્ત્યા જિતક્રોધો જિતેન્દ્રિયઃ ॥ ૮.૧૭૩॥

યસ્ત્વધર્મેણ કાર્યાણિ મોહાત્કુર્યાન્નરાધિપઃ ।
અચિરાત્તં દુરાત્માનં વશે કુર્વન્તિ શત્રવઃ ॥ ૮.૧૭૪॥

કામક્રોધૌ તુ સંયમ્ય યોઽર્થાન્ ધર્મેણ પશ્યતિ ।
પ્રજાસ્તમનુવર્તન્તે સમુદ્રમિવ સિન્ધવઃ ॥ ૮.૧૭૫॥

યઃ સાધયન્તં છન્દેન વેદયેદ્ધનિકં નૃપે ।
સ રાજ્ઞા તત્ચતુર્ભાગં દાપ્યસ્તસ્ય ચ તદ્ધનમ્ ॥ ૮.૧૭૬॥

કર્મણાઽપિ સમં કુર્યાદ્ધનિકાયાધમર્ણિકઃ ।
સમોઽવકૃષ્ટજાતિસ્તુ દદ્યાત્શ્રેયાંસ્તુ તત્શનૈઃ ॥ ૮.૧૭૭॥

અનેન વિધિના રાજા મિથો વિવદતાં નૃણામ્ ।
સાક્ષિપ્રત્યયસિદ્ધાનિ કાર્યાણિ સમતાં નયેત્ ॥ ૮.૧૭૮॥

કુલજે વૃત્તસમ્પન્ને ધર્મજ્ઞે સત્યવાદિનિ ।
મહાપક્ષે ધનિન્યાર્યે નિક્ષેપં નિક્ષિપેદ્બુધઃ ॥ ૮.૧૭૯॥

યો યથા નિક્ષિપેદ્ધસ્તે યમર્થં યસ્ય માનવઃ ।
સ તથૈવ ગ્રહીતવ્યો યથા દાયસ્તથા ગ્રહઃ ॥ ૮.૧૮૦॥

યો નિક્ષેપં યાચ્યમાનો નિક્ષેપ્તુર્ન પ્રયચ્છતિ ।
સ યાચ્યઃ પ્રાડ્વિવાકેન તન્નિક્ષેપ્તુરસંનિધૌ ॥ ૮.૧૮૧॥

સાક્ષ્યભાવે પ્રણિધિભિર્વયોરૂપસમન્વિતૈઃ ।
અપદેશૈશ્ચ સંન્યસ્ય હિરણ્યં તસ્ય તત્ત્વતઃ ॥ ૮.૧૮૨॥

સ યદિ પ્રતિપદ્યેત યથાન્યસ્તં યથાકૃતમ્ ।
ન તત્ર વિદ્યતે કિં ચિદ્યત્પરૈરભિયુજ્યતે ॥ ૮.૧૮૩॥

તેષાં ન દદ્યાદ્યદિ તુ તદ્ધિરણ્યં યથાવિધિ ।
ઉભૌ નિગૃહ્ય દાપ્યઃ સ્યાદિતિ ધર્મસ્ય ધારણા ॥ ૮.૧૮૪॥ સ નિગૃહ્યૌભયં દાપ્ય ઇતિ ધર્મસ્ય ધારણા

નિક્ષેપોપનિધી નિત્યં ન દેયૌ પ્રત્યનન્તરે ।
નશ્યતો વિનિપાતે તાવનિપાતે ત્વનાશિનૌ ॥ ૮.૧૮૫॥

સ્વયમેવ તુ યૌ દદ્યાન્ મૃતસ્ય પ્રત્યનન્તરે ।
ન સ રાજ્ઞાઽભિયોક્તવ્યો ન નિક્ષેપ્તુશ્ચ બન્ધુભિઃ ॥ ૮.૧૮૬॥

અચ્છલેનૈવ ચાન્વિચ્છેત્તમર્થં પ્રીતિપૂર્વકમ્ ।
વિચાર્ય તસ્ય વા વૃત્તં સામ્નૈવ પરિસાધયેત્ ॥ ૮.૧૮૭॥

નિક્ષેપેષ્વેષુ સર્વેષુ વિધિઃ સ્યાત્પરિસાધને ।
સમુદ્રે નાપ્નુયાત્કિં ચિદ્યદિ તસ્માન્ન સંહરેત્ ॥ ૮.૧૮૮॥

ચૌરૈર્હૃતં જલેનોઢમગ્નિના દગ્ધમેવ વા ।
ન દદ્યાદ્યદિ તસ્માત્સ ન સંહરતિ કિં ચન ॥ ૮.૧૮૯॥

નિક્ષેપસ્યાપહર્તારમનિક્ષેપ્તારમેવ ચ ।
સર્વૈરુપાયૈરન્વિચ્છેત્શપથૈશ્ચૈવ વૈદિકૈઃ ॥ ૮.૧૯૦॥

યો નિક્ષેપં નાર્પયતિ યશ્ચાનિક્ષિપ્ય યાચતે ।
તાવુભૌ ચૌરવત્શાસ્યૌ દાપ્યૌ વા તત્સમં દમમ્ ॥ ૮.૧૯૧॥

નિક્ષેપસ્યાપહર્તારં તત્સમં દાપયેદ્દમમ્ ।
તથોપનિધિહર્તારમવિશેષેણ પાર્થિવઃ ॥ ૮.૧૯૨॥

ઉપધાભિશ્ચ યઃ કશ્ચિત્પરદ્રવ્યં હરેન્નરઃ ।
સસહાયઃ સ હન્તવ્યઃ પ્રકાશં વિવિધૈર્વધૈઃ ॥ ૮.૧૯૩॥

નિક્ષેપો યઃ કૃતો યેન યાવાંશ્ચ કુલસંનિધૌ ।
તાવાનેવ સ વિજ્ઞેયો વિબ્રુવન્ દણ્ડમર્હતિ ॥ ૮.૧૯૪॥

મિથો દાયઃ કૃતો યેન ગૃહીતો મિથ એવ વા ।
મિથ એવ પ્રદાતવ્યો યથા દાયસ્તથા ગ્રહઃ ॥ ૮.૧૯૫॥

નિક્ષિપ્તસ્ય ધનસ્યૈવં પ્રીત્યોપનિહિતસ્ય ચ ।
રાજા વિનિર્ણયં કુર્યાદક્ષિણ્વન્ન્યાસધારિણમ્ ॥ ૮.૧૯૬॥

વિક્રીણીતે પરસ્ય સ્વં યોઽસ્વામી સ્વામ્યસંમતઃ ।
ન તં નયેત સાક્ષ્યં તુ સ્તેનમસ્તેનમાનિનમ્ ॥ ૮.૧૯૭॥

અવહાર્યો ભવેત્ચૈવ સાન્વયઃ ષટ્શતં દમમ્ ।
નિરન્વયોઽનપસરઃ પ્રાપ્તઃ સ્યાચ્ચૌરકિલ્બિષમ્ ॥ ૮.૧૯૮॥

અસ્વામિના કૃતો યસ્તુ દાયો વિક્રય એવ વા ।
અકૃતઃ સ તુ વિજ્ઞેયો વ્યવહારે યથા સ્થિતિઃ ॥ ૮.૧૯૯॥

સમ્ભોગો દૃશ્યતે યત્ર ન દૃશ્યેતાગમઃ ક્વ ચિત્ ।
આગમઃ કારણં તત્ર ન સમ્ભોગ ઇતિ સ્થિતિઃ ॥ ૮.૨૦૦॥

વિક્રયાદ્યો ધનં કિં ચિદ્ગૃહ્ણીયાત્કુલસંનિધૌ ।
ક્રયેણ સ વિશુદ્ધં હિ ન્યાયતો લભતે ધનમ્ ॥ ૮.૨૦૧॥

અથ મૂલમનાહાર્યં પ્રકાશક્રયશોધિતઃ ।

અદણ્ડ્યો મુચ્યતે રાજ્ઞા નાષ્ટિકો લભતે ધનમ્ ॥ ૮.૨૦૨॥

નાન્યદન્યેન સંસૃષ્ટરૂપં વિક્રયમર્હતિ ।
ન ચાસારં ન ચ ન્યૂનં ન દૂરેણ તિરોહિતમ્ ॥ ૮.૨૦૩॥ ન સાવદ્યં ન ચ ન્યૂનં ન દૂરે ન તિરોહિતં

અન્યાં ચેદ્દર્શયિત્વાઽન્યા વોઢુઃ કન્યા પ્રદીયતે ।
ઉભે ત એકશુલ્કેન વહેદિત્યબ્રવીન્ મનુઃ ॥ ૮.૨૦૪॥

નોન્મત્તાયા ન કુષ્ઠિન્યા ન ચ યા સ્પૃષ્ટમૈથુના ।
પૂર્વં દોષાનભિખ્યાપ્ય પ્રદાતા દણ્ડમર્હતિ ॥ ૮.૨૦૫॥

ઋત્વિગ્યદિ વૃતો યજ્ઞે સ્વકર્મ પરિહાપયેત્ ।
તસ્ય કર્માનુરૂપેણ દેયોંશઃ સહકર્તૃભિઃ ॥ ૮.૨૦૬॥

દક્ષિણાસુ ચ દત્તાસુ સ્વકર્મ પરિહાપયન્ ।
કૃત્સ્નમેવ લભેતાંશમન્યેનૈવ ચ કારયેત્ ॥ ૮.૨૦૭॥

યસ્મિન્ કર્મણિ યાસ્તુ સ્યુરુક્તાઃ પ્રત્યઙ્ગદક્ષિણાઃ ।
સ એવ તા આદદીત ભજેરન્ સર્વ એવ વા ॥ ૮.૨૦૮॥

રથં હરેત્ચાધ્વર્યુર્બ્રહ્માઽધાને ચ વાજિનમ્ ।
હોતા વાઽપિ હરેદશ્વમુદ્ગાતા ચાપ્યનઃ ક્રયે ॥ ૮.૨૦૯॥

સર્વેષામર્ધિનો મુખ્યાસ્તદર્ધેનાર્ધિનોઽપરે ।
તૃતીયિનસ્તૃતીયાંશાશ્ચતુર્થાંશાશ્ચ પાદિનઃ ॥ ૮.૨૧૦॥

સમ્ભૂય સ્વાનિ કર્માણિ કુર્વદ્ભિરિહ માનવૈઃ ।
અનેન વિધિયોગેન કર્તવ્યાંશપ્રકલ્પના ॥ ૮.૨૧૧॥

ધર્માર્થં યેન દત્તં સ્યાત્કસ્મૈ ચિદ્યાચતે ધનમ્ ।
પશ્ચાચ્ચ ન તથા તત્સ્યાન્ન દેયં તસ્ય તદ્ભવેત્ ॥ ૮.૨૧૨॥

યદિ સંસાધયેત્તત્તુ દર્પાત્લોભેન વા પુનઃ ।
રાજ્ઞા દાપ્યઃ સુવર્ણં સ્યાત્તસ્ય સ્તેયસ્ય નિષ્કૃતિઃ ॥ ૮.૨૧૩॥

દત્તસ્યૈષોદિતા ધર્મ્યા યથાવદનપક્રિયા ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ વેતનસ્યાનપક્રિયામ્ ॥ ૮.૨૧૪॥

ભૃતો નાર્તો ન કુર્યાદ્યો દર્પાત્કર્મ યથોદિતમ્ । અનાર્તો
સ દણ્ડ્યઃ કૃષ્ણલાન્યષ્ટૌ ન દેયં ચાસ્ય વેતનમ્ ॥ ૮.૨૧૫॥

આર્તસ્તુ કુર્યાત્સ્વસ્થઃ સન્ યથાભાષિતમાદિતઃ ।
સ દીર્ઘસ્યાપિ કાલસ્ય તત્લભેતૈવ વેતનમ્ ॥ ૮.૨૧૬॥

યથોક્તમાર્તઃ સુસ્થો વા યસ્તત્કર્મ ન કારયેત્ ।
ન તસ્ય વેતનં દેયમલ્પોનસ્યાપિ કર્મણઃ ॥ ૮.૨૧૭॥

એષ ધર્મોऽખિલેનોક્તો વેતનાદાનકર્મણઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ ધર્મં સમયભેદિનામ્ ॥ ૮.૨૧૮॥

યો ગ્રામદેશસઙ્ઘાનાં કૃત્વા સત્યેન સંવિદમ્ ।
વિસંવદેન્નરો લોભાત્તં રાષ્ટ્રાદ્વિપ્રવાસયેત્ ॥ ૮.૨૧૯॥

નિગૃહ્ય દાપયેચ્ચૈનં સમયવ્યભિચારિણમ્ ।
ચતુઃસુવર્ણાન્ ષણ્નિષ્કાંશ્શતમાનં ચ રાજકમ્ ॥ ૮.૨૨૦॥

એતદ્દણ્ડવિધિં કુર્યાદ્ધાર્મિકઃ પૃથિવીપતિઃ ।
ગ્રામજાતિસમૂહેષુ સમયવ્યભિચારિણામ્ ॥ ૮.૨૨૧॥

ક્રીત્વા વિક્રીય વા કિં ચિદ્યસ્યૈહાનુશયો ભવેત્ ।
સોऽન્તર્દશાહાત્તદ્દ્રવ્યં દદ્યાચ્ચૈવાદદીત વા ॥ ૮.૨૨૨॥

પરેણ તુ દશાહસ્ય ન દદ્યાન્નાપિ દાપયેત્ ।
આદદાનો દદત્ચૈવ રાજ્ઞા દણ્ડ્યૌ શતાનિ ષટ્ ॥ ૮.૨૨૩॥

યસ્તુ દોષવતીં કન્યામનાખ્યાય પ્રયચ્છતિ ।
તસ્ય કુર્યાન્નૃપો દણ્ડં સ્વયં ષણ્ણવતિં પણાન્ ॥ ૮.૨૨૪॥

અકન્યેતિ તુ યઃ કન્યાં બ્રૂયાદ્દ્વેષેણ માનવઃ ।
સ શતં પ્રાપ્નુયાદ્દણ્ડં તસ્યા દોષમદર્શયન્ ॥ ૮.૨૨૫॥

પાણિગ્રહણિકા મન્ત્રાઃ કન્યાસ્વેવ પ્રતિષ્ઠિતાઃ ।
નાકન્યાસુ ક્વ ચિન્નૄણાં લુપ્તધર્મક્રિયા હિ તાઃ ॥ ૮.૨૨૬॥

પાણિગ્રહણિકા મન્ત્રા નિયતં દારલક્ષણમ્ ।
તેષાં નિષ્ઠા તુ વિજ્ઞેયા વિદ્વદ્ભિઃ સપ્તમે પદે ॥ ૮.૨૨૭॥

યસ્મિન્ યસ્મિન્ કૃતે કાર્યે યસ્યેહાનુશયો ભવેત્ ।
તમનેન વિધાનેન ધર્મ્યે પથિ નિવેશયેત્ ॥ ૮.૨૨૮॥

પશુષુ સ્વામિનાં ચૈવ પાલાનાં ચ વ્યતિક્રમે ।
વિવાદં સમ્પ્રવક્ષ્યામિ યથાવદ્ધર્મતત્ત્વતઃ ॥ ૮.૨૨૯॥

દિવા વક્તવ્યતા પાલે રાત્રૌ સ્વામિનિ તદ્ગૃહે ।
યોગક્ષેમેઽન્યથા ચેત્તુ પાલો વક્તવ્યતામિયાત્ ॥ ૮.૨૩૦॥

ગોપઃ ક્ષીરભૃતો યસ્તુ સ દુહ્યાદ્દશતો વરામ્ ।
ગોસ્વામ્યનુમતે ભૃત્યઃ સા સ્યાત્પાલેઽભૃતે ભૃતિઃ ॥ ૮.૨૩૧॥

નષ્ટં વિનષ્ટં કૃમિભિઃ શ્વહતં વિષમે મૃતમ્ ।
હીનં પુરુષકારેણ પ્રદદ્યાત્પાલ એવ તુ ॥ ૮.૨૩૨॥

વિઘુષ્ય તુ હૃતં ચૌરૈર્ન પાલો દાતુમર્હતિ ।
યદિ દેશે ચ કાલે ચ સ્વામિનઃ સ્વસ્ય શંસતિ ॥ ૮.૨૩૩॥

કર્ણૌ ચર્મ ચ વાલાંશ્ચ બસ્તિં સ્નાયું ચ રોચનામ્ ।
પશુષુ સ્વામિનાં દદ્યાન્ મૃતેષ્વઙ્ગાનિ દર્શયેત્ ॥ ૮.૨૩૪॥ અઙ્ગાંશ્ચ દર્શયેત્)

અજાવિકે તુ સંરુદ્ધે વૃકૈઃ પાલે ત્વનાયતિ ।
યાં પ્રસહ્ય વૃકો હન્યાત્પાલે તત્કિલ્બિષં ભવેત્ ॥ ૮.૨૩૫॥

તાસાં ચેદવરુદ્ધાનાં ચરન્તીનાં મિથો વને ।
યામુત્પ્લુત્ય વૃકો હન્યાન્ન પાલસ્તત્ર કિલ્બિષી ॥ ૮.૨૩૬॥

ધનુઃશતં પરીહારો ગ્રામસ્ય સ્યાત્સમન્તતઃ ।
શમ્યાપાતાસ્ત્રયો વાઽપિ ત્રિગુણો નગરસ્ય તુ ॥ ૮.૨૩૭॥

તત્રાપરિવૃતં ધાન્યં વિહિંસ્યુઃ પશવો યદિ ।
ન તત્ર પ્રણયેદ્દણ્ડં નૃપતિઃ પશુરક્ષિણામ્ ॥ ૮.૨૩૮॥

વૃતિં તત્ર પ્રકુર્વીત યામુષ્ટ્રો ન વિલોકયેત્ ।
છિદ્રં ચ વારયેત્સર્વં શ્વસૂકરમુખાનુગમ્ ॥ ૮.૨૩૯॥

પથિ ક્ષેત્રે પરિવૃતે ગ્રામાન્તીયેઽથ વા પુનઃ ।
સપાલઃ શતદણ્ડાર્હો વિપાલાન્ વારયેત્પશૂન્ ॥ ૮.૨૪૦॥

ક્ષેત્રેષ્વન્યેષુ તુ પશુઃ સપાદં પણમર્હતિ ।
સર્વત્ર તુ સદો દેયઃ ક્ષેત્રિકસ્યૈતિ ધારણા ॥ ૮.૨૪૧॥

અનિર્દશાહાં ગાં સૂતાં વૃષાન્ દેવપશૂંસ્તથા ।
સપાલાન્ વા વિપાલાન્ વા ન દણ્ડ્યાન્ મનુરબ્રવીત્ ॥ ૮.૨૪૨॥

ક્ષેત્રિયસ્યાત્યયે દણ્ડો ભાગાદ્દશગુણો ભવેત્ । ક્ષેત્રિકસ્યાત્યયે

તતોઽર્ધદણ્ડો ભૃત્યાનામજ્ઞાનાત્ક્ષેત્રિકસ્ય તુ ॥ ૮.૨૪૩॥

એતદ્વિધાનમાતિષ્ઠેદ્ધાર્મિકઃ પૃથિવીપતિઃ ।
સ્વામિનાં ચ પશૂનાં ચ પાલાનાં ચ વ્યતિક્રમે ॥ ૮.૨૪૪॥

સીમાં પ્રતિ સમુત્પન્ને વિવાદે ગ્રામયોર્દ્વયોઃ ।
જ્યેષ્ઠે માસિ નયેત્સીમાં સુપ્રકાશેષુ સેતુષુ ॥ ૮.૨૪૫॥

સીમાવૃક્ષાંશ્ચ કુર્વીત ન્યગ્રોધાશ્વત્થકિંશુકાન્ ।
શાલ્મલીન્ સાલતાલાંશ્ચ ક્ષીરિણશ્ચૈવ પાદપાન્ ॥ ૮.૨૪૬॥

ગુલ્માન્ વેણૂંશ્ચ વિવિધાન્ શમીવલ્લીસ્થલાનિ ચ ।
શરાન્ કુબ્જકગુલ્માંશ્ચ તથા સીમા ન નશ્યતિ ॥ ૮.૨૪૭॥

તડાગાન્યુદપાનાનિ વાપ્યઃ પ્રસ્રવણાનિ ચ ।
સીમાસંધિષુ કાર્યાણિ દેવતાયતનાનિ ચ ॥ ૮.૨૪૮॥

ઉપછન્નાનિ ચાન્યાનિ સીમાલિઙ્ગાનિ કારયેત્ ।
સીમાજ્ઞાને નૃણાં વીક્ષ્ય નિત્યં લોકે વિપર્યયમ્ ॥ ૮.૨૪૯॥

અશ્મનોઽસ્થીનિ ગોવાલાંસ્તુષાન્ ભસ્મ કપાલિકાઃ ।
કરીષમિષ્ટકાઙ્ગારાંશ્છર્કરા વાલુકાસ્તથા ॥ ૮.૨૫૦॥

યાનિ ચૈવમ્પ્રકારાણિ કાલાદ્ભૂમિર્ન ભક્ષયેત્ ।
તાનિ સંધિષુ સીમાયામપ્રકાશાનિ કારયેત્ ॥ ૮.૨૫૧॥ સીમાયા

એતૈર્લિઙ્ગૈર્નયેત્સીમાં રાજા વિવદમાનયોઃ ।
પૂર્વભુક્ત્યા ચ સતતમુદકસ્યાગમેન ચ ॥ ૮.૨૫૨॥

યદિ સ્ંશય એવ સ્યાત્લિઙ્ગાનામપિ દર્શને ।
સાક્ષિપ્રત્યય એવ સ્યાત્સીમાવાદવિનિર્ણયઃ ॥ ૮.૨૫૩॥ સીમાવાદવિનિશ્ચયઃ

ગ્રામીયકકુલાનાં ચ સમક્ષં સીમ્નિ સાક્ષિણઃ । ગ્રામેયક
પ્રષ્ટવ્યાઃ સીમલિઙ્ગાનિ તયોશ્ચૈવ વિવાદિનોઃ ॥ ૮.૨૫૪॥ સીમાલિઙ્ગાનિ

તે પૃષ્ટાસ્તુ યથા બ્રૂયુઃ સમસ્તાઃ સીમ્નિ નિશ્ચયમ્ ।
નિબધ્નીયાત્તથા સીમાં સર્વાંસ્તાંશ્ચૈવ નામતઃ ॥ ૮.૨૫૫॥

શિરોભિસ્તે ગૃહીત્વોર્વીં સ્રગ્વિણો રક્તવાસસઃ ।
સુકૃતૈઃ શાપિતાઃ સ્વૈઃ સ્વૈર્નયેયુસ્તે સમઞ્જસમ્ ॥ ૮.૨૫૬॥

યથોક્તેન નયન્તસ્તે પૂયન્તે સત્યસાક્ષિણઃ ।
વિપરીતં નયન્તસ્તુ દાપ્યાઃ સ્યુર્દ્વિશતં દમમ્ ॥ ૮.૨૫૭॥

સાક્ષ્યભાવે તુ ચત્વારો ગ્રામાઃ સામન્તવાસિનઃ । ગ્રામસીમાન્તવાસિનઃ
સીમાવિનિર્ણયં કુર્યુઃ પ્રયતા રાજસંનિધૌ ॥ ૮.૨૫૮॥

સામન્તાનામભાવે તુ મૌલાનાં સીમ્નિ સાક્ષિણામ્ ।
ઇમાનપ્યનુયુઞ્જીત પુરુષાન્ વનગોચરાન્ ॥ ૮.૨૫૯॥

વ્યાધાંશાકુનિકાન્ ગોપાન્ કૈવર્તાન્ મૂલખાનકાન્ ।
વ્યાલગ્રાહાનુઞ્છવૃત્તીનન્યાંશ્ચ વનચારિણઃ ॥ ૮.૨૬૦॥

તે પૃષ્ટાસ્તુ યથા બ્રૂયુઃ સીમાસંધિષુ લક્ષણમ્ ।
તત્તથા સ્થાપયેદ્રાજા ધર્મેણ ગ્રામયોર્દ્વયોઃ ॥ ૮.૨૬૧॥

ક્ષેત્રકૂપતડાગાનામારામસ્ય ગૃહસ્ય ચ ।
સામન્તપ્રત્યયો જ્ઞેયઃ સીમાસેતુવિનિર્ણયઃ ॥ ૮.૨૬૨॥

સામન્તાશ્ચેત્મૃષા બ્રૂયુઃ સેતૌ વિવાદતાં નૃણામ્ ।
સર્વે પૃથક્પૃથગ્દણ્ડ્યા રાજ્ઞા મધ્યમસાહસમ્ ॥ ૮.૨૬૩॥

ગૃહં તડાગમારામં ક્ષેત્રં વા ભીષયા હરન્ ।
શતાનિ પઞ્ચ દણ્ડ્યઃ સ્યાદજ્ઞાનાદ્દ્વિશતો દમઃ ॥ ૮.૨૬૪॥

સીમાયામવિષહ્યાયાં સ્વયં રાજૈવ ધર્મવિત્ ।
પ્રદિશેદ્ભૂમિમેકેષામુપકારાદિતિ સ્થિતિઃ ॥ ૮.૨૬૫॥

એષોઽખિલેનાભિહિતો ધર્મઃ સીમાવિનિર્ણયે ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ વાક્પારુષ્યવિનિર્ણયમ્ ॥ ૮.૨૬૬॥

શતં બ્રાહ્મણમાક્રુશ્ય ક્ષત્રિયો દણ્ડમર્હતિ ।
વૈશ્યોઽપ્યર્ધશતં દ્વે વા શૂદ્રસ્તુ વધમર્હતિ ॥ ૮.૨૬૭॥

પઞ્ચાશદ્બ્રાહ્મણો દણ્ડ્યઃ ક્ષત્રિયસ્યાભિશંસને ।
વૈશ્યે સ્યાદર્ધપઞ્ચાશત્શૂદ્રે દ્વાદશકો દમઃ ॥ ૮.૨૬૮॥

સમવર્ણે દ્વિજાતીનાં દ્વાદશૈવ વ્યતિક્રમે ।
વાદેષ્વવચનીયેષુ તદેવ દ્વિગુણં ભવેત્ ॥ ૮.૨૬૯॥

એકજાતિર્દ્વિજાતીંસ્તુ વાચા દારુણયા ક્ષિપન્ ।
જિહ્વાયાઃ પ્રાપ્નુયાચ્છેદં જઘન્યપ્રભવો હિ સઃ ॥ ૮.૨૭૦॥

નામજાતિગ્રહં ત્વેષામભિદ્રોહેણ કુર્વતઃ ।
નિક્ષેપ્યોઽયોમયઃ શઙ્કુર્જ્વલન્નાસ્યે દશાઙ્ગુલઃ ॥ ૮.૨૭૧॥

ધર્મોપદેશં દર્પેણ વિપ્રાણામસ્ય કુર્વતઃ ।
તપ્તમાસેચયેત્તૈલં વક્ત્રે શ્રોત્રે ચ પાર્થિવઃ ॥ ૮.૨૭૨॥ શ્રૌત્રે

શ્રુતં દેશં ચ જાતિં ચ કર્મ શરીરમેવ ચ ।
વિતથેન બ્રુવન્ દર્પાદ્દાપ્યઃ સ્યાદ્દ્વિશતં દમમ્ ॥ ૮.૨૭૩॥

કાણં વાઽપ્યથ વા ખઞ્જમન્યં વાઽપિ તથાવિધમ્ ।
તથ્યેનાપિ બ્રુવન્ દાપ્યો દણ્ડં કાર્ષાપણાવરમ્ ॥ ૮.૨૭૪॥

માતરં પિતરં જાયાં ભ્રાતરં તનયં ગુરુમ્ ।
આક્ષારયંશતં દાપ્યઃ પન્થાનં ચાદદદ્ગુરોઃ ॥ ૮.૨૭૫॥

બ્રાહ્મણક્ષત્રિયાભ્યાં તુ દણ્ડઃ કાર્યો વિજાનતા ।
બ્રાહ્મણે સાહસઃ પૂર્વઃ ક્ષત્રિયે ત્વેવ મધ્યમઃ ॥ ૮.૨૭૬॥

વિટ્ શૂદ્રયોરેવમેવ સ્વજાતિં પ્રતિ તત્ત્વતઃ ।
છેદવર્જં પ્રણયનં દણ્ડસ્યેતિ વિનિશ્ચયઃ ॥ ૮.૨૭૭॥

એષ દણ્ડવિધિઃ પ્રોક્તો વાક્પારુષ્યસ્ય તત્ત્વતઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ દણ્ડપારુષ્યનિર્ણયમ્ ॥ ૮.૨૭૮॥

યેન કેન ચિદઙ્ગેન હિંસ્યાચ્ચેત્શ્રેષ્ઠમન્ત્યજઃ ।
છેત્તવ્યં તદ્તદેવાસ્ય તન્ મનોરનુશાસનમ્ ॥ ૮.૨૭૯॥

પાણિમુદ્યમ્ય દણ્ડં વા પાણિચ્છેદનમર્હતિ ।
પાદેન પ્રહરન્ કોપાત્પાદચ્છેદનમર્હતિ ॥ ૮.૨૮૦॥

સહાસનમભિપ્રેપ્સુરુત્કૃષ્ટસ્યાપકૃષ્ટજઃ ।
કટ્યાં કૃતાઙ્કો નિર્વાસ્યઃ સ્ફિચં વાઽસ્યાવકર્તયેત્ ॥ ૮.૨૮૧॥

અવનિષ્ઠીવતો દર્પાદ્દ્વાવોષ્ઠૌ છેદયેન્નૃપઃ ।
અવમૂત્રયતો મેઢ્રમવશર્ધયતો ગુદમ્ ॥ ૮.૨૮૨॥

કેશેષુ ગૃહ્ણતો હસ્તૌ છેદયેદવિચારયન્ ।
પાદયોર્દાઢિકાયાં ચ ગ્રીવાયાં વૃષણેષુ ચ ॥ ૮.૨૮૩॥

ત્વગ્ભેદકઃ શતં દણ્ડ્યો લોહિતસ્ય ચ દર્શકઃ ।

માંસભેત્તા તુ ષણ્નિષ્કાન્ પ્રવાસ્યસ્ત્વસ્થિભેદકઃ ॥ ૮.૨૮૪॥

વનસ્પતીનાં સર્વેષામુપભોગો યથા યથા ।
યથા તથા દમઃ કાર્યો હિંસાયામિતિ ધારણા ॥ ૮.૨૮૫॥

મનુષ્યાણાં પશૂનાં ચ દુઃખાય પ્રહૃતે સતિ ।
યથા યથા મહદ્દુઃખં દણ્ડં કુર્યાત્તથા તથા ॥ ૮.૨૮૬॥

અઙ્ગાવપીડનાયાં ચ વ્રણશોણિતયોસ્તથા । પ્રાણશોનિતયોઃ
સમુત્થાનવ્યયં દાપ્યઃ સર્વદણ્ડમથાપિ વા ॥ ૮.૨૮૭॥

દ્રવ્યાણિ હિંસ્યાદ્યો યસ્ય જ્ઞાનતોઽજ્ઞાનતોઽપિ વા ।
સ તસ્યોત્પાદયેત્તુષ્ટિં રાજ્ઞે દદ્યાચ્ચ તત્સમમ્ ॥ ૮.૨૮૮॥

ચર્મચાર્મિકભાણ્ડેષુ કાષ્ઠલોષ્ટમયેષુ ।
મૂલ્યાત્પઞ્ચગુણો દણ્ડઃ પુષ્પમૂલફલેષુ ચ ॥ ૮.૨૮૯॥

યાનસ્ય ચૈવ યાતુશ્ચ યાનસ્વામિન એવ ચ ।
દશાતિવર્તનાન્યાહુઃ શેષે દણ્ડો વિધીયતે ॥ ૮.૨૯૦॥

છિન્નનાસ્યે ભગ્નયુગે તિર્યક્પ્રતિમુખાગતે ।
અક્ષભઙ્ગે ચ યાનસ્ય ચક્રભઙ્ગે તથૈવ ચ ॥ ૮.૨૯૧॥

છેદને ચૈવ યન્ત્રાણાં યોક્ત્રરશ્મ્યોસ્તથૈવ ચ ।
આક્રન્દે ચાપ્યપૈહીતિ ન દણ્ડં મનુરબ્રવીત્ ॥ ૮.૨૯૨॥

યત્રાપવર્તતે યુગ્યં વૈગુણ્યાત્પ્રાજકસ્ય તુ ।
તત્ર સ્વામી ભવેદ્દણ્ડ્યો હિંસાયાં દ્વિશતં દમમ્ ॥ ૮.૨૯૩॥

પ્રાજકશ્ચેદ્ભવેદાપ્તઃ પ્રાજકો દણ્ડમર્હતિ ।
યુગ્યસ્થાઃ પ્રાજકેઽનાપ્તે સર્વે દણ્ડ્યાઃ શતં શતમ્ ॥ ૮.૨૯૪॥

સ ચેત્તુ પથિ સંરુદ્ધઃ પશુભિર્વા રથેન વા ।
પ્રમાપયેત્પ્રાણભૃતસ્તત્ર દણ્ડોઽવિચારિતઃ ॥ ૮.૨૯૫॥

મનુષ્યમારણે ક્ષિપ્રં ચૌરવત્કિલ્બિષં ભવેત્ ।
પ્રાણભૃત્સુ મહત્સ્વર્ધં ગોગજોષ્ટ્રહયાદિષુ ॥ ૮.૨૯૬॥

ક્ષુદ્રકાણાં પશૂનાં તુ હિંસાયાં દ્વિશતો દમઃ ।
પઞ્ચાશત્તુ ભવેદ્દણ્ડઃ શુભેષુ મૃગપક્ષિષુ ॥ ૮.૨૯૭॥

ગર્ધભાજાવિકાનાં તુ દણ્ડઃ સ્યાત્પઞ્ચમાષિકઃ । પાઞ્ચમાષિકઃ
માષિકસ્તુ ભવેદ્દણ્ડઃ શ્વસૂકરનિપાતને ॥ ૮.૨૯૮॥

ભાર્યા પુત્રશ્ચ દાસશ્ચ પ્રેષ્યો ભ્રાત્રા ચ સૌદરઃ ।
પ્રાપ્તાપરાધાસ્તાડ્યાઃ સ્યૂ રજ્જ્વા વેણુદલેન વા ॥ ૮.૨૯૯॥

પૃષ્ઠતસ્તુ શરીરસ્ય નોત્તમાઙ્ગે કથં ચન ।
અતોઽન્યથા તુ પ્રહરન્ પ્રાપ્તઃ સ્યાચ્ચૌરકિલ્બિષમ્ ॥ ૮.૩૦૦॥

એષોઽખિલેનાભિહિતો દણ્ડપારુષ્યનિર્ણયઃ ।
સ્તેનસ્યાતઃ પ્રવક્ષ્યામિ વિધિં દણ્ડવિનિર્ણયે ॥ ૮.૩૦૧॥

પરમં યત્નમાતિષ્ઠેત્સ્તેનાનાં નિગ્રહે નૃપઃ ।
સ્તેનાનાં નિગ્રહાદસ્ય યશો રાષ્ટ્રં ચ વર્ધતે ॥ ૮.૩૦૨॥

અભયસ્ય હિ યો દાતા સ પૂજ્યઃ સતતં નૃપઃ ।
સત્ત્રં હિ વર્ધતે તસ્ય સદૈવાભયદક્ષિણમ્ ॥ ૮.૩૦૩॥

સર્વતો ધર્મષડ્ભાગો રાજ્ઞો ભવતિ રક્ષતઃ ।
અધર્માદપિ ષડ્ભાગો ભવત્યસ્ય હ્યરક્ષતઃ ॥ ૮.૩૦૪॥

યદધીતે યદ્યજતે યદ્દદાતિ યદર્ચતિ ।
તસ્ય ષડ્ભાગભાગ્રાજા સમ્યગ્ભવતિ રક્ષણાત્ ॥ ૮.૩૦૫॥

રક્ષન્ ધર્મેણ ભૂતાનિ રાજા વધ્યાંશ્ચ ઘાતયન્ ।
યજતેઽહરહર્યજ્ઞૈઃ સહસ્રશતદક્ષિણૈઃ ॥ ૮.૩૦૬॥

યોઽરક્ષન્ બલિમાદત્તે કરં શુલ્કં ચ પાર્થિવઃ ।
પ્રતિભાગં ચ દણ્ડં ચ સ સદ્યો નરકં વ્રજેત્ ॥ ૮.૩૦૭॥

અરક્ષિતારં રાજાનં બલિષડ્ભાગહારિણમ્ । અરક્ષિતારમત્તારં
તમાહુઃ સર્વલોકસ્ય સમગ્રમલહારકમ્ ॥ ૮.૩૦૮॥

અનપેક્ષિતમર્યાદં નાસ્તિકં વિપ્રલુમ્પકમ્ । અનવેક્ષિતમર્યાદં
અરક્ષિતારમત્તારં નૃપં વિદ્યાદધોગતિમ્ ॥ ૮.૩૦૯॥

અધાર્મિકં ત્રિભિર્ન્યાયૈર્નિગૃહ્ણીયાત્પ્રયત્નતઃ ।
નિરોધનેન બન્ધેન વિવિધેન વધેન ચ ॥ ૮.૩૧૦॥

નિગ્રહેણ હિ પાપાનાં સાધૂનાં સઙ્ગ્રહેણ ચ ।
દ્વિજાતય ઇવૈજ્યાભિઃ પૂયન્તે સતતં નૃપાઃ ॥ ૮.૩૧૧॥

ક્ષન્તવ્યં પ્રભુણા નિત્યં ક્ષિપતાં કાર્યિણાં નૃણામ્ ।
બાલવૃદ્ધાતુરાણાં ચ કુર્વતા હિતમાત્મનઃ ॥ ૮.૩૧૨॥

યઃ ક્ષિપ્તો મર્ષયત્યાર્તૈસ્તેન સ્વર્ગે મહીયતે ।
યસ્ત્વૈશ્વર્યાન્ન ક્ષમતે નરકં તેન ગચ્છતિ ॥ ૮.૩૧૩॥

રાજા સ્તેનેન ગન્તવ્યો મુક્તકેશેન ધાવતા । ધીમતા
આચક્ષાણેન તત્સ્તેયમેવઙ્કર્માઽસ્મિ શાધિ મામ્ ॥ ૮.૩૧૪॥

સ્કન્ધેનાદાય મુસલં લગુડં વાઽપિ ખાદિરમ્ । મુશલં
શક્તિં ચોભયતસ્તીક્ષ્ણામાયસં દણ્ડમેવ વા ॥ ૮.૩૧૫॥

શાસનાદ્વા વિમોક્ષાદ્વા સ્તેનઃ સ્તેયાદ્વિમુચ્યતે ।
અશાસિત્વા તુ તં રાજા સ્તેનસ્યાપ્નોતિ કિલ્બિષમ્ ॥ ૮.૩૧૬॥

અન્નાદે ભ્રૂણહા માર્ષ્ટિ પત્યૌ ભાર્યાઽપચારિણી ।
ગુરૌ શિષ્યશ્ચ યાજ્યશ્ચ સ્તેનો રાજનિ કિલ્બિષમ્ ॥ ૮.૩૧૭॥

રાજભિઃ કૃતદણ્ડાસ્તુ કૃત્વા પાપાનિ માનવાઃ । રાજભિર્ધૃતદણ્ડાસ્તુ
નિર્મલાઃ સ્વર્ગમાયાન્તિ સન્તઃ સુકૃતિનો યથા ॥ ૮.૩૧૮॥

યસ્તુ રજ્જું ઘટં કૂપાદ્ધરેદ્ભિન્દ્યાચ્ચ યઃ પ્રપામ્ ।
સ દણ્ડં પ્રાપ્નુયાન્ માષં તચ્ચ તસ્મિન્ સમાહરેત્ ॥ ૮.૩૧૯॥

ધાન્યં દશભ્યઃ કુમ્ભેભ્યો હરતોઽભ્યધિકં વધઃ ।
શેષેઽપ્યેકાદશગુણં દાપ્યસ્તસ્ય ચ તદ્ધનમ્ ॥ ૮.૩૨૦॥

તથા ધરિમમેયાનાં શતાદભ્યધિકે વધઃ ।
સુવર્ણરજતાદીનામુત્તમાનાં ચ વાસસામ્ ॥ ૮.૩૨૧॥

પઞ્ચાશતસ્ત્વભ્યધિકે હસ્તચ્છેદનમિષ્યતે ।
શેષે ત્વેકાદશગુણં મૂલ્યાદ્દણ્ડં પ્રકલ્પયેત્ ॥ ૮.૩૨૨॥

પુરુષાણાં કુલીનાનાં નારીણાં ચ વિશેષતઃ ।
મુખ્યાનાં ચૈવ રત્નાનાં હરણે વધમર્હતિ ॥ ૮.૩૨૩॥

મહાપશૂનાં હરણે શસ્ત્રાણામૌષધસ્ય ચ ।
કાલમાસાદ્ય કાર્યં ચ દણ્ડં રાજા પ્રકલ્પયેત્ ॥ ૮.૩૨૪॥

ગોષુ બ્રાહ્મણસંસ્થાસુ છુરિકાયાશ્ચ ભેદને । ખરિકાયાશ્ચ

પશૂનાં હરણે ચૈવ સદ્યઃ કાર્યોઽર્ધપાદિકઃ ॥ ૮.૩૨૫॥

સૂત્રકાર્પાસકિણ્વાનાં ગોમયસ્ય ગુડસ્ય ચ ।
દધ્નઃ ક્ષીરસ્ય તક્રસ્ય પાનીયસ્ય તૃણસ્ય ચ ॥ ૮.૩૨૬॥

વેણુવૈદલભાણ્ડાનાં લવણાનાં તથૈવ ચ ।
મૃણ્મયાનાં ચ હરણે મૃદો ભસ્મન એવ ચ ॥ ૮.૩૨૭॥

મત્સ્યાનાં પક્ષિણાં ચૈવ તૈલસ્ય ચ ઘૃતસ્ય ચ ।
માંસસ્ય મધુનશ્ચૈવ યચ્ચાન્યત્પશુસમ્ભવમ્ ॥ ૮.૩૨૮॥

અન્યેષાં ચૈવમાદીનાં મદ્યાનામોદનસ્ય ચ । ચૈવમાદીનામદ્યાનામ્
પક્વાન્નાનાં ચ સર્વેષાં તન્મુલ્યાદ્દ્વિગુણો દમઃ ॥ ૮.૩૨૯॥

પુષ્પેષુ હરિતે ધાન્યે ગુલ્મવલ્લીનગેષુ ચ ।
અન્યેષ્વપરિપૂતેષુ દણ્ડઃ સ્યાત્પઞ્ચકૃષ્ણલઃ ॥ ૮.૩૩૦॥

પરિપૂતેષુ ધાન્યેષુ શાકમૂલફલેષુ ચ ।
નિરન્વયે શતં દણ્ડઃ સાન્વયેઽર્ધશતં દમઃ ॥ ૮.૩૩૧॥

સ્યાત્સાહસં ત્વન્વયવત્પ્રસભં કર્મ યત્કૃતમ્ ।
નિરન્વયં ભવેત્સ્તેયં હૃત્વાઽપવ્યયતે ચ યત્ ॥ ૮.૩૩૨॥

યસ્ત્વેતાન્યુપક્લૃપ્તાનિ દ્રવ્યાણિ સ્તેનયેન્નરઃ ।
તમાદ્યં દણ્ડયેદ્રાજા યશ્ચાગ્નિં ચોરયેદ્ગૃહાત્ ॥ ૮.૩૩૩॥ તં શતં

યેન યેન યથાઽઙ્ગેન સ્તેનો નૃષુ વિચેષ્ટતે ।
તત્તદેવ હરેત્તસ્ય પ્રત્યાદેશાય પાર્થિવઃ ॥ ૮.૩૩૪॥

પિતાઽચાર્યઃ સુહૃન્માતા ભાર્યા પુત્રઃ પુરોહિતઃ ।
નાદણ્ડ્યો નામ રાજ્ઞોઽસ્તિ યઃ સ્વધર્મે ન તિષ્ઠતિ ॥ ૮.૩૩૫॥

કાર્ષાપણં ભવેદ્દણ્ડ્યો યત્રાન્યઃ પ્રાકૃતો જનઃ ।
તત્ર રાજા ભવેદ્દણ્ડ્યઃ સહસ્રમિતિ ધારણા ॥ ૮.૩૩૬॥

અષ્ટાપાદ્યં તુ શૂદ્રસ્ય સ્તેયે ભવતિ કિલ્બિષમ્ ।
ષોડશૈવ તુ વૈશ્યસ્ય દ્વાત્રિંશત્ક્ષત્રિયસ્ય ચ ॥ ૮.૩૩૭॥

બ્રાહ્મણસ્ય ચતુઃષષ્ટિઃ પૂર્ણં વાઽપિ શતં ભવેત્ ।
દ્વિગુણા વા ચતુઃષષ્ટિસ્તદ્દોષગુણવિદ્ધિ સઃ ॥ ૮.૩૩૮॥

વાનસ્પત્યં મૂલફલં દાર્વગ્ન્યર્થં તથૈવ ચ ।
તૃણં ચ ગોભ્યો ગ્રાસાર્થમસ્તેયં મનુરબ્રવીત્ ॥ ૮.૩૩૯॥

યોઽદત્તાદાયિનો હસ્તાત્લિપ્સેત બ્રાહ્મણો ધનમ્ ।
યાજનાધ્યાપનેનાપિ યથા સ્તેનસ્તથૈવ સઃ ॥ ૮.૩૪૦॥

દ્વિજોઽધ્વગઃ ક્ષીણવૃત્તિર્દ્વાવિક્ષૂ દ્વે ચ મૂલકે ।
આદદાનઃ પરક્ષેત્રાન્ન દણ્ડં દાતુમર્હતિ ॥ ૮.૩૪૧॥

અસંદિતાનાં સંદાતા સંદિતાનાં ચ મોક્ષકઃ ।
દાસાશ્વરથહર્તા ચ પ્રાપ્તઃ સ્યાચ્ચોરકિલ્બિષમ્ ॥ ૮.૩૪૨॥

અનેન વિધિના રાજા કુર્વાણઃ સ્તેનનિગ્રહમ્ ।
યશોઽસ્મિન્ પ્રાપ્નુયાત્લોકે પ્રેત્ય ચાનુત્તમં સુખમ્ ॥ ૮.૩૪૩॥

ઐન્દ્રં સ્થાનમભિપ્રેપ્સુર્યશશ્ચાક્ષયમવ્યયમ્ ।
નોપેક્ષેત ક્ષણમપિ રાજા સાહસિકં નરમ્ ॥ ૮.૩૪૪॥

વાગ્દુષ્ટાત્તસ્કરાચ્ચૈવ દણ્ડેનૈવ ચ હિંસતઃ ।
સાહસસ્ય નરઃ કર્તા વિજ્ઞેયઃ પાપકૃત્તમઃ ॥ ૮.૩૪૫॥

સાહસે વર્તમાનં તુ યો મર્ષયતિ પાર્થિવઃ ।
સ વિનાશં વ્રજત્યાશુ વિદ્વેષં ચાધિગચ્છતિ ॥ ૮.૩૪૬॥

ન મિત્રકારણાદ્રાજા વિપુલાદ્વા ધનાગમાત્ ।
સમુત્સૃજેત્સાહસિકાન્ સર્વભૂતભયાવહાન્ ॥ ૮.૩૪૭॥

શસ્ત્રં દ્વિજાતિભિર્ગ્રાહ્યં ધર્મો યત્રોપરુધ્યતે ।
દ્વિજાતીનાં ચ વર્ણાનાં વિપ્લવે કાલકારિતે ॥ ૮.૩૪૮॥

આત્મનશ્ચ પરિત્રાણે દક્ષિણાનાં ચ સઙ્ગરે ।
સ્ત્રીવિપ્રાભ્યુપપત્તૌ ચ ઘ્નન્ ધર્મેણ ન દુષ્યતિ ॥ ૮.૩૪૯॥

ગુરું વા બાલવૃદ્ધૌ વા બ્રાહ્મણં વા બહુશ્રુતમ્ ।
આતતાયિનમાયાન્તં હન્યાદેવાવિચારયન્ ॥ ૮.૩૫૦॥

નાતતાયિવધે દોષો હન્તુર્ભવતિ કશ્ચન ।
પ્રકાશં વાઽપ્રકાશં વા મન્યુસ્તં મન્યુમૃચ્છતિ ॥ ૮.૩૫૧॥

પરદારાભિમર્શેષુ પ્રવૃત્તાન્નૄન્ મહીપતિઃ ।
ઉદ્વેજનકરૈર્દણ્ડૈશ્છિન્નયિત્વા પ્રવાસયેત્ ॥ ૮.૩૫૨॥ ચિહ્નયિત્વા)

તત્સમુત્થો હિ લોકસ્ય જાયતે વર્ણસઙ્કરઃ ।
યેન મૂલહરોઽધર્મઃ સર્વનાશાય કલ્પતે ॥ ૮.૩૫૩॥

પરસ્ય પત્ન્યા પુરુષઃ સમ્ભાષાં યોજયન્ રહઃ ।
પૂર્વમાક્ષારિતો દોષૈઃ પ્રાપ્નુયાત્પૂર્વસાહસમ્ ॥ ૮.૩૫૪॥

યસ્ત્વનાક્ષારિતઃ પૂર્વમભિભાષેત કારણાત્ ।
ન દોષં પ્રાપ્નુયાત્કિં ચિન્ન હિ તસ્ય વ્યતિક્રમઃ ॥ ૮.૩૫૫॥

પરસ્ત્રિયં યોઽભિવદેત્તીર્થેઽરણ્યે વનેઽપિ વા ।
નદીનાં વાઽપિ સમ્ભેદે સ સઙ્ગ્રહણમાપ્નુયાત્ ॥ ૮.૩૫૬॥

ઉપચારક્રિયા કેલિઃ સ્પર્શો ભૂષણવાસસામ્ । ઉપકારક્રિયા
સહ ખટ્વાઽસનં ચૈવ સર્વં સઙ્ગ્રહણં સ્મૃતમ્ ॥ ૮.૩૫૭॥

સ્ત્રિયં સ્પૃશેદદેશે યઃ સ્પૃષ્ટો વા મર્ષયેત્તયા ।
પરસ્પરસ્યાનુમતે સર્વં સઙ્ગ્રહણં સ્મૃતમ્ ॥ ૮.૩૫૮॥

અબ્રાહ્મણઃ સઙ્ગ્રહણે પ્રાણાન્તં દણ્ડમર્હતિ ।
ચતુર્ણામપિ વર્ણાનાં દારા રક્ષ્યતમાઃ સદા ॥ ૮.૩૫૯॥

ભિક્ષુકા બન્દિનશ્ચૈવ દીક્ષિતાઃ કારવસ્તથા ।
સમ્ભાષણં સહ સ્ત્રીભિઃ કુર્યુરપ્રતિવારિતાઃ ॥ ૮.૩૬૦॥

ન સમ્ભાષાં પરસ્ત્રીભિઃ પ્રતિષિદ્ધઃ સમાચરેત્ ।
નિષિદ્ધો ભાષમાણસ્તુ સુવર્ણં દણ્ડમર્હતિ ॥ ૮.૩૬૧॥

નૈષ ચારણદારેષુ વિધિર્નાત્મોપજીવિષુ ।
સજ્જયન્તિ હિ તે નારીર્નિગૂઢાશ્ચારયન્તિ ચ ॥ ૮.૩૬૨॥

કિં ચિદેવ તુ દાપ્યઃ સ્યાત્સમ્ભાષાં તાભિરાચરન્ ।
પ્રૈષ્યાસુ ચૈકભક્તાસુ રહઃ પ્રવ્રજિતાસુ ચ ॥ ૮.૩૬૩॥ પ્રેષ્યાસુ

યોઽકામાં દૂષયેત્કન્યાં સ સદ્યો વધમર્હતિ ।
સકામાં દૂષયંસ્તુલ્યો ન વધં પ્રાપ્નુયાન્નરઃ ॥ ૮.૩૬૪॥

કન્યાં ભજન્તીમુત્કૃષ્ટં ન કિં ચિદપિ દાપયેત્ ।
જઘન્યં સેવમાનાં તુ સંયતાં વાસયેદ્ગૃહે ॥ ૮.૩૬૫॥

ઉત્તમાં સેવમાનસ્તુ જઘન્યો વધમર્હતિ ।

શુલ્કં દદ્યાત્સેવમાનઃ સમામિચ્છેત્પિતા યદિ ॥ ૮.૩૬૬॥

અભિષહ્ય તુ યઃ કન્યાં કુર્યાદ્દર્પેણ માનવઃ ।
તસ્યાશુ કર્ત્યે અઙ્ગુલ્યૌ દણ્ડં ચાર્હતિ ષટ્શતમ્ ॥ ૮.૩૬૭॥ કર્ત્યા અઙ્ગુલ્યો

સકામાં દૂષયંસ્તુલ્યો નાઙ્ગુલિછેદમાપ્નુયાત્ ।
દ્વિશતં તુ દમં દાપ્યઃ પ્રસઙ્ગવિનિવૃત્તયે ॥ ૮.૩૬૮॥

કન્યૈવ કન્યાં યા કુર્યાત્તસ્યાઃ સ્યાદ્દ્વિશતો દમઃ ।
શુલ્કં ચ દ્વિગુણં દદ્યાત્શિફાશ્ચૈવાપ્નુયાદ્દશ ॥ ૮.૩૬૯॥

યા તુ કન્યાં પ્રકુર્યાત્સ્ત્રી સા સદ્યો મૌણ્ડ્યમર્હતિ ।
અઙ્ગુલ્યોરેવ વા છેદં ખરેણોદ્વહનં તથા ॥ ૮.૩૭૦॥

ભર્તારં લઙ્ઘયેદ્યા તુ સ્ત્રી જ્ઞાતિગુણદર્પિતા ।
તાં શ્વભિઃ ખાદયેદ્રાજા સંસ્થાને બહુસંસ્થિતે ॥ ૮.૩૭૧॥

પુમાંસં દાહયેત્પાપં શયને તપ્ત આયસે ।
અભ્યાદધ્યુશ્ચ કાષ્ઠાનિ તત્ર દહ્યેત પાપકૃત્ ॥ ૮.૩૭૨॥

સંવત્સરાભિશસ્તસ્ય દુષ્ટસ્ય દ્વિગુણો દમઃ । સંવત્સરેઽભિશસ્તસ્ય
વ્રાત્યયા સહ સંવાસે ચાણ્ડાલ્યા તાવદેવ તુ ॥ ૮.૩૭૩॥

શૂદ્રો ગુપ્તમગુપ્તં વા દ્વૈજાતં વર્ણમાવસન્ ।
અગુપ્તમઙ્ગસર્વસ્વૈર્ગુપ્તં સર્વેણ હીયતે ॥ ૮.૩૭૪॥ અઙ્ગસર્વસ્વી

વૈશ્યઃ સર્વસ્વદણ્ડઃ સ્યાત્સંવત્સરનિરોધતઃ ।
સહસ્રં ક્ષત્રિયો દણ્ડ્યો મૌણ્ડ્યં મૂત્રેણ ચાર્હતિ ॥ ૮.૩૭૫॥

બ્રાહ્મણીં યદ્યગુપ્તાં તુ ગચ્છેતાં વૈશ્યપાર્થિવૌ ।
વૈશ્યં પઞ્ચશતં કુર્યાત્ક્ષત્રિયં તુ સહસ્રિણમ્ ॥ ૮.૩૭૬॥

ઉભાવપિ તુ તાવેવ બ્રાહ્મણ્યા ગુપ્તયા સહ ।
વિપ્લુતૌ શૂદ્રવદ્દણ્ડ્યૌ દગ્ધવ્યૌ વા કટાગ્નિના ॥ ૮.૩૭૭॥

સહસ્રં બ્રાહ્મણો દણ્ડ્યો ગુપ્તાં વિપ્રાં બલાદ્વ્રજન્ ।
શતાનિ પઞ્ચ દણ્ડ્યઃ સ્યાદિચ્છન્ત્યા સહ સઙ્ગતઃ ॥ ૮.૩૭૮॥

મૌણ્ડ્યં પ્રાણાન્તિકં દણ્ડો બ્રાહ્મણસ્ય વિધીયતે । પ્રાણાન્તકો
ઇતરેષાં તુ વર્ણાનાં દણ્ડઃ પ્રાણાન્તિકો ભવેત્ ॥ ૮.૩૭૯॥ પ્રાણાન્તકો

ન જાતુ બ્રાહ્મણં હન્યાત્સર્વપાપેષ્વપિ સ્થિતમ્ ।
રાષ્ટ્રાદેનં બહિઃ કુર્યાત્સમગ્રધનમક્ષતમ્ ॥ ૮.૩૮૦॥

ન બ્રાહ્મણવધાદ્ભૂયાનધર્મો વિદ્યતે ભુવિ ।
તસ્માદસ્ય વધં રાજા મનસાઽપિ ન ચિન્તયેત્ ॥ ૮.૩૮૧॥

વૈશ્યશ્ચેત્ક્ષત્રિયાં ગુપ્તાં વૈશ્યાં વા ક્ષત્રિયો વ્રજેત્ ।
યો બ્રાહ્મણ્યામગુપ્તાયાં તાવુભૌ દણ્ડમર્હતઃ ॥ ૮.૩૮૨॥

સહસ્રં બ્રાહ્મણો દણ્ડં દાપ્યો ગુપ્તે તુ તે વ્રજન્ ।
શૂદ્રાયાં ક્ષત્રિયવિશોઃ સાહસ્રો વૈ ભવેદ્દમઃ ॥ ૮.૩૮૩॥ શૂદ્રાયા

ક્ષત્રિયાયામગુપ્તાયાં વૈશ્યે પઞ્ચશતં દમઃ ।
મૂત્રેણ મૌણ્ડ્યમિચ્છેત્તુ ક્ષત્રિયો દણ્ડમેવ વા ॥ ૮.૩૮૪॥ ઋચ્છેત્તુ

અગુપ્તે ક્ષત્રિયાવૈશ્યે શૂદ્રાં વા બ્રાહ્મણો વ્રજન્ ।
શતાનિ પઞ્ચ દણ્ડ્યઃ સ્યાત્સહસ્રં ત્વન્ત્યજસ્ત્રિયમ્ ॥ ૮.૩૮૫॥

યસ્ય સ્તેનઃ પુરે નાસ્તિ નાન્યસ્ત્રીગો ન દુષ્ટવાક્ ।
ન સાહસિકદણ્ડઘ્નો સ રાજા શક્રલોકભાક્ ॥ ૮.૩૮૬॥

એતેષાં નિગ્રહો રાજ્ઞઃ પઞ્ચાનાં વિષયે સ્વકે ।
સાંરાજ્યકૃત્સજાત્યેષુ લોકે ચૈવ યશસ્કરઃ ॥ ૮.૩૮૭॥

ઋત્વિજં યસ્ત્યજેદ્યાજ્યો યાજ્યં ચર્ત્વિક્ત્યજેદ્યદિ ।
શક્તં કર્મણ્યદુષ્ટં ચ તયોર્દણ્ડઃ શતં શતમ્ ॥ ૮.૩૮૮॥

ન માતા ન પિતા ન સ્ત્રી ન પુત્રસ્ત્યાગમર્હતિ ।
ત્યજન્નપતિતાનેતાન્ રાજ્ઞા દણ્ડ્યઃ શતાનિ ષટ્ ॥ ૮.૩૮૯॥

આશ્રમેષુ દ્વિજાતીનાં કાર્યે વિવદતાં મિથઃ ।
ન વિબ્રૂયાન્નૃપો ધર્મં ચિકીર્ષન્ હિતમાત્મનઃ ॥ ૮.૩૯૦॥

યથાર્હમેતાનભ્યર્ચ્ય બ્રાહ્મણૈઃ સહ પાર્થિવઃ ।
સાન્ત્વેન પ્રશમય્યાદૌ સ્વધર્મં પ્રતિપાદયેત્ ॥ ૮.૩૯૧॥

પ્રતિવેશ્યાનુવેશ્યૌ ચ કલ્યાણે વિંશતિદ્વિજે ।
અર્હાવભોજયન્ વિપ્રો દણ્ડમર્હતિ માષકમ્ ॥ ૮.૩૯૨॥

શ્રોત્રિયઃ શ્રોત્રિયં સાધું ભૂતિકૃત્યેષ્વભોજયન્ ।
તદન્નં દ્વિગુણં દાપ્યો હિરણ્યં ચૈવ માષકમ્ ॥ ૮.૩૯૩॥ હૈરણ્યં

અન્ધો જડઃ પીઠસર્પી સપ્તત્યા સ્થવિરશ્ચ યઃ ।
શ્રોત્રિયેષૂપકુર્વંશ્ચ ન દાપ્યાઃ કેન ચિત્કરમ્ ॥ ૮.૩૯૪॥

શ્રોત્રિયં વ્યાધિતાર્તૌ ચ બાલવૃદ્ધાવકિઞ્ચનમ્ ।
મહાકુલીનમાર્યં ચ રાજા સમ્પૂજયેત્સદા ॥ ૮.૩૯૫॥

શાલ્મલીફલકે શ્લક્ષ્ણે નેનિજ્યાન્નેજકઃ શનૈઃ ।
ન ચ વાસાંસિ વાસોભિર્નિર્હરેન્ન ચ વાસયેત્ ॥ ૮.૩૯૬॥

તન્તુવાયો દશપલં દદ્યાદેકપલાધિકમ્ ।
અતોઽન્યથા વર્તમાનો દાપ્યો દ્વાદશકં દમમ્ ॥ ૮.૩૯૭॥

શુલ્કસ્થાનેષુ કુશલાઃ સર્વપણ્યવિચક્ષણાઃ ।
કુર્યુરર્ઘં યથાપણ્યં તતો વિંશં નૃપો હરેત્ ॥ ૮.૩૯૮॥

રાજ્ઞઃ પ્રખ્યાતભાણ્ડાનિ પ્રતિષિદ્ધાનિ યાનિ ચ ।
તાણિ નિર્હરતો લોભાત્સર્વહારં હરેન્નૃપઃ ॥ ૮.૩૯૯॥

શુલ્કસ્થાનં પરિહરન્નકાલે ક્રયવિક્રયી ।
મિથ્યાવાદી ચ સઙ્ખ્યાને દાપ્યોઽષ્ટગુણમત્યયમ્ ॥ ૮.૪૦૦॥

આગમં નિર્ગમં સ્થાનં તથા વૃદ્ધિક્ષયાવુભૌ ।
વિચાર્ય સર્વપણ્યાનાં કારયેત્ક્રયવિક્રયૌ ॥ ૮.૪૦૧॥

પઞ્ચરાત્રે પઞ્ચરાત્રે પક્ષે પક્ષેઽથ વા ગતે ।
કુર્વીત ચૈષાં પ્રત્યક્ષમર્ઘસંસ્થાપનં નૃપઃ ॥ ૮.૪૦૨॥

તુલામાનં પ્રતીમાનં સર્વં ચ સ્યાત્સુલક્ષિતમ્ ।
ષટ્સુ ષટ્સુ ચ માસેષુ પુનરેવ પરીક્ષયેત્ ॥ ૮.૪૦૩॥

પણં યાનં તરે દાપ્યં પૌરુષોઽર્ધપણં તરે ।
પાદં પશુશ્ચ યોષિત્ચ પાદાર્ધં રિક્તકઃ પુમાન્ ॥ ૮.૪૦૪॥ પાદે

ભાણ્ડપૂર્ણાનિ યાનાનિ તાર્યં દાપ્યાનિ સારતઃ ।
રિક્તભાણ્ડાનિ યત્કિં ચિત્પુમાંસશ્ચાપરિચ્છદાઃ ॥ ૮.૪૦૫॥

દીર્ઘાધ્વનિ યથાદેશં યથાકાલં તરો ભવેત્ ।
નદીતીરેષુ તદ્વિદ્યાત્સમુદ્રે નાસ્તિ લક્ષણમ્ ॥ ૮.૪૦૬॥

ગર્ભિણી તુ દ્વિમાસાદિસ્તથા પ્રવ્રજિતો મુનિઃ ।

બ્રાહ્મણા લિઙ્ગિનશ્ચૈવ ન દાપ્યાસ્તારિકં તરે ॥ ૮.૪૦૭॥

યન્નાવિ કિં ચિદ્દાશાનાં વિશીર્યેતાપરાધતઃ ।
તદ્દાશૈરેવ દાતવ્યં સમાગમ્ય સ્વતોઽંશતઃ ॥ ૮.૪૦૮॥

એષ નૌયાયિનામુક્તો વ્યવહારસ્ય નિર્ણયઃ ।
દાશાપરાધતસ્તોયે દૈવિકે નાસ્તિ નિગ્રહઃ ॥ ૮.૪૦૯॥

વાણિજ્યં કારયેદ્વૈશ્યં કુસીદં કૃષિમેવ ચ ।
પશૂનાં રક્ષણં ચૈવ દાસ્યં શૂદ્રં દ્વિજન્મનામ્ ॥ ૮.૪૧૦॥

ક્ષત્રિયં ચૈવ વૈશ્યં ચ બ્રાહ્મણો વૃત્તિકર્શિતૌ ।
બિભૃયાદાનૃશંસ્યેન સ્વાનિ કર્માણિ કારયેત્ ॥ ૮.૪૧૧॥

દાસ્યં તુ કારયન્લોભાદ્બ્રાહ્મણઃ સંસ્કૃતાન્ દ્વિજાન્ ।
અનિચ્છતઃ પ્રાભવત્યાદ્રાજ્ઞા દણ્ડ્યઃ શતાનિ ષટ્ ॥ ૮.૪૧૨॥

શૂદ્રં તુ કારયેદ્દાસ્યં ક્રીતમક્રીતમેવ વા ।
દાસ્યાયૈવ હિ સૃષ્ટોઽસૌ બ્રાહ્મણસ્ય સ્વયમ્ભુવા ॥ ૮.૪૧૩॥

ન સ્વામિના નિસૃષ્ટોઽપિ શૂદ્રો દાસ્યાદ્વિમુચ્યતે ।
નિસર્ગજં હિ તત્તસ્ય કસ્તસ્માત્તદપોહતિ ॥ ૮.૪૧૪॥

ધ્વજાહૃતો ભક્તદાસો ગૃહજઃ ક્રીતદત્ત્રિમૌ ।
પૈત્રિકો દણ્ડદાસશ્ચ સપ્તૈતે દાસયોનયઃ ॥ ૮.૪૧૫॥

ભાર્યા પુત્રશ્ચ દાસશ્ચ ત્રય એવાધનાઃ સ્મૃતાઃ ।
યત્તે સમધિગચ્છન્તિ યસ્ય તે તસ્ય તદ્ધનમ્ ॥ ૮.૪૧૬॥

વિસ્રબ્ધં બ્રાહ્મણઃ શૂદ્રાદ્દ્રવ્યોપાદાનમાચરેત્ ।
ન હિ તસ્યાસ્તિ કિં ચિત્સ્વં ભર્તૃહાર્યધનો હિ સઃ ॥ ૮.૪૧૭॥

વૈશ્યશૂદ્રૌ પ્રયત્નેન સ્વાનિ કર્માણિ કારયેત્ ।
તૌ હિ ચ્યુતૌ સ્વકર્મભ્યઃ ક્ષોભયેતામિદં જગત્ ॥ ૮.૪૧૮॥

અહન્યહન્યવેક્ષેત કર્માન્તાન્ વાહનાનિ ચ ।
આયવ્યયૌ ચ નિયતાવાકરાન્ કોશમેવ ચ ॥ ૮.૪૧૯॥

એવં સર્વાનિમાન્ રાજા વ્યવહારાન્ સમાપયન્ ।
વ્યપોહ્ય કિલ્બિષં સર્વં પ્રાપ્નોતિ પરમાં ગતિમ્ ॥ ૮.૪૨૦॥

## અધ્યાય ૯

પુરુષસ્ય સ્ત્રિયાશ્ચૈવ ધર્મે વર્ત્મનિ તિષ્ઠતોઃ । ધર્મ્યે
સંયોગે વિપ્રયોગે ચ ધર્માન્ વક્ષ્યામિ શાશ્વતાન્ ॥ ૯.૧॥

અસ્વતન્ત્રાઃ સ્ત્રિયઃ કાર્યાઃ પુરુષૈઃ સ્વૈર્દિવાનિશમ્ ।
વિષયેષુ ચ સજ્જન્ત્યઃ સંસ્થાપ્યા આત્મનો વશે ॥ ૯.૨॥

પિતા રક્ષતિ કૌમારે ભર્તા રક્ષતિ યૌવને ।
રક્ષન્તિ સ્થવિરે પુત્રા ન સ્ત્રી સ્વાતન્ત્ર્યમર્હતિ ॥ ૯.૩॥

કાલેઽદાતા પિતા વાચ્યો વાચ્યશ્ચાનુપયન્ પતિઃ ।
મૃતે ભર્તરિ પુત્રસ્તુ વાચ્યો માતુરરક્ષિતા ॥ ૯.૪॥

સૂક્ષ્મેભ્યોઽપિ પ્રસઙ્ગેભ્યઃ સ્ત્રિયો રક્ષ્યા વિશેષતઃ । સ્ત્રિયા
દ્વયોર્હિ કુલયોઃ શોકમાવહેયુરરક્ષિતાઃ ॥ ૯.૫॥

ઇમં હિ સર્વવર્ણાનાં પશ્યન્તો ધર્મમુત્તમમ્ ।
યતન્તે રક્ષિતું ભાર્યાં ભર્તારો દુર્બલા અપિ ॥ ૯.૬॥

સ્વાં પ્રસૂતિં ચરિત્રં ચ કુલમાત્માનમેવ ચ ।
સ્વં ચ ધર્મં પ્રયત્નેન જાયાં રક્ષન્ હિ રક્ષતિ ॥ ૯.૭॥

પતિર્ભાર્યાં સમ્પ્રવિશ્ય ગર્ભો ભૂત્વેહ જાયતે ।
જાયાયાસ્તદ્ધિ જાયાત્વં યદસ્યાં જાયતે પુનઃ ॥ ૯.૮॥

યાદૃશં ભજતે હિ સ્ત્રી સુતં સૂતે તથાવિધમ્ ।
તસ્માત્પ્રજાવિશુદ્ધ્યર્થં સ્ત્રિયં રક્ષેત્પ્રયત્નતઃ ॥ ૯.૯॥

ન કશ્ચિદ્યોષિતઃ શક્તઃ પ્રસહ્ય પરિરક્ષિતુમ્ ।
એતૈરુપાયયોગૈસ્તુ શક્યાસ્તાઃ પરિરક્ષિતુમ્ ॥ ૯.૧૦॥

અર્થસ્ય સઙ્ગ્રહે ચૈનાં વ્યયે ચૈવ નિયોજયેત્ ।
શૌચે ધર્મેઽન્નપક્ત્યાં ચ પારિણાહ્યસ્ય વેક્ષણે ॥ ૯.૧૧॥

અરક્ષિતા ગૃહે રુદ્ધાઃ પુરુષૈરાપ્તકારિભિઃ ।
આત્માનમાત્મના યાસ્તુ રક્ષેયુસ્તાઃ સુરક્ષિતાઃ ॥ ૯.૧૨॥

પાનં દુર્જનસંસર્ગઃ પત્યા ચ વિરહોઽટનમ્ ।
સ્વપ્નોઽન્યગેહવાસશ્ચ નારીસંદૂષણાનિ ષટ્ ॥ ૯.૧૩॥

નૈતા રૂપં પરીક્ષન્તે નાસાં વયસિ સંસ્થિતિઃ ।
સુરૂપં વા વિરૂપં વા પુમાનિત્યેવ ભુઞ્જતે ॥ ૯.૧૪॥

પૌંશ્ચલ્યાચ્ચલચિત્તાચ્ચ નૈસ્નેહ્યાચ્ચ સ્વભાવતઃ । નૈઃસ્નેહ્યાચ્
રક્ષિતા યત્નતોઽપીહ ભર્તૃષ્વેતા વિકુર્વતે ॥ ૯.૧૫॥

એવં સ્વભાવં જ્ઞાત્વાઽસાં પ્રજાપતિનિસર્ગજમ્ ।
પરમં યત્નમાતિષ્ઠેત્પુરુષો રક્ષણં પ્રતિ ॥ ૯.૧૬॥

શય્યાઽઽસનમલઙ્કારં કામં ક્રોધમનાર્જવમ્ । ઃઅનાર્યતાં
દ્રોહભાવં કુચર્યાં ચ સ્ત્રીભ્યો મનુરકલ્પયત્ ॥ ૯.૧૭॥ દ્રોગ્ધૃભાવં

નાસ્તિ સ્ત્રીણાં ક્રિયા મન્ત્રૈરિતિ ધર્મે વ્યવસ્થિતિઃ ।
નિરિન્દ્રિયા હ્યમન્ત્રાશ્ચ સ્ત્રીભ્યો અનૃતમિતિ સ્થિતિઃ ॥ ૯.૧૮॥ સ્ત્રિયો

તથા ચ શ્રુતયો બહ્વ્યો નિગીતા નિગમેષ્વપિ ।
સ્વાલક્ષણ્યપરીક્ષાર્થં તાસાં શ ૃણુત નિષ્કૃતીઃ ॥ ૯.૧૯॥

યન્ મે માતા પ્રલુલુભે વિચરન્ત્યપતિવ્રતા ।
તન્ મે રેતઃ પિતા વૃઙ્ક્તામિત્યસ્યૈતન્નિદર્શનમ્ ॥ ૯.૨૦॥

ધ્યાયત્યનિષ્ટં યત્કિં ચિત્પાણિગ્રાહસ્ય ચેતસા ।
તસ્યૈષ વ્યભિચારસ્ય નિહ્નવઃ સમ્યગુચ્યતે ॥ ૯.૨૧॥

યાદૃગ્ગુણેન ભર્ત્રા સ્ત્રી સંયુજ્યેત યથાવિધિ ।
તાદૃગ્ગુણા સા ભવતિ સમુદ્રેણૈવ નિમ્નગા ॥ ૯.૨૨॥

અક્ષમાલા વસિષ્ઠેન સંયુક્તાઽધમયોનિજા ।
શારઙ્ગી મન્દપાલેન જગામાભ્યર્હણીયતામ્ ॥ ૯.૨૩॥

એતાશ્ચાન્યાશ્ચ લોકેઽસ્મિન્નપકૃષ્ટપ્રસૂતયઃ । અવકૃષ્ટપ્રસૂતયઃ
ઉત્કર્ષં યોષિતઃ પ્રાપ્તાઃ સ્વૈઃ સ્વૈર્ભર્તૃગુણૈઃ શુભૈઃ ॥ ૯.૨૪॥

એષોદિતા લોકયાત્રા નિત્યં સ્ત્રીપુંસયોઃ શુભા ।
પ્રેત્યેહ ચ સુખોદર્કાન્ પ્રજાધર્માન્નિબોધત ॥ ૯.૨૫॥

પ્રજનાર્થં મહાભાગાઃ પૂજાર્હા ગૃહદીપ્તયઃ ।
સ્ત્રિયઃ શ્રિયશ્ચ ગેહેષુ ન વિશેષોઽસ્તિ કશ્ચન ॥ ૯.૨૬॥

ઉત્પાદનમપત્યસ્ય જાતસ્ય પરિપાલનમ્ ।

પ્રત્યહં લોકયાત્રાયાઃ પ્રત્યક્ષં સ્ત્રી નિબન્ધનમ્ ॥ ૯.૨૭॥ પ્રત્યર્થં

અપત્યં ધર્મકાર્યાણિ શુશ્રૂષા રતિરુત્તમા ।
દારાऽધીનસ્તથા સ્વર્ગઃ પિતૄણામાત્મનશ્ચ હ ॥ ૯.૨૮॥

પતિં યા નાભિચરતિ મનોવાગ્દેહસંયતા ।
સા ભર્તૃલોકાનાપ્નોતિ સદ્ભિઃ સાધ્વીઇતિ ચોચ્યતે ॥ ૯.૨૯॥

વ્યભિચારાત્તુ ભર્તુઃ સ્ત્રી લોકે પ્રાપ્નોતિ નિન્દ્યતામ્ ।
સૃગાલયોનિં ચાપ્નોતિ પાપરોગૈશ્ચ પીડ્યતે ॥ ૯.૩૦॥ શ‌ૃગાલયોનિં

પુત્રં પ્રત્યુદિતં સદ્ભિઃ પૂર્વજૈશ્ચ મહર્ષિભિઃ ।
વિશ્વજન્યમિમં પુણ્યમુપન્યાસં નિબોધત ॥ ૯.૩૧॥

ભર્તરિ પુત્રં વિજાનન્તિ શ્રુતિદ્વૈધં તુ કર્તરિ । ભર્તુઃ
આહુરુત્પાદકં કે ચિદપરે ક્ષેત્રિણં વિદુઃ ॥ ૯.૩૨॥

ક્ષેત્રભૂતા સ્મૃતા નારી બીજભૂતઃ સ્મૃતઃ પુમાન્ ।
ક્ષેત્રબીજસમાયોગાત્સમ્ભવઃ સર્વદેહિનામ્ ॥ ૯.૩૩॥

વિશિષ્ટં કુત્ર ચિદ્બીજં સ્ત્રીયોનિસ્ત્વેવ કુત્ર ચિત્ ।
ઉભયં તુ સમં યત્ર સા પ્રસૂતિઃ પ્રશસ્યતે ॥ ૯.૩૪॥

બીજસ્ય ચૈવ યોન્યાશ્ચ બીજમુત્કૃષ્ટમુચ્યતે ।
સર્વભૂતપ્રસૂતિર્હિ બીજલક્ષણલક્ષિતા ॥ ૯.૩૫॥

યાદૃશં તૂપ્યતે બીજં ક્ષેત્રે કાલોપપાદિતે ।
તાદૃગ્રોહતિ તત્તસ્મિન્ બીજં સ્વૈર્વ્યઞ્જિતં ગુણૈઃ ॥ ૯.૩૬॥

ઇયં ભૂમિર્હિ ભૂતાનાં શાશ્વતી યોનિરુચ્યતે ।
ન ચ યોનિગુણાન્ કાંશ્ચિદ્બીજં પુષ્યતિ પુષ્ટિષુ ॥ ૯.૩૭॥

ભૂમાવપ્યેકકેદારે કાલોપ્તાનિ કૃષીવલૈઃ ।
નાનારૂપાણિ જાયન્તે બીજાનીહ સ્વભાવતઃ ॥ ૯.૩૮॥

વ્રીહયઃ શાલયો મુદ્ગાસ્તિલા માષાસ્તથા યવાઃ ।
યથાબીજં પ્રરોહન્તિ લશુનાનીક્ષવસ્તથા ॥ ૯.૩૯॥

અન્યદુપ્તં જાતમન્યદિત્યેતન્નોપપદ્યતે ।
ઉપ્યતે યદ્ધિ યદ્બીજં તત્તદેવ પ્રરોહતિ ॥ ૯.૪૦॥

તત્પ્રાજ્ઞેન વિનીતેન જ્ઞાનવિજ્ઞાનવેદિના ।
આયુષ્કામેન વપ્તવ્યં ન જાતુ પરયોષિતિ ॥ ૯.૪૧॥

અત્ર ગાથા વાયુગીતાઃ કીર્તયન્તિ પુરાવિદઃ ।
યથા બીજં ન વપ્તવ્યં પુંસા પરપરિગ્રહે ॥ ૯.૪૨॥

નશ્યતીષુર્યથા વિદ્ધઃ ખે વિદ્ધમનુવિધ્યતઃ ।
તથા નશ્યતિ વૈ ક્ષિપ્રં બીજં પરપરિગ્રહે ॥ ૯.૪૩॥ ક્ષિપ્તં

પૃથોરપીમાં પૃથિવીં ભાર્યાં પૂર્વવિદો વિદુઃ ।
સ્થાણુચ્છેદસ્ય કેદારમાહુઃ શાલ્યવતો મૃગમ્ ॥ ૯.૪૪॥

એતાવાનેવ પુરુષો યત્જાયાઽત્મા પ્રજૈતિ હ ।
વિપ્રાઃ પ્રાહુસ્તથા ચૈતદ્યો ભર્તા સા સ્મૃતાઙ્ગના ॥ ૯.૪૫॥

ન નિષ્ક્રયવિસર્ગાભ્યાં ભર્તુર્ભાર્યા વિમુચ્યતે ।
એવં ધર્મં વિજાનીમઃ પ્રાક્પ્રજાપતિનિર્મિતમ્ ॥ ૯.૪૬॥

સકૃદંશો નિપતતિ સકૃત્કન્યા પ્રદીયતે ।
સકૃદાહ દદાનીતિ ત્રીણ્યેતાનિ સતાં સકૃત્ ॥ ૯.૪૭॥ દદામીતિ

યથા ગોઽશ્વોષ્ટ્રદાસીષુ મહિષ્યજાવિકાસુ ચ ।
નોત્પાદકઃ પ્રજાભાગી તથૈવાન્યાઙ્ગનાસ્વપિ ॥ ૯.૪૮॥

યેઽક્ષેત્રિણો બીજવન્તઃ પરક્ષેત્રપ્રવાપિણઃ ।
તે વૈ સસ્યસ્ય જાતસ્ય ન લભન્તે ફલં ક્વ ચિત્ ॥ ૯.૪૯॥

યદન્યગોષુ વૃષભો વત્સાનાં જનયેત્શતમ્ ।
ગોમિનામેવ તે વત્સા મોઘં સ્કન્દિતમાર્ષભમ્ ॥ ૯.૫૦॥

તથૈવાક્ષેત્રિણો બીજં પરક્ષેત્રપ્રવાપિણઃ ।
કુર્વન્તિ ક્ષેત્રિણામર્થં ન બીજી લભતે ફલમ્ ॥ ૯.૫૧॥

ફલં ત્વનભિસંધાય ક્ષેત્રિણાં બીજિનાં તથા ।
પ્રત્યક્ષં ક્ષેત્રિણામર્થો બીજાદ્યોનિર્ગરીયસી ॥ ૯.૫૨॥

ક્રિયાભ્યુપગમાત્ત્વેતદ્બીજાર્થં યત્પ્રદીયતે ।
તસ્યૈહ ભાગિનૌ દૃષ્ટૌ બીજી ક્ષેત્રિક એવ ચ ॥ ૯.૫૩॥

ઓઘવાતાહૃતં બીજં યસ્ય ક્ષેત્રે પ્રરોહતિ ।
ક્ષેત્રિકસ્યૈવ તદ્બીજં ન વપ્તા લભતે ફલમ્ ॥ ૯.૫૪॥ ન બીજી લભતે ફલમ્

એષ ધર્મો ગવાશ્વસ્ય દાસ્યુષ્ટ્રાજાવિકસ્ય ચ ।
વિહઙ્ગમહિષીણાં ચ વિજ્ઞેયઃ પ્રસવં પ્રતિ ॥ ૯.૫૫॥

એતદ્વઃ સારફલ્ગુત્વં બીજયોન્યોઃ પ્રકીર્તિતમ્ ।
અતઃ પરં પ્રવક્ષ્યામિ યોષિતાં ધર્મમાપદિ ॥ ૯.૫૬॥

ભ્રાતુર્જ્યેષ્ઠસ્ય ભાર્યા યા ગુરુપત્ન્યનુજસ્ય સા ।
યવીયસસ્તુ યા ભાર્યા સ્નુષા જ્યેષ્ઠસ્ય સા સ્મૃતા ॥ ૯.૫૭॥

જ્યેષ્ઠો યવીયસો ભાર્યાં યવીયાન્ વાઽગ્રજસ્ત્રિયમ્ ।
પતિતૌ ભવતો ગત્વા નિયુક્તાવપ્યનાપદિ ॥ ૯.૫૮॥

દેવરાદ્વા સપિણ્ડાદ્વા સ્ત્રિયા સમ્યઙ્નિયુક્તયા ।
પ્રજેપ્સિતાઽઽધિગન્તવ્યા સંતાનસ્ય પરિક્ષયે ॥ ૯.૫૯॥

વિધવાયાં નિયુક્તસ્તુ ઘૃતાક્તો વાગ્યતો નિશિ ।
એકમુત્પાદયેત્પુત્રં ન દ્વિતીયં કથં ચન ॥ ૯.૬૦॥

દ્વિતીયમેકે પ્રજનં મન્યન્તે સ્ત્રીષુ તદ્વિદઃ ।
અનિર્વૃતં નિયોગાર્થં પશ્યન્તો ધર્મતસ્તયોઃ ॥ ૯.૬૧॥ અનિર્વૃત્તં

વિધવાયાં નિયોગાર્થે નિર્વૃત્તે તુ યથાવિધિ । નિવૃત્તે
ગુરુવત્ચ સ્નુષાવત્ચ વર્તેયાતાં પરસ્પરમ્ ॥ ૯.૬૨॥

નિયુક્તૌ યૌ વિધિં હિત્વા વર્તેયાતાં તુ કામતઃ ।
તાવુભૌ પતિતૌ સ્યાતાં સ્નુષાગગુરુતલ્પગૌ ॥ ૯.૬૩॥

નાન્યસ્મિન્ વિધવા નારી નિયોક્તવ્યા દ્વિજાતિભિઃ ।
અન્યસ્મિન્ હિ નિયુઞ્જાના ધર્મં હન્યુઃ સનાતનમ્ ॥ ૯.૬૪॥

નોદ્વાહિકેષુ મન્ત્રેષુ નિયોગઃ કીર્ત્યતે ક્વ ચિત્ ।
ન વિવાહવિધાવુક્તં વિધવાવેદનં પુનઃ ॥ ૯.૬૫॥

અયં દ્વિજૈર્હિ વિદ્વદ્ભિઃ પશુધર્મો વિગર્હિતઃ ।
મનુષ્યાણામપિ પ્રોક્તો વેને રાજ્યં પ્રશાસતિ ॥ ૯.૬૬॥

સ મહીમખિલાં ભુઞ્જન્ રાજર્ષિપ્રવરઃ પુરા ।
વર્ણાનાં સઙ્કરં ચક્રે કામોપહતચેતનઃ ॥ ૯.૬૭॥

તતઃ પ્રભૃતિ યો મોહાત્પ્રમીતપતિકાં સ્ત્રિયમ્ ।

નિયોજયત્યપત્યાર્થં તં વિગર્હન્તિ સાધવઃ ॥ ૯.૬૮॥

યસ્યા મ્રિયેત કન્યાયા વાચા સત્યે કૃતે પતિઃ ।
તામનેન વિધાનેન નિજો વિન્દેત દેવરઃ ॥ ૯.૬૯॥

યથાવિધ્યધિગમ્યૈનાં શુક્લવસ્ત્રાં શુચિવ્રતામ્ ।
મિથો ભજેતા પ્રસવાત્સકૃત્સકૃદૃતાવૃતૌ ॥ ૯.૭૦॥

ન દત્ત્વા કસ્ય ચિત્કન્યાં પુનર્દદ્યાદ્વિચક્ષણઃ ।
દત્ત્વા પુનઃ પ્રયચ્છન્ હિ પ્રાપ્નોતિ પુરુષાનૃતમ્ ॥ ૯.૭૧॥

વિધિવત્પ્રતિગૃહ્યાપિ ત્યજેત્કન્યાં વિગર્હિતામ્ ।
વ્યાધિતાં વિપ્રદુષ્ટાં વા છદ્મના ચોપપાદિતામ્ ॥ ૯.૭૨॥

યસ્તુ દોષવતીં કન્યામનાખ્યાયોપપાદયેત્ ।
તસ્ય તદ્વિતથં કુર્યાત્કન્યાદાતુર્દુરાત્મનઃ ॥ ૯.૭૩॥

વિધાય વૃત્તિં ભાર્યાયાઃ પ્રવસેત્કાર્યવાન્નરઃ ।
અવૃત્તિકર્શિતા હિ સ્ત્રી પ્રદુષ્યેત્સ્થિતિમત્યપિ ॥ ૯.૭૪॥

વિધાય પ્રોષિતે વૃત્તિં જીવેન્નિયમમાસ્થિતા ।
પ્રોષિતે ત્વવિધાયૈવ જીવેત્શિલ્પૈરગર્હિતૈઃ ॥ ૯.૭૫॥

પ્રોષિતો ધર્મકાર્યાર્થં પ્રતીક્ષ્યોઽષ્ટૌ નરઃ સમાઃ ।
વિદ્યાર્થં ષટ્ યશોઽર્થં વા કામાર્થં ત્રીંસ્તુ વત્સરાન્ ॥ ૯.૭૬॥

સંવત્સરં પ્રતીક્ષેત દ્વિષન્તીં યોષિતં પતિઃ । દ્વિષાણાં
ઊર્ધ્વં સંવત્સરાત્ત્વેનાં દાયં હૃત્વા ન સંવસેત્ ॥ ૯.૭૭॥

અતિક્રામેત્પ્રમત્તં યા મત્તં રોગાર્તમેવ વા ।
સા ત્રીન્ માસાન્ પરિત્યાજ્યા વિભૂષણપરિચ્છદા ॥ ૯.૭૮॥

ઉન્મત્તં પતિતં ક્લીબમબીજં પાપરોગિણમ્ ।
ન ત્યાગોઽસ્તિ દ્વિષન્ત્યાશ્ચ ન ચ દાયાપવર્તનમ્ ॥ ૯.૭૯॥

મદ્યપાઽસાધુવૃત્તા ચ પ્રતિકૂલા ચ યા ભવેત્ । મદ્યપાસત્યવૃત્તા
વ્યાધિતા વાઽધિવેત્તવ્યા હિંસ્રાઽર્થઘ્ની ચ સર્વદા ॥ ૯.૮૦॥

વન્ધ્યાષ્ટમેઽધિવેદ્યાબ્દે દશમે તુ મૃતપ્રજા ।
એકાદશે સ્ત્રીજનની સદ્યસ્ત્વપ્રિયવાદિની ॥ ૯.૮૧॥

યા રોગિણી સ્યાત્તુ હિતા સમ્પન્ના ચૈવ શીલતઃ ।
સાઽનુજ્ઞાપ્યાધિવેત્તવ્યા નાવમાન્યા ચ કર્હિ ચિત્ ॥ ૯.૮૨॥

અધિવિન્ના તુ યા નારી નિર્ગચ્છેદ્રુષિતા ગૃહાત્ ।
સા સદ્યઃ સંનિરોદ્ધવ્યા ત્યાજ્યા વા કુલસંનિધૌ ॥ ૯.૮૩॥

પ્રતિષિદ્ધાઽપિ ચેદ્યા તુ મદ્યમભ્યુદયેષ્વપિ । પ્રતિષેધે પિબેદ્યા તુ
પ્રેક્ષાસમાજં ગચ્છેદ્વા સા દણ્ડ્યા કૃષ્ણલાનિ ષટ્ ॥ ૯.૮૪॥

યદિ સ્વાશ્ચાપરાશ્ચૈવ વિન્દેરન્ યોષિતો દ્વિજાઃ ।
તાસાં વર્ણક્રમેણ સ્યાજ્જ્યેષ્ઠ્યં પૂજા ચ વેશ્મ ચ ॥ ૯.૮૫॥

ભર્તુઃ શરીરશુશ્રૂષાં ધર્મકાર્યં ચ નૈત્યકમ્ ।
સ્વા ચૈવ કુર્યાત્સર્વેષાં નાસ્વજાતિઃ કથં ચન ॥ ૯.૮૬॥ સ્વા સ્વૈવ

યસ્તુ તત્કારયેન્ મોહાત્સજાત્યા સ્થિતયાઽન્યયા ।
યથા બ્રાહ્મણચાણ્ડાલઃ પૂર્વદૃષ્ટસ્તથૈવ સઃ ॥ ૯.૮૭॥

ઉત્કૃષ્ટાયાભિરૂપાય વરાય સદૃશાય ચ ।
અપ્રાપ્તામપિ તાં તસ્મૈ કન્યાં દદ્યાદ્યથાવિધિ ॥ ૯.૮૮॥

કામમામરણાત્તિષ્ઠેદ્ગૃહે કન્યાર્તુમત્યપિ ।
ન ચૈવૈનાં પ્રયચ્છેત્તુ ગુણહીનાય કર્હિ ચિત્ ॥ ૯.૮૯॥

ત્રીણિ વર્ષાણ્યુદીક્ષેત કુમાર્યર્તુમતી સતી ।
ઊર્ધ્વં તુ કાલાદેતસ્માદ્વિન્દેત સદૃશં પતિમ્ ॥ ૯.૯૦॥

અદીયમાના ભર્તારમધિગચ્છેદ્યદિ સ્વયમ્ ।
નૈનઃ કિં ચિદવાપ્નોતિ ન ચ યં સાઽધિગચ્છતિ ॥ ૯.૯૧॥

અલઙ્કારં નાદદીત પિત્ર્યં કન્યા સ્વયંવરા ।
માતૃકં ભ્રાતૃદત્તં વા સ્તેના સ્યાદ્યદિ તં હરેત્ ॥ ૯.૯૨॥

પિત્રે ન દદ્યાત્શુલ્કં તુ કન્યાં ઋતુમતીં હરન્ ।
સ ચ સ્વામ્યાદતિક્રામેદૃતૂનાં પ્રતિરોધનાત્ ॥ ૯.૯૩॥

ત્રિંશદ્વર્ષો વહેત્કન્યાં હૃદ્યાં દ્વાદશવાર્ષિકીમ્ ।
ત્ર્યષ્ટવર્ષોઽષ્ટવર્ષાં વા ધર્મે સીદતિ સત્વરઃ ॥ ૯.૯૪॥

દેવદત્તાં પતિર્ભાર્યાં વિન્દતે નેચ્છયાઽત્મનઃ ।
તાં સાધ્વીં બિભૃયાન્નિત્યં દેવાનાં પ્રિયમાચરન્ ॥ ૯.૯૫॥

પ્રજનાર્થં સ્ત્રિયઃ સૃષ્ટાઃ સંતાનાર્થં ચ માનવઃ ।
તસ્માત્સાધારણો ધર્મઃ શ્રુતૌ પત્ન્યા સહોદિતઃ ॥ ૯.૯૬॥

કન્યાયાં દત્તશુલ્કાયાં મ્રિયેત યદિ શુલ્કદઃ ।
દેવરાય પ્રદાતવ્યા યદિ કન્યાઽનુમન્યતે ॥ ૯.૯૭॥

આદદીત ન શૂદ્રોઽપિ શુલ્કં દુહિતરં દદન્ ।
શુલ્કં હિ ગૃહ્ણન્ કુરુતે છન્નં દુહિતૃવિક્રયમ્ ॥ ૯.૯૮॥

એતત્તુ ન પરે ચક્રુર્નાપરે જાતુ સાધવઃ ।
યદન્યસ્ય પ્રતિજ્ઞાય પુનરન્યસ્ય દીયતે ॥ ૯.૯૯॥

નાનુશુશ્રુમ જાત્વેતત્પૂર્વેષ્વપિ હિ જન્મસુ ।
શુલ્કસંજ્ઞેન મૂલ્યેન છન્નં દુહિતૃવિક્રયમ્ ॥ ૯.૧૦૦॥

અન્યોન્યસ્યાવ્યભિચારો ભવેદામરણાન્તિકઃ ।
એષ ધર્મઃ સમાસેન જ્ઞેયઃ સ્ત્રીપુંસયોઃ પરઃ ॥ ૯.૧૦૧॥

તથા નિત્યં યતેયાતાં સ્ત્રીપુંસૌ તુ કૃતક્રિયૌ ।
યથા નાભિચરેતાં તૌ વિયુક્તાવિતરેતરમ્ ॥ ૯.૧૦૨॥ નાતિચરેતાં

એષ સ્ત્રીપુંસયોરુક્તો ધર્મો વો રતિસંહિતઃ ।
આપદ્યપત્યપ્રાપ્તિશ્ચ દાયધર્મં નિબોધત ॥ ૯.૧૦૩॥

ઊર્ધ્વં પિતુશ્ચ માતુશ્ચ સમેત્ય ભ્રાતરઃ સમમ્ ।
ભજેરન્ પૈતૃકં રિક્થમનીશાસ્તે હિ જીવતોઃ ॥ ૯.૧૦૪॥

જ્યેષ્ઠ એવ તુ ગૃહ્ણીયાત્પિત્ર્યં ધનમશેષતઃ ।
શેષાસ્તમુપજીવેયુર્યથૈવ પિતરં તથા ॥ ૯.૧૦૫॥

જ્યેષ્ઠેન જાતમાત્રેણ પુત્રી ભવતિ માનવઃ ।
પિતૃણામનૃણશ્ચૈવ સ તસ્માત્સર્વમર્હતિ ॥ ૯.૧૦૬॥

યસ્મિનૃણં સંનયતિ યેન ચાનન્ત્યમશ્નુતે ।
સ એવ ધર્મજઃ પુત્રઃ કામજાનિતરાન્ વિદુઃ ॥ ૯.૧૦૭॥

પિતેવ પાલયેત્પૂત્રાન્ જ્યેષ્ઠો ભ્રાતૃન્ યવીયસઃ ।
પુત્રવત્ચાપિ વર્તેરન્ જ્યેષ્ઠે ભ્રાતરિ ધર્મતઃ ॥ ૯.૧૦૮॥

જ્યેષ્ઠઃ કુલં વર્ધયતિ વિનાશયતિ વા પુનઃ ।

જ્યેષ્ઠઃ પૂજ્યતમો લોકે જ્યેષ્ઠઃ સદ્ભિરગર્હિતઃ ॥ ૯.૧૦૯॥

યો જ્યેષ્ઠો જ્યેષ્ઠવૃત્તિઃ સ્યાન્ માતૈવ સ પિતૈવ સઃ ।
અજ્યેષ્ઠવૃત્તિર્યસ્તુ સ્યાત્સ સમ્પૂજ્યસ્તુ બન્ધુવત્ ॥ ૯.૧૧૦॥

એવં સહ વસેયુર્વા પૃથગ્વા ધર્મકામ્યયા ।
પૃથગ્વિવર્ધતે ધર્મસ્તસ્માદ્ધર્મ્યા પૃથક્ક્રિયા ॥ ૯.૧૧૧॥

જ્યેષ્ઠસ્ય વિંશ ઉદ્ધારઃ સર્વદ્રવ્યાચ્ચ યદ્વરમ્ ।
તતોઽર્ધં મધ્યમસ્ય સ્યાત્તુરીયં તુ યવીયસઃ ॥ ૯.૧૧૨॥

જ્યેષ્ઠશ્ચૈવ કનિષ્ઠશ્ચ સંહરેતાં યથોદિતમ્ ।
યેઽન્યે જ્યેષ્ઠકનિષ્ઠાભ્યાં તેષાં સ્યાન્ મધ્યમં ધનમ્ ॥ ૯.૧૧૩॥

સર્વેષાં ધનજાતાનામાદદીતાગ્ર્યમગ્રજઃ ।
યચ્ચ સાતિશયં કિં ચિદ્દશતશ્ચાપ્નુયાદ્વરમ્ ॥ ૯.૧૧૪॥

ઉદ્ધારો ન દશસ્વસ્તિ સમ્પન્નાનાં સ્વકર્મસુ ।
યત્કિં ચિદેવ દેયં તુ જ્યાયસે માનવર્ધનમ્ ॥ ૯.૧૧૫॥

એવં સમુદ્ધૃતોદ્ધારે સમાનંશાન્ પ્રકલ્પયેત્ ।
ઉદ્ધારેઽનુદ્ધૃતે ત્વેષામિયં સ્યાદંશકલ્પના ॥ ૯.૧૧૬॥

એકાધિકં હરેજ્જ્યેષ્ઠઃ પુત્રોઽધ્યર્ધં તતોઽનુજઃ ।
અંશમંશં યવીયાંસ ઇતિ ધર્મો વ્યવસ્થિતઃ ॥ ૯.૧૧૭॥

સ્વેભ્યોંશેભ્યસ્તુ કન્યાભ્યઃ પ્રદદ્યુર્ભ્રાતરઃ પૃથક્ । સ્વાભ્યઃ સ્વાભ્યસ્તુ
સ્વાત્સ્વાદંશાચ્ચતુર્ભાગં પતિતાઃ સ્યુરદિત્સવઃ ॥ ૯.૧૧૮॥

અજાવિકં સેકશફં ન જાતુ વિષમં ભજેત્ । અજાવિકં ચૈકશફં
અજાવિકં તુ વિષમં જ્યેષ્ઠસ્યૈવ વિધીયતે ॥ ૯.૧૧૯॥

યવીયાન્જ્યેષ્ઠભાર્યાયાં પુત્રમુત્પાદયેદ્યદિ ।
સમસ્તત્ર વિભાગઃ સ્યાદિતિ ધર્મો વ્યવસ્થિતઃ ॥ ૯.૧૨૦॥

ઉપસર્જનં પ્રધાનસ્ય ધર્મતો નોપપદ્યતે ।
પિતા પ્રધાનં પ્રજને તસ્માદ્ધર્મેણ તં ભજેત્ ॥ ૯.૧૨૧॥

પુત્રઃ કનિષ્ઠો જ્યેષ્ઠાયાં કનિષ્ઠાયાં ચ પૂર્વજઃ ।
કથં તત્ર વિભાગઃ સ્યાદિતિ ચેત્સંશયો ભવેત્ ॥ ૯.૧૨૨॥

એકં વૃષભમુદ્ધારં સંહરેત સ પૂર્વજઃ ।
તતોઽપરે જ્યેષ્ઠવૃષાસ્તદૂનાનાં સ્વમાતૃતઃ ॥ ૯.૧૨૩॥

જ્યેષ્ઠસ્તુ જાતો જ્યેષ્ઠાયાં હરેદ્વૃષભષોડશાઃ ।
તતઃ સ્વમાતૃતઃ શેષા ભજેરન્નિતિ ધારણા ॥ ૯.૧૨૪॥

સદૃશસ્ત્રીષુ જાતાનાં પુત્રાણામવિશેષતઃ ।
ન માતૃતો જ્યૈષ્ઠ્યમસ્તિ જન્મતો જ્યૈષ્ઠ્યમુચ્યતે ॥ ૯.૧૨૫॥

જન્મજ્યેષ્ઠેન ચાહ્વાનં સુબ્રહ્મણ્યાસ્વપિ સ્મૃતમ્ ।
યમયોશ્ચૈવ ગર્ભેષુ જન્મતો જ્યેષ્ઠતા સ્મૃતા ॥ ૯.૧૨૬॥

અપુત્રોઽનેન વિધિના સુતાં કુર્વીત પુત્રિકામ્ ।
યદપત્યં ભવેદસ્યાં તન્ મમ સ્યાત્સ્વધાકરમ્ ॥ ૯.૧૨૭॥

અનેન તુ વિધાનેન પુરા ચક્રેઽથ પુત્રિકાઃ ।
વિવૃદ્ધ્યર્થં સ્વવંશસ્ય સ્વયં દક્ષઃ પ્રજાપતિઃ ॥ ૯.૧૨૮॥

દદૌ સ દશ ધર્માય કશ્યપાય ત્રયોદશ ।
સોમાય રાજ્ઞે સત્કૃત્ય પ્રીતાત્મા સપ્તવિંશતિમ્ ॥ ૯.૧૨૯॥

યથૈવાત્મા તથા પુત્રઃ પુત્રેણ દુહિતા સમા ।
તસ્યામાત્મનિ તિષ્ઠન્ત્યાં કથમન્યો ધનં હરેત્ ॥ ૯.૧૩૦॥

માતુસ્તુ યૌતકં યત્સ્યાત્કુમારીભાગ એવ સઃ ।
દૌહિત્ર એવ ચ હરેદપુત્રસ્યાખિલં ધનમ્ ॥ ૯.૧૩૧॥

દૌહિત્રો હ્યખિલં રિક્થમપુત્રસ્ય પિતુર્હરેત્ ।
સ એવ દદ્યાદ્દ્વૌ પિણ્ડૌ પિત્રે માતામહાય ચ ॥ ૯.૧૩૨॥

પૌત્રદૌહિત્રયોર્લોકે ન વિશેષોઽસ્તિ ધર્મતઃ ।
તયોર્હિ માતાપિતરૌ સમ્ભૂતૌ તસ્ય દેહતઃ ॥ ૯.૧૩૩॥

પુત્રિકાયાં કૃતાયાં તુ યદિ પુત્રોઽનુજાયતે ।
સમસ્તત્ર વિભાગઃ સ્યાત્જ્યેષ્ઠતા નાસ્તિ હિ સ્ત્રિયાઃ ॥ ૯.૧૩૪॥

અપુત્રાયાં મૃતાયાં તુ પુત્રિકાયાં કથં ચન ।
ધનં તત્પુત્રિકાભર્તા હરેતૈવાવિચારયન્ ॥ ૯.૧૩૫॥

અકૃતા વા કૃતા વાઽપિ યં વિન્દેત્સદૃશાત્સુતમ્ ।
પૌત્રી માતામહસ્તેન દદ્યાત્પિણ્ડં હરેદ્ધનમ્ ॥ ૯.૧૩૬॥

પુત્રેણ લોકાન્જયતિ પૌત્રેણાનન્ત્યમશ્નુતે ।
અથ પુત્રસ્ય પૌત્રેણ બ્રધ્નસ્યાપ્નોતિ વિષ્ટપમ્ ॥ ૯.૧૩૭॥

પુન્નામ્નો નરકાદ્યસ્માત્ત્રાયતે પિતરં સુતઃ ।
તસ્માત્પુત્ર ઇતિ પ્રોક્તઃ સ્વયમેવ સ્વયમ્ભુવા ॥ ૯.૧૩૮॥

પૌત્રદૌહિત્રયોર્લોકે વિશેષો નોપપદ્યતે ।
દૌહિત્રોઽપિ હ્યમુત્રૈનં સંતારયતિ પૌત્રવત્ ॥ ૯.૧૩૯॥

માતુઃ પ્રથમતઃ પિણ્ડં નિર્વપેત્પુત્રિકાસુતઃ ।
દ્વિતીયં તુ પિતુસ્તસ્યાસ્તૃતીયં તત્પિતુઃ પિતુઃ ॥ ૯.૧૪૦॥

ઉપપન્નો ગુણૈઃ સર્વૈઃ પુત્રો યસ્ય તુ દત્ત્રિમઃ ।
સ હરેતૈવ તદ્રિક્થં સમ્પ્રાપ્તોઽપ્યન્યગોત્રતઃ ॥ ૯.૧૪૧॥

ગોત્રરિક્થે જનયિતુર્ન હરેદ્દત્ત્રિમઃ ક્વ ચિત્ ।
ગોત્રરિક્થાનુગઃ પિણ્ડો વ્યપૈતિ દદતઃ સ્વધા ॥ ૯.૧૪૨॥

અનિયુક્તાસુતશ્ચૈવ પુત્રિણ્યાઽપ્તશ્ચ દેવરાત્ ।
ઉભૌ તૌ નાર્હતો ભાગં જારજાતકકામજૌ ॥ ૯.૧૪૩॥

નિયુક્તાયામપિ પુમાન્નાર્યાં જાતોઽવિધાનતઃ ।
નૈવાર્હઃ પૈતૃકં રિક્થં પતિતોત્પાદિતો હિ સઃ ॥ ૯.૧૪૪॥

હરેત્તત્ર નિયુક્તાયાં જાતઃ પુત્રો યથૌરસઃ ।
ક્ષેત્રિકસ્ય તુ તદ્બીજં ધર્મતઃ પ્રસવશ્ચ સઃ ॥ ૯.૧૪૫॥

ધનં યો બિભૃયાદ્ભ્રાતુર્મૃતસ્ય સ્ત્રિયમેવ ચ ।
સોઽપત્યં ભ્રાતુરુત્પાદ્ય દદ્યાત્તસ્યૈવ તદ્ધનમ્ ॥ ૯.૧૪૬॥

યા નિયુક્તાઽન્યતઃ પુત્રં દેવરાદ્વાઽપ્યવાપ્નુયાત્ ।
તં કામજમરિક્થીયં વૃથોત્પન્નં પ્રચક્ષતે ॥ ૯.૧૪૭॥ મિથ્યૌત્પન્નં

એતદ્વિધાનં વિજ્ઞેયં વિભાગસ્યૈકયોનિષુ ।
બહ્વીષુ ચૈકજાતાનાં નાનાસ્ત્રીષુ નિબોધત ॥ ૯.૧૪૮॥

બ્રાહ્મણસ્યાનુપૂર્વ્યેણ ચતસ્રસ્તુ યદિ સ્ત્રિયઃ ।
તાસાં પુત્રેષુ જાતેષુ વિભાગેઽયં વિધિઃ સ્મૃતઃ ॥ ૯.૧૪૯॥

કીનાશો ગોવૃષો યાનમલઙ્કારશ્ચ વેશ્મ ચ ।

વિપ્રસ્યૌદ્ધારિકં દેયમેકાંશશ્ચ પ્રધાનતઃ ॥ ૯.૧૫૦॥

ત્ર્યંશં દાયાધરેદ્વિપ્રો દ્વાવંશૌ ક્ષત્રિયાસુતઃ ।
વૈશ્યાજઃ સાર્ધમેવાંશમંશં શૂદ્રાસુતો હરેત્ ॥ ૯.૧૫૧॥

સર્વં વા રિક્થજાતં તદ્દશધા પરિકલ્પ્ય ચ ।
ધર્મ્યં વિભાગં કુર્વીત વિધિનાઽનેન ધર્મવિત્ ॥ ૯.૧૫૨॥

ચતુરાનંશાન્ હરેદ્વિપ્રસ્ત્રીનંશાન્ ક્ષત્રિયાસુતઃ ।
વૈશ્યાપુત્રો હરેદ્દ્વ્યંશમંશં શૂદ્રાસુતો હરેત્ ॥ ૯.૧૫૩॥

યદ્યપિ સ્યાત્તુ સત્પુત્રોઽપ્યસત્પુત્રોઽપિ વા ભવેત્ । યદ્યપિ સ્યાત્તુ સત્પુત્રો યદ્યપુત્રોઽપિ વા ભવેત્।
નાધિકં દશમાદ્દદ્યાત્શૂદ્રાપુત્રાય ધર્મતઃ ॥ ૯.૧૫૪॥

બ્રાહ્મણક્ષત્રિયવિશાં શૂદ્રાપુત્રો ન રિક્થભાક્ ।
યદેવાસ્ય પિતા દદ્યાત્તદેવાસ્ય ધનં ભવેત્ ॥ ૯.૧૫૫॥

સમવર્ણાસુ વા જાતાઃ સર્વે પુત્રા દ્વિજન્મનામ્ ।
ઉદ્ધારં જ્યાયસે દત્ત્વા ભજેરન્નિતરે સમમ્ ॥ ૯.૧૫૬॥

શૂદ્રસ્ય તુ સવર્ણૈવ નાન્યા ભાર્યા વિધીયતે ।
તસ્યાં જાતાઃ સમાંશાઃ સ્યુર્યદિ પુત્રશતં ભવેત્ ॥ ૯.૧૫૭॥

પુત્રાન્ દ્વાદશ યાનાહ નૃણાં સ્વાયમ્ભુવો મનુઃ ।
તેષાં ષડ્ બન્ધુદાયાદાઃ ષડદાયાદબાન્ધવાઃ ॥ ૯.૧૫૮॥

ઔરસઃ ક્ષેત્રજશ્ચૈવ દત્તઃ કૃત્રિમ એવ ચ ।
ગૂઢોત્પન્નોઽપવિદ્ધશ્ચ દાયાદા બાન્ધવાશ્ચ ષટ્ ॥ ૯.૧૫૯॥

કાનીનશ્ચ સહોઢશ્ચ ક્રીતઃ પૌનર્ભવસ્તથા ।
સ્વયંદત્તશ્ચ શૌદ્રશ્ચ ષડદાયાદબાન્ધવાઃ ॥ ૯.૧૬૦॥

યાદૃશં ફલમાપ્નોતિ કુપ્લવૈઃ સંતરઞ્જલમ્ ।
તાદૃશં ફલમાપ્નોતિ કુપુત્રૈઃ સંતરંસ્તમઃ ॥ ૯.૧૬૧॥

યદ્યેકરિક્થિનૌ સ્યાતામૌરસક્ષેત્રજૌ સુતૌ ।
યસ્ય યત્પૈતૃકં રિક્થં સ તદ્ગૃહ્ણીત નૈતરઃ ॥ ૯.૧૬૨॥

એક એવૌરસઃ પુત્રઃ પિત્ર્યસ્ય વસુનઃ પ્રભુઃ ।
શેષાણામાનૃશંસ્યાર્થં પ્રદદ્યાત્તુ પ્રજીવનમ્ ॥ ૯.૧૬૩॥

ષષ્ઠં તુ ક્ષેત્રજસ્યાંશં પ્રદદ્યાત્પૈતૃકાદ્ધનાત્ ।
ઔરસો વિભજન્ દાયં પિત્ર્યં પઞ્ચમમેવ વા ॥ ૯.૧૬૪॥

ઔરસક્ષેત્રજૌ પુત્રૌ પિતૃરિક્થસ્ય ભાગિનૌ ।
દશાપરે તુ ક્રમશો ગોત્રરિક્થાંશભાગિનઃ ॥ ૯.૧૬૫॥

સ્વક્ષેત્રે સંસ્કૃતાયાં તુ સ્વયમુત્પાદયેધિ યમ્ ।
તમૌરસં વિજાનીયાત્પુત્રં પ્રાથમકલ્પિકમ્ ॥ ૯.૧૬૬॥

યસ્તલ્પજઃ પ્રમીતસ્ય ક્લીબસ્ય વ્યાધિતસ્ય વા ।
સ્વધર્મેણ નિયુક્તાયાં સ પુત્રઃ ક્ષેત્રજઃ સ્મૃતઃ ॥ ૯.૧૬૭॥

માતા પિતા વા દદ્યાતાં યમદ્ભિઃ પુત્રમાપદિ ।
સદૃશં પ્રીતિસંયુક્તં સ જ્ઞેયો દત્રિમઃ સુતઃ ॥ ૯.૧૬૮॥

સદૃશં તુ પ્રકુર્યાદ્યં ગુણદોષવિચક્ષણમ્ ।
પુત્રં પુત્રગુણૈર્યુક્તં સ વિજ્ઞેયશ્ચ કૃત્રિમઃ ॥ ૯.૧૬૯॥

ઉત્પદ્યતે ગૃહે યસ્તુ ન ચ જ્ઞાયેત કસ્ય સઃ ।
સ ગૃહે ગૂઢ ઉત્પન્નસ્તસ્ય સ્યાદ્યસ્ય તલ્પજઃ ॥ ૯.૧૭૦॥

માતાપિતૃભ્યામુત્સૃષ્ટં તયોરન્યતરેણ વા ।
યં પુત્રં પરિગૃહ્ણીયાદપવિદ્ધઃ સ ઉચ્યતે ॥ ૯.૧૭૧॥

પિતૃવેશ્મનિ કન્યા તુ યં પુત્રં જનયેદ્રહઃ ।
તં કાનીનં વદેન્નામ્ના વોઢુઃ કન્યાસમુદ્ભવમ્ ॥ ૯.૧૭૨॥

યા ગર્ભિણી સંસ્ક્રિયતે જ્ઞાતાઽજ્ઞાતાઽપિ વા સતી ।
વોઢુઃ સ ગર્ભો ભવતિ સહોઢ ઇતિ ચોચ્યતે ॥ ૯.૧૭૩॥

ક્રીણીયાદ્યસ્ત્વપત્યાર્થં માતાપિત્રોર્યમન્તિકાત્ ।
સ ક્રીતકઃ સુતસ્તસ્ય સદૃશોઽસદૃશોઽપિ વા ॥ ૯.૧૭૪॥

યા પત્યા વા પરિત્યક્તા વિધવા વા સ્વયેચ્છયા ।
ઉત્પાદયેત્પુનર્ભૂત્વા સ પૌનર્ભવ ઉચ્યતે ॥ ૯.૧૭૫॥

સા ચેદક્ષતયોનિઃ સ્યાદ્ગતપ્રત્યાગતાઽપિ વા ।
પૌનર્ભવેન ભર્ત્રા સા પુનઃ સંસ્કારમર્હતિ ॥ ૯.૧૭૬॥

માતાપિતૃવિહીનો યસ્ત્યક્તો વા સ્યાદકારણાત્ ।
આત્માનમર્પયેદ્યસ્મૈ સ્વયંદત્તસ્તુ સ સ્મૃતઃ ॥ ૯.૧૭૭॥

યં બ્રાહ્મણસ્તુ શૂદ્રાયાં કામાદુત્પાદયેત્સુતમ્ ।
સ પારયન્નેવ શવસ્તસ્માત્પારશવઃ સ્મૃતઃ ॥ ૯.૧૭૮॥

દાસ્યાં વા દાસદાસ્યાં વા યઃ શૂદ્રસ્ય સુતો ભવેત્ ।
સોઽનુજ્ઞાતો હરેદંશમિતિ ધર્મો વ્યવસ્થિતઃ ॥ ૯.૧૭૯॥

ક્ષેત્રજાદીન્ સુતાનેતાનેકાદશ યથોદિતાન્ ।
પુત્રપ્રતિનિધીનાહુઃ ક્રિયાલોપાન્ મનીષિણઃ ॥ ૯.૧૮૦॥

ય એતેઽભિહિતાઃ પુત્રાઃ પ્રસઙ્ગાદન્યબીજજાઃ ।
યસ્ય તે બીજતો જાતાસ્તસ્ય તે નૈતરસ્ય તુ ॥ ૯.૧૮૧॥

ભ્રાતૃણામેકજાતાનામેકશ્ચેત્પુત્રવાન્ ભવેત્ ।
સર્વાંસ્તાંસ્તેન પુત્રેણ પુત્રિણો મનુરબ્રવીત્ ॥ ૯.૧૮૨॥

સર્વાસામેકપત્નીનામેકા ચેત્પુત્રિણી ભવેત્ ।
સર્વાસ્તાસ્તેન પુત્રેણ પ્રાહ પુત્રવતીર્મનુઃ ॥ ૯.૧૮૩॥

શ્રેયસઃ શ્રેયસોઽલાભે પાપીયાન્ રિક્થમર્હતિ ।
બહવશ્ચેત્તુ સદૃશાઃ સર્વે રિક્થસ્ય ભાગિનઃ ॥ ૯.૧૮૪॥

ન ભ્રાતરો ન પિતરઃ પુત્રા રિક્થહરાઃ પિતુઃ ।
પિતા હરેદપુત્રસ્ય રિક્થં ભ્રાતર એવ ચ ॥ ૯.૧૮૫॥

ત્રયાણામુદકં કાર્યં ત્રિષુ પિણ્ડઃ પ્રવર્તતે ।
ચતુર્થઃ સમ્પ્રદાતૈષાં પઞ્ચમો નોપપદ્યતે ॥ ૯.૧૮૬॥

અનન્તરઃ સપિણ્ડાદ્યસ્તસ્ય તસ્ય ધનં ભવેત્ ।
અત ઊર્ધ્વં સકુલ્યઃ સ્યાદાચાર્યઃ શિષ્ય એવ વા ॥ ૯.૧૮૭॥

સર્વેષામપ્યભાવે તુ બ્રાહ્મણા રિક્થભાગિનઃ ।
ત્રૈવિદ્યાઃ શુચયો દાન્તાસ્તથા ધર્મો ન હીયતે ॥ ૯.૧૮૮॥

અહાર્યં બ્રાહ્મણદ્રવ્યં રાજ્ઞા નિત્યમિતિ સ્થિતિઃ ।
ઇતરેષાં તુ વર્ણાનાં સર્વાભાવે હરેન્નૃપઃ ॥ ૯.૧૮૯॥

સંસ્થિતસ્યાનપત્યસ્ય સગોત્રાત્પુત્રમાહરેત્ ॥

તત્ર યદ્રિક્થજાતં સ્યાત્તત્તસ્મિન્ પ્રતિપાદયેત્ ॥ ૯.૧૯૦॥

દ્વૌ તુ યૌ વિવદેયાતાં દ્વાભ્યાં જાતૌ સ્ત્રિયા ધને ।
તયોર્યદ્યસ્ય પિત્ર્યં સ્યાત્તત્સ ગૃહ્ણીત નૈતરઃ ॥ ૯.૧૯૧॥

જનન્યાં સંસ્થિતાયાં તુ સમં સર્વે સહોદરાઃ ।
ભજેરન્ માતૃકં રિક્થં ભગિન્યશ્ચ સનાભયઃ ॥ ૯.૧૯૨॥

યાસ્તાસાં સ્યુર્દુહિતરસ્તાસામપિ યથાર્હતઃ ।
માતામહ્યા ધનાત્કિં ચિત્પ્રદેયં પ્રીતિપૂર્વકમ્ ॥ ૯.૧૯૩॥

અધ્યગ્ન્યધ્યાવાહનિકં દત્તં ચ પ્રીતિકર્મણિ ।
ભ્રાતૃમાતૃપિતૃપ્રાપ્તં ષડ્ વિધં સ્ત્રીધનં સ્મૃતમ્ ॥ ૯.૧૯૪॥

અન્વાધેયં ચ યદ્દત્તં પત્યા પ્રીતેન ચૈવ યત્ ।
પત્યૌ જીવતિ વૃત્તાયાઃ પ્રજાયાસ્તદ્ધનં ભવેત્ ॥ ૯.૧૯૫॥

બ્રાહ્મદૈવાર્ષગાન્ધર્વપ્રાજાપત્યેષુ યદ્વસુ ।
અપ્રજાયામતીતાયાં ભર્તુરેવ તદિષ્યતે ॥ ૯.૧૯૬॥

યત્ત્વસ્યાઃ સ્યાદ્ધનં દત્તં વિવાહેષ્વાસુરાદિષુ ।
અપ્રજાયામતીતાયાં માતાપિત્રોસ્તદિષ્યતે ॥ ૯.૧૯૭॥

સ્ત્રિયાં તુ યદ્ભવેદ્વિત્તં પિત્રા દત્તં કથં ચન ।
બ્રાહ્મણી તદ્ધરેત્કન્યા તદપત્યસ્ય વા ભવેત્ ॥ ૯.૧૯૮॥

ન નિર્હારં સ્ત્રિયઃ કુર્યુઃ કુટુમ્બાદ્બહુમધ્યગાત્ ।
સ્વકાદપિ ચ વિત્તાધિ સ્વસ્ય ભર્તુરનાજ્ઞયા ॥ ૯.૧૯૯॥

પત્યૌ જીવતિ યઃ સ્ત્રીભિરલઙ્કારો ધૃતો ભવેત્ ।
ન તં ભજેરન્ દાયાદા ભજમાનાઃ પતન્તિ તે ॥ ૯.૨૦૦॥

અનંશૌ ક્લીબપતિતૌ જાત્યન્ધબધિરૌ તથા ।
ઉન્મત્તજડમૂકાશ્ચ યે ચ કે ચિન્નિરિન્દ્રિયાઃ ॥ ૯.૨૦૧॥

સર્વેષામપિ તુ ન્યાય્યં દાતું શક્ત્યા મનીષિણા ।
ગ્રાસાચ્છાદનમત્યન્તં પતિતો હ્યદદદ્ભવેત્ ॥ ૯.૨૦૨॥

યદ્યર્થિતા તુ દારૈઃ સ્યાત્ક્લીબાદીનાં કથં ચન ।
તેષામુત્પન્નતન્તૂનામપત્યં દાયમર્હતિ ॥ ૯.૨૦૩॥

યત્કિં ચિત્પિતરિ પ્રેતે ધનં જ્યેષ્ઠોઽધિગચ્છતિ ।
ભાગો યવીયસાં તત્ર યદિ વિદ્યાનુપાલિનઃ ॥ ૯.૨૦૪॥

અવિદ્યાનાં તુ સર્વેષામીહાતશ્ચેદ્ધનં ભવેત્ ।
સમસ્તત્ર વિભાગઃ સ્યાદપિત્ર્ય ઇતિ ધારણા ॥ ૯.૨૦૫॥

વિદ્યાધનં તુ યદ્યસ્ય તત્તસ્યૈવ ધનં ભવેત્ ।
મૈત્ર્યમોદ્વાહિકં ચૈવ માધુપર્કિકમેવ ચ ॥ ૯.૨૦૬॥

ભ્રાતૃણાં યસ્તુ નૈહેત ધનં શક્તઃ સ્વકર્મણા ।
સ નિર્ભાજ્યઃ સ્વકાદંશાત્કિં ચિદ્દત્ત્વોપજીવનમ્ ॥ ૯.૨૦૭॥

અનુપઘ્નન્ પિતૃદ્રવ્યં શ્રમેણ યદુપાર્જિતમ્ ।
સ્વયમીહિતલબ્ધં તન્નાકામો દાતુમર્હતિ ॥ ૯.૨૦૮॥

પૈતૃકં તુ પિતા દ્રવ્યમનવાપ્તં યદાપ્નુયાત્ ।
ન તત્પુત્રૈર્ભજેત્સાર્ધમકામઃ સ્વયમર્જિતમ્ ॥ ૯.૨૦૯॥

વિભક્તાઃ સહ જીવન્તો વિભજેરન્ પુનર્યદિ ।
સમસ્તત્ર વિભાગઃ સ્યાજ્જ્યૈષ્ઠ્યં તત્ર ન વિદ્યતે ॥ ૯.૨૧૦॥

યેષાં જ્યેષ્ઠઃ કનિષ્ઠો વા હીયેતાંશપ્રદાનતઃ ।
મ્રિયેતાન્યતરો વાઽપિ તસ્ય ભાગો ન લુપ્યતે ॥ ૯.૨૧૧॥

સોદર્યા વિભજેરંસ્તં સમેત્ય સહિતાઃ સમમ્ ।
ભ્રાતરો યે ચ સંસૃષ્ટા ભગિન્યશ્ચ સનાભયઃ ॥ ૯.૨૧૨॥

યો જ્યેષ્ઠો વિનિકુર્વીત લોભાદ્ભ્રાતૃન્ યવીયસઃ ।
સોઽજ્યેષ્ઠઃ સ્યાદભાગશ્ચ નિયન્તવ્યશ્ચ રાજભિઃ ॥ ૯.૨૧૩॥

સર્વ એવ વિકર્મસ્થા નાર્હન્તિ ભ્રાતરો ધનમ્ ।
ન ચાદત્ત્વા કનિષ્ઠેભ્યો જ્યેષ્ઠઃ કુર્વીત યોતકમ્ ॥ ૯.૨૧૪॥

ભ્રાતૃણામવિભક્તાનાં યદ્યુત્થાનં ભવેત્સહ ।
ન પુત્રભાગં વિષમં પિતા દદ્યાત્કથં ચન ॥ ૯.૨૧૫॥

ઊર્ધ્વં વિભાગાત્જાતસ્તુ પિત્ર્યમેવ હરેદ્ધનમ્ ।
સંસૃષ્ટાસ્તેન વા યે સ્યુર્વિભજેત સ તૈઃ સહ ॥ ૯.૨૧૬॥

અનપત્યસ્ય પુત્રસ્ય માતા દાયમવાપ્નુયાત્ ।
માતર્યપિ ચ વૃત્તાયાં પિતુર્માતા હરેદ્ધનમ્ ॥ ૯.૨૧૭॥

ઋણે ધને ચ સર્વસ્મિન્ પ્રવિભક્તે યથાવિધિ ।

પશ્ચાદ્દૃશ્યેત યત્કિં ચિત્તત્સર્વં સમતાં નયેત્ ॥ ૯.૨૧૮॥

વસ્ત્રં પત્રમલઙ્કારં કૃતાન્નમુદકં સ્ત્રિયઃ ।
યોગક્ષેમં પ્રચારં ચ ન વિભાજ્યં પ્રચક્ષતે ॥ ૯.૨૧૯॥

અયમુક્તો વિભાગો વઃ પુત્રાણાં ચ ક્રિયાવિધિઃ ।
ક્રમશઃ ક્ષેત્રજાદીનાં દ્યૂતધર્મં નિબોધત ॥ ૯.૨૨૦॥

દ્યૂતં સમાહ્વયં ચૈવ રાજા રાષ્ટ્રાન્નિવારયેત્ ।
રાજાન્તકરણાવેતૌ દ્વૌ દોષૌ પૃથિવીક્ષિતામ્ ॥ ૯.૨૨૧॥

પ્રકાશમેતત્તાસ્કર્યં યદ્દેવનસમાહ્વયૌ ।
તયોર્નિત્યં પ્રતીઘાતે નૃપતિર્યત્નવાન્ ભવેત્ ॥ ૯.૨૨૨॥

અપ્રાણિભિર્યત્ક્રિયતે તત્લોકે દ્યૂતમુચ્યતે ।
પ્રાણિભિઃ ક્રિયતે યસ્તુ સ વિજ્ઞેયઃ સમાહ્વયઃ ॥ ૯.૨૨૩॥

દ્યૂતં સમાહ્વયં ચૈવ યઃ કુર્યાત્કારયેત વા ।
તાન્ સર્વાન્ ઘાતયેદ્રાજા શૂદ્રાંશ્ચ દ્વિજલિઙ્ગિનઃ ॥ ૯.૨૨૪॥

કિતવાન્ કુશીલવાન્ ક્રૂરાન્ પાષણ્ડસ્થાંશ્ચ માનવાન્ ।
વિકર્મસ્થાન્ શૌણ્ડિકાંશ્ચ ક્ષિપ્રં નિર્વાસયેત્પુરાત્ ॥ ૯.૨૨૫॥

એતે રાષ્ટ્રે વર્તમાના રાજ્ઞઃ પ્રચ્છન્નતસ્કરાઃ ।
વિકર્મક્રિયયા નિત્યં બાધન્તે ભદ્રિકાઃ પ્રજાઃ ॥ ૯.૨૨૬॥

દ્યૂતમેતત્પુરા કલ્પે દૃષ્ટં વૈરકરં મહત્ ।
તસ્માદ્દ્યૂતં ન સેવેત હાસ્યાર્થમપિ બુદ્ધિમાન્ ॥ ૯.૨૨૭॥

પ્રચ્છન્નં વા પ્રકાશં વા તન્નિષેવેત યો નરઃ ।
તસ્ય દણ્ડવિકલ્પઃ સ્યાદ્યથેષ્ટં નૃપતેસ્તથા ॥ ૯.૨૨૮॥

ક્ષત્રવિદ્શૂદ્રયોનિસ્તુ દણ્ડં દાતુમશક્નુવન્ ।
આનૃણ્યં કર્મણા ગચ્છેદ્વિપ્રો દદ્યાત્શનૈઃ શનૈઃ ॥ ૯.૨૨૯॥

સ્ત્રીબાલોન્મત્તવૃદ્ધાનાં દરિદ્રાણાં ચ રોગિણામ્ ।
શિફાવિદલરજ્જ્વાદ્યૈર્વિદધ્યાન્નૃપતિર્દમમ્ ॥ ૯.૨૩૦॥

યે નિયુક્તાસ્તુ કાર્યેષુ હન્યુઃ કાર્યાણિ કાર્યિણામ્ ।
ધનૌષ્મણા પચ્યમાનાસ્તાન્નિઃસ્વાન્ કારયેન્નૃપઃ ॥ ૯.૨૩૧॥

કૂટશાસનકર્તૄંશ્ચ પ્રકૃતીનાં ચ દૂષકાન્ ।
સ્ત્રીબાલબ્રાહ્મણઘ્નાંશ્ચ હન્યાદ્દ્વિટ્સેવિનસ્તથા ॥ ૯.૨૩૨॥

તીરિતં ચાનુશિષ્ટં ચ યત્ર ક્વ ચન યદ્ભવેત્ ।
કૃતં તદ્ધર્મતો વિદ્યાન્ન તદ્ભૂયો નિવર્તયેત્ ॥ ૯.૨૩૩॥

અમાત્યઃ પ્રાડ્વિવાકો વા યત્કુર્યુઃ કાર્યમન્યથા ।
તત્સ્વયં નૃપતિઃ કુર્યાત્તાન્ સહસ્રં ચ દણ્ડયેત્ ॥ ૯.૨૩૪॥ તં

બ્રહ્મહા ચ સુરાપશ્ચ સ્તેયી ચ ગુરુતલ્પગઃ । તસ્કરો ગુરુતલ્પગઃ
એતે સર્વે પૃથગ્જ્ઞેયા મહાપાતકિનો નરાઃ ॥ ૯.૨૩૫॥

ચતુર્ણામપિ ચૈતેષાં પ્રાયશ્ચિત્તમકુર્વતામ્ ।
શારીરં ધનસંયુક્તં દણ્ડં ધર્મ્યં પ્રકલ્પયેત્ ॥ ૯.૨૩૬॥

ગુરુતલ્પે ભગઃ કાર્યઃ સુરાપાને સુરાધ્વજઃ ।
સ્તેયે ચ શ્વપદં કાર્યં બ્રહ્મહણ્યશિરાઃ પુમાન્ ॥ ૯.૨૩૭॥ તસ્કરે શ્વપદં કાર્યં

અસમ્ભોજ્યા હ્યસંયાજ્યા અસમ્પાઠ્યાઽવિવાહિનઃ ।
ચરેયુઃ પૃથિવીં દીનાઃ સર્વધર્મબહિષ્કૃતાઃ ॥ ૯.૨૩૮॥

જ્ઞાતિસમ્બન્ધિભિસ્ત્વેતે ત્યક્તવ્યાઃ કૃતલક્ષણાઃ ।
નિર્દયા નિર્નમસ્કારાસ્તન્ મનોરનુશાસનમ્ ॥ ૯.૨૩૯॥

પ્રાયશ્ચિત્તં તુ કુર્વાણાઃ સર્વવર્ણા યથોદિતમ્ । પૂર્વે વર્ણા યથોદિતમ્
નાઙ્ક્યા રાજ્ઞા લલાટે સ્યુર્દાપ્યાસ્તૂત્તમસાહસમ્ ॥ ૯.૨૪૦॥

આગઃસુ બ્રાહ્મણસ્યૈવ કાર્યો મધ્યમસાહસઃ ।
વિવાસ્યો વા ભવેદ્રાષ્ટ્રાત્સદ્રવ્યઃ સપરિચ્છદઃ ॥ ૯.૨૪૧॥

ઇતરે કૃતવન્તસ્તુ પાપાન્યેતાન્યકામતઃ ।
સર્વસ્વહારમર્હન્તિ કામતસ્તુ પ્રવાસનમ્ ॥ ૯.૨૪૨॥

નાદદીત નૃપઃ સાધુર્મહાપાતકિનો ધનમ્ ।
આદદાનસ્તુ તત્લોભાત્તેન દોષેણ લિપ્યતે ॥ ૯.૨૪૩॥

અપ્સુ પ્રવેશ્ય તં દણ્ડં વરુણાયોપપાદયેત્ ।
શ્રુતવૃત્તોપપન્ને વા બ્રાહ્મણે પ્રતિપાદયેત્ ॥ ૯.૨૪૪॥

ઈશો દણ્ડસ્ય વરુણો રાજ્ઞાં દણ્ડધરો હિ સઃ ।
ઈશઃ સર્વસ્ય જગતો બ્રાહ્મણો વેદપારગઃ ॥ ૯.૨૪૫॥

યત્ર વર્જયતે રાજા પાપકૃદ્ભ્યો ધનાગમમ્ ।
તત્ર કાલેન જાયન્તે માનવા દીર્ઘજીવિનઃ ॥ ૯.૨૪૬॥

નિષ્પદ્યન્તે ચ સસ્યાનિ યથોપ્તાનિ વિશાં પૃથક્ ।
બાલાશ્ચ ન પ્રમીયન્તે વિકૃતં ચ ન જાયતે ॥ ૯.૨૪૭॥

બ્રાહ્મણાન્ બાધમાનં તુ કામાદવરવર્ણજમ્ ।
હન્યાચ્ચિત્રૈર્વધોપાયૈરુદ્વેજનકરૈર્નૃપઃ ॥ ૯.૨૪૮॥

યાવાનવધ્યસ્ય વધે તાવાન્ વધ્યસ્ય મોક્ષણે ।
અધર્મો નૃપતેર્દૃષ્ટો ધર્મસ્તુ વિનિયચ્છતઃ ॥ ૯.૨૪૯॥

ઉદિતોઽયં વિસ્તરશો મિથો વિવદમાનયોઃ ।
અષ્ટાદશસુ માર્ગેષુ વ્યવહારસ્ય નિર્ણયઃ ॥ ૯.૨૫૦॥

એવં ધર્મ્યાણિ કાર્યાણિ સમ્યક્કુર્વન્ મહીપતિઃ ।
દેશાનલબ્ધાન્લિપ્સેત લબ્ધાંશ્ચ પરિપાલયેત્ ॥ ૯.૨૫૧॥

સમ્યઙ્નિવિષ્ટદેશસ્તુ કૃતદુર્ગશ્ચ શાસ્ત્રતઃ ।
કણ્ટકોદ્ધરણે નિત્યમાતિષ્ઠેદ્યત્નમુત્તમમ્ ॥ ૯.૨૫૨॥

રક્ષનાદાર્યવૃત્તાનાં કણ્ટકાનાં ચ શોધનાત્ ।
નરેન્દ્રાસ્ત્રિદિવં યાન્તિ પ્રજાપાલનતત્પરાઃ ॥ ૯.૨૫૩॥

અશાસંસ્તસ્કરાન્ યસ્તુ બલિં ગૃહ્ણાતિ પાર્થિવઃ ।
તસ્ય પ્રક્ષુભ્યતે રાષ્ટ્રં સ્વર્ગાચ્ચ પરિહીયતે ॥ ૯.૨૫૪॥

નિર્ભયં તુ ભવેદ્યસ્ય રાષ્ટ્રં બાહુબલાશ્રિતમ્ ।
તસ્ય તદ્વર્ધતે નિત્યં સિચ્યમાન ઇવ દ્રુમઃ ॥ ૯.૨૫૫॥

દ્વિવિધાંસ્તસ્કરાન્ વિદ્યાત્પરદ્રવ્યાપહારકાન્ ।
પ્રકાશાંશ્ચાપ્રકાશાંશ્ચ ચારચક્ષુર્મહીપતિઃ ॥ ૯.૨૫૬॥

પ્રકાશવઞ્ચકાસ્તેષાં નાનાપણ્યોપજીવિનઃ ।
પ્રચ્છન્નવઞ્ચકાસ્ત્વેતે યે સ્તેનાટવિકાદયઃ ॥ ૯.૨૫૭॥

ઉત્કોચકાશ્ચોપધિકા વઞ્ચકાઃ કિતવાસ્તથા ।
મઙ્ગલાદેશવૃત્તાશ્ચ ભદ્રાશ્ચૈક્ષણિકૈઃ સહ ॥ ૯.૨૫૮॥ ભદ્રપ્રેક્ષણિકૈઃ સહ

અસમ્યક્કારિણશ્ચૈવ મહામાત્રાશ્ચિકિત્સકાઃ ।

શિલ્પોપચારયુક્તાશ્ચ નિપુણાઃ પણ્યયોષિતઃ ॥ ૯.૨૫૯॥

એવમાદીન્ વિજાનીયાત્પ્રકાશાંલ્લોકકણ્ટકાન્ । એવમાદ્યાન્
નિગૂઢચારિણશ્ચાન્યાનનાર્યાનાર્યલિઙ્ગિનઃ ॥ ૯.૨૬૦॥

તાન્ વિદિત્વા સુચરિતૈર્ગૂઢૈસ્તત્કર્મકારિભિઃ ।
ચારૈશ્ચાનેકસંસ્થાનૈઃ પ્રોત્સાદ્ય વશમાનયેત્ ॥ ૯.૨૬૧॥

તેષાં દોષાનભિખ્યાપ્ય સ્વે સ્વે કર્મણિ તત્ત્વતઃ ।
કુર્વીત શાસનં રાજા સમ્યક્સારાપરાધતઃ ॥ ૯.૨૬૨॥

ન હિ દણ્ડાદૃતે શક્યઃ કર્તું પાપવિનિગ્રહઃ ।
સ્તેનાનાં પાપબુદ્ધીનાં નિભૃતં ચરતાં ક્ષિતૌ ॥ ૯.૨૬૩॥

સભાપ્રપાઽપૂપશાલાવેશમદ્યાન્નવિક્રયાઃ ।
ચતુષ્પથાંશ્ચૈત્યવૃક્ષાઃ સમાજાઃ પ્રેક્ષણાનિ ચ ॥ ૯.૨૬૪॥

જીર્ણોદ્યાનાન્યરણ્યાનિ કારુકાવેશનાનિ ચ ।
શૂન્યાનિ ચાપ્યગારાણિ વનાન્યુપવનાનિ ચ ॥ ૯.૨૬૫॥

એવંવિધાન્નૃપો દેશાન્ ગુલ્મૈઃ સ્થાવરજઙ્ગમૈઃ ।
તસ્કરપ્રતિષેધાર્થં ચારૈશ્ચાપ્યનુચારયેત્ ॥ ૯.૨૬૬॥

તત્સહાયૈરનુગતૈર્નાનાકર્મપ્રવેદિભિઃ ।
વિદ્યાદુત્સાદયેચ્ચૈવ નિપુણૈઃ પૂર્વતસ્કરૈઃ ॥ ૯.૨૬૭॥

ભક્ષ્યભોજ્યોપદેશૈશ્ચ બ્રાહ્મણાનાં ચ દર્શનૈઃ ।
શૌર્યકર્માપદેશૈશ્ચ કુર્યુસ્તેષાં સમાગમમ્ ॥ ૯.૨૬૮॥

યે તત્ર નોપસર્પેયુર્મૂલપ્રણિહિતાશ્ચ યે ।
તાન્ પ્રસહ્ય નૃપો હન્યાત્સમિત્રજ્ઞાતિબાન્ધવાન્ ॥ ૯.૨૬૯॥

ન હોઢેન વિના ચૌરં ઘાતયેદ્ધાર્મિકો નૃપઃ ।
સહોઢં સોપકરણં ઘાતયેદવિચારયન્ ॥ ૯.૨૭૦॥

ગ્રામેષ્વપિ ચ યે કે ચિચ્ચૌરાણાં ભક્તદાયકાઃ ।
ભાણ્ડાવકાશદાશ્ચૈવ સર્વાંસ્તાનપિ ઘાતયેત્ ॥ ૯.૨૭૧॥

રાષ્ટ્રેષુ રક્ષાધિકૃતાન્ સામન્તાંશ્ચૈવ ચોદિતાન્ ।
અભ્યાઘાતેષુ મધ્યસ્થાઞ્ શિષ્યાચ્ચૌરાનિવ દ્રુતમ્ ॥ ૯.૨૭૨॥

યશ્ચાપિ ધર્મસમયાત્પ્રચ્યુતો ધર્મજીવનઃ ।
દણ્ડેનૈવ તમપ્યોષેત્સ્વકાદ્ધર્માધિ વિચ્યુતમ્ ॥ ૯.૨૭૩॥

ગ્રામઘાતે હિતાભઙ્ગે પથિ મોષાભિદર્શને ।
શક્તિતો નાભિધાવન્તો નિર્વાસ્યાઃ સપરિચ્છદાઃ ॥ ૯.૨૭૪॥

રાજ્ઞઃ કોશાપહર્તૄંશ્ચ પ્રતિકૂલેષુ ચ સ્થિતાન્ । પ્રાતિકૂલ્યેષ્વવસ્થિતાન્
ઘાતયેદ્વિવિધૈર્દણ્ડૈરરીણાં ચોપજાપકાન્ ॥ ૯.૨૭૫॥

સંધિં છિત્ત્વા તુ યે ચૌર્યં રાત્રૌ કુર્વન્તિ તસ્કરાઃ । સંધિં ભિત્ત્વા)
તેષાં છિત્ત્વા નૃપો હસ્તૌ તીક્ષ્ણે શૂલે નિવેશયેત્ ॥ ૯.૨૭૬॥

અઙ્ગુલીર્ગ્રન્થિભેદસ્ય છેદયેત્પ્રથમે ગ્રહે ।
દ્વિતીયે હસ્તચરણૌ તૃતીયે વધમર્હતિ ॥ ૯.૨૭૭॥

અગ્નિદાન્ ભક્તદાંશ્ચૈવ તથા શસ્ત્રાવકાશદાન્ ।
સંનિધાતૄંશ્ચ મોષસ્ય હન્યાચ્ચૌરમિવેશ્વરઃ ॥ ૯.૨૭૮॥

તડાગભેદકં હન્યાદપ્સુ શુદ્ધવધેન વા ।
યદ્વાઽપિ પ્રતિસંસ્કુર્યાદ્દાપ્યસ્તૂત્તમસાહસમ્ ॥ ૯.૨૭૯॥

કોષ્ઠાગારાયુધાગારદેવતાગારભેદકાન્ ।
હસ્ત્યશ્વરથહર્તૄંશ્ચ હન્યાદેવાવિચારયન્ ॥ ૯.૨૮૦॥

યસ્તુ પૂર્વનિવિષ્ટસ્ય તડાગસ્યોદકં હરેત્ ।
આગમં વાઽપ્યપાં ભિન્દ્યાત્સ દાપ્યઃ પૂર્વસાહસમ્ ॥ ૯.૨૮૧॥

સમુત્સૃજેદ્રાજમાર્ગે યસ્ત્વમેધ્યમનાપદિ ।
સ દ્વૌ કાર્ષાપણૌ દદ્યાદમેધ્યં ચાશુ શોધયેત્ ॥ ૯.૨૮૨॥

આપદ્ગતોઽથ વા વૃદ્ધા ગર્ભિણી બાલ એવ વા ।
પરિભાષણમર્હન્તિ તચ્ચ શોધ્યમિતિ સ્થિતિઃ ॥ ૯.૨૮૩॥

ચિકિત્સકાનાં સર્વેષાં મિથ્યાપ્રચરતાં દમઃ ।
અમાનુષેષુ પ્રથમો માનુષેષુ તુ મધ્યમઃ ॥ ૯.૨૮૪॥

સઙ્ક્રમધ્વજયષ્ટીનાં પ્રતિમાનાં ચ ભેદકઃ ।
પ્રતિકુર્યાચ્ચ તત્સર્વં પઞ્ચ દદ્યાત્શતાનિ ચ ॥ ૯.૨૮૫॥

અદૂષિતાનાં દ્રવ્યાણાં દૂષણે ભેદને તથા ।
મણીનામપવેધે ચ દણ્ડઃ પ્રથમસાહસઃ ॥ ૯.૨૮૬॥

સમૈર્હિ વિષમં યસ્તુ ચરેદ્વૈ મૂલ્યતોઽપિ વા ।
સમાપ્નુયાદ્દમં પૂર્વં નરો મધ્યમમેવ વા ॥ ૯.૨૮૭॥

બન્ધનાનિ ચ સર્વાણિ રાજા માર્ગે નિવેશયેત્ । રાજમાર્ગે
દુઃખિતા યત્ર દૃશ્યેરન્ વિકૃતાઃ પાપકારિણઃ ॥ ૯.૨૮૮॥

પ્રાકારસ્ય ચ ભેત્તારં પરિખાણાં ચ પૂરકમ્ ।
દ્વારાણાં ચૈવ ભઙ્ક્તારં ક્ષિપ્રમેવ પ્રવાસયેત્ ॥ ૯.૨૮૯॥

અભિચારેષુ સર્વેષુ કર્તવ્યો દ્વિશતો દમઃ ।
મૂલકર્મણિ ચાનાપ્તેઃ કૃત્યાસુ વિવિધાસુ ચ ॥ ૯.૨૯૦॥ ચાનાપ્તૈઃ

અબીજવિક્રયી ચૈવ બીજોત્કૃષ્ટા તથૈવ ચ ।
મર્યાદાભેદકશ્ચૈવ વિકૃતં પ્રાપ્નુયાદ્વધમ્ ॥ ૯.૨૯૧॥

સર્વકણ્ટકપાપિષ્ઠં હેમકારં તુ પાર્થિવઃ ।
પ્રવર્તમાનમન્યાયે છેદયેત્લવશઃ ક્ષુરૈઃ ॥ ૯.૨૯૨॥ છેદયેત્ખણ્ડશઃ ક્ષુરૈઃ

સીતાદ્રવ્યાપહરણે શસ્ત્રાણામૌષધસ્ય ચ ।
કાલમાસાદ્ય કાર્યં ચ રાજા દણ્ડં પ્રકલ્પયેત્ ॥ ૯.૨૯૩॥

સ્વામ્ય્ઽમાત્યૌ પુરં રાષ્ટ્રં કોશદણ્ડૌ સુહૃત્તથા ।
સપ્ત પ્રકૃતયો હ્યેતાઃ સપ્તાઙ્ગં રાજ્યમુચ્યતે ॥ ૯.૨૯૪॥

સપ્તાનાં પ્રકૃતીનાં તુ રાજ્યસ્યાસાં યથાક્રમમ્ ।
પૂર્વં પૂર્વં ગુરુતરં જાનીયાદ્વ્યસનં મહત્ ॥ ૯.૨૯૫॥

સપ્તાઙ્ગસ્યૈહ રાજ્યસ્ય વિષ્ટબ્ધસ્ય ત્રિદણ્ડવત્ ।
અન્યોન્યગુણવૈશેષ્યાન્ન કિં ચિદતિરિચ્યતે ॥ ૯.૨૯૬॥

તેષુ તેષુ તુ કૃત્યેષુ તત્તદઙ્ગં વિશિષ્યતે ।
યેન યત્સાધ્યતે કાર્યં તત્તસ્મિંશ્રેષ્ઠમુચ્યતે ॥ ૯.૨૯૭॥

ચારેણોત્સાહયોગેન ક્રિયયૈવ ચ કર્મણામ્ ।
સ્વશક્તિં પરશક્તિં ચ નિત્યં વિદ્યાન્મહીપતિઃ ॥ ૯.૨૯૮॥ વિદ્યાત્પરાત્મનોઃ

પીડનાનિ ચ સર્વાણિ વ્યસનાનિ તથૈવ ચ ।
આરભેત તતઃ કાર્યં સઞ્ચિન્ત્ય ગુરુલાઘવમ્ ॥ ૯.૨૯૯॥

આરભેતૈવ કર્માણિ શ્રાન્તઃ શ્રાન્તઃ પુનઃ પુનઃ ।

કર્માણ્યારભમાણં હિ પુરુષં શ્રીર્નિષેવતે ॥ ૯.૩૦૦॥

કૃતં ત્રેતાયુગં ચૈવ દ્વાપરં કલિરેવ ચ ।
રાજ્ઞો વૃત્તાનિ સર્વાણિ રાજા હિ યુગમુચ્યતે ॥ ૯.૩૦૧॥

કલિઃ પ્રસુપ્તો ભવતિ સ જાગ્રદ્દ્વાપરં યુગમ્ ।
કર્મસ્વભ્યુદ્યતસ્ત્રેતા વિચરંસ્તુ કૃતં યુગમ્ ॥ ૯.૩૦૨॥

ઇન્દ્રસ્યાર્કસ્ય વાયોશ્ચ યમસ્ય વરુણસ્ય ચ ।
ચન્દ્રસ્યાગ્નેઃ પૃથિવ્યાશ્ચ તેજોવૃત્તં નૃપશ્ચરેત્ ॥ ૯.૩૦૩॥

વાર્ષિકાંશ્ચતુરો માસાન્ યથેન્દ્રોઽભિપ્રવર્ષતિ ।
તથાઽભિવર્ષેત્સ્વં રાષ્ટ્રં કામૈરિન્દ્રવ્રતં ચરન્ ॥ ૯.૩૦૪॥

અષ્ટૌ માસાન્ યથાઽદિત્યસ્તોયં હરતિ રશ્મિભિઃ ।
તથા હરેત્કરં રાષ્ટ્રાન્નિત્યમર્કવ્રતં હિ તત્ ॥ ૯.૩૦૫॥

પ્રવિશ્ય સર્વભૂતાનિ યથા ચરતિ મારુતઃ ।
તથા ચારૈઃ પ્રવેષ્ટવ્યં વ્રતમેતદ્ધિ મારુતમ્ ॥ ૯.૩૦૬॥

યથા યમઃ પ્રિયદ્વેષ્યૌ પ્રાપ્તે કાલે નિયચ્છતિ ।
તથા રાજ્ઞા નિયન્તવ્યાઃ પ્રજાસ્તદ્ધિ યમવ્રતમ્ ॥ ૯.૩૦૭॥

વરુણેન યથા પાશૈર્બદ્ધ એવાભિદૃશ્યતે ।
તથા પાપાન્નિગૃહ્ણીયાદ્વ્રતમેતદ્ધિ વારુણમ્ ॥ ૯.૩૦૮॥

પરિપૂર્ણં યથા ચન્દ્રં દૃષ્ટ્વા હૃષ્યન્તિ માનવાઃ ।
તથા પ્રકૃતયો યસ્મિન્ સ ચાન્દ્રવ્રતિકો નૃપઃ ॥ ૯.૩૦૯॥

પ્રતાપયુક્તસ્તેજસ્વી નિત્યં સ્યાત્પાપકર્મસુ ।
દુષ્ટસામન્તહિંસ્રશ્ચ તદાગ્નેયં વ્રતં સ્મૃતમ્ ॥ ૯.૩૧૦॥

યથા સર્વાણિ ભૂતાનિ ધરા ધારયતે સમમ્ ।
તથા સર્વાણિ ભૂતાનિ બિભ્રતઃ પાર્થિવં વ્રતમ્ ॥ ૯.૩૧૧॥

એતૈરુપાયૈરન્યૈશ્ચ યુક્તો નિત્યમતન્દ્રિતઃ ।
સ્તેનાન્ રાજા નિગૃહ્ણીયાત્સ્વરાષ્ટ્રે પર એવ ચ ॥ ૯.૩૧૨॥

પરામપ્યાપદં પ્રાપ્તો બ્રાહ્મણાન્ન પ્રકોપયેત્ ।
તે હ્યેનં કુપિતા હન્યુઃ સદ્યઃ સબલવાહનમ્ ॥ ૯.૩૧૩॥

યૈઃ કૃતઃ સર્વભક્ષ્યોઽગ્નિરપેયશ્ચ મહોદધિઃ । સર્વભક્ષો
ક્ષયી ચાપ્યાયિતઃ સોમઃ કો ન નશ્યેત્પ્રકોપ્ય તાન્ ॥ ૯.૩૧૪॥

લોકાનન્યાન્ સૃજેયુર્યે લોકપાલાંશ્ચ કોપિતાઃ ।
દેવાન્ કુર્યુરદેવાંશ્ચ કઃ ક્ષિણ્વંસ્તાન્ સમૃધ્નુયાત્ ॥ ૯.૩૧૫॥

યાનુપાશ્રિત્ય તિષ્ઠન્તિ લોકા દેવાશ્ચ સર્વદા ।
બ્રહ્મ ચૈવ ધનં યેષાં કો હિંસ્યાત્તાઞ્જિજીવિષુઃ ॥ ૯.૩૧૬॥

અવિદ્વાંશ્ચૈવ વિદ્વાંશ્ચ બ્રાહ્મણો દૈવતં મહત્ ।
પ્રણીતશ્ચાપ્રણીતશ્ચ યથાઽગ્નિર્દૈવતં મહત્ ॥ ૯.૩૧૭॥

શ્મશાનેષ્વપિ તેજસ્વી પાવકો નૈવ દુષ્યતિ ।
હૂયમાનશ્ચ યજ્ઞેષુ ભૂય એવાભિવર્ધતે ॥ ૯.૩૧૮॥

એવં યદ્યપ્યનિષ્ટેષુ વર્તન્તે સર્વકર્મસુ ।
સર્વથા બ્રાહ્મણાઃ પૂજ્યાઃ પરમં દૈવતં હિ તત્ ॥ ૯.૩૧૯॥

ક્ષત્રસ્યાતિપ્રવૃદ્ધસ્ય બ્રાહ્મણાન્ પ્રતિ સર્વશઃ ।
બ્રહ્મૈવ સંનિયન્તૃ સ્યાત્ક્ષત્રં હિ બ્રહ્મસમ્ભવમ્ ॥ ૯.૩૨૦॥

અદ્ભ્યોઽગ્નિર્બ્રહ્મતઃ ક્ષત્રમશ્મનો લોહમુત્થિતમ્ ।
તેષાં સર્વત્રગં તેજઃ સ્વાસુ યોનિષુ શામ્યતિ ॥ ૯.૩૨૧॥

નાબ્રહ્મ ક્ષત્રં ઋધ્નોતિ નાક્ષત્રં બ્રહ્મ વર્ધતે ।
બ્રહ્મ ક્ષત્રં ચ સમ્પૃક્તમિહ ચામુત્ર વર્ધતે ॥ ૯.૩૨૨॥

દત્ત્વા ધનં તુ વિપ્રેભ્યઃ સર્વદણ્ડસમુત્થિતમ્ ।
પુત્રે રાજ્યં સમાસૃજ્ય કુર્વીત પ્રાયણં રણે ॥ ૯.૩૨૩॥ સમાસાદ્ય

એવં ચરન્ સદા યુક્તો રાજધર્મેષુ પાર્થિવઃ ।
હિતેષુ ચૈવ લોકસ્ય સર્વાન્ ભૃત્યાન્નિયોજયેત્ ॥ ૯.૩૨૪॥ હિતેષુ ચૈવ લોકેભ્યઃ

એષોઽખિલઃ કર્મવિધિરુક્તો રાજ્ઞઃ સનાતનઃ ।
ઇમં કર્મવિધિં વિદ્યાત્ક્રમશો વૈશ્યશૂદ્રયોઃ ॥ ૯.૩૨૫॥

વૈશ્યસ્તુ કૃતસંસ્કારઃ કૃત્વા દારપરિગ્રહમ્ ।
વાર્તાયાં નિત્યયુક્તઃ સ્યાત્પશૂનાં ચૈવ રક્ષણે ॥ ૯.૩૨૬॥

પ્રજાપતિર્હિ વૈશ્યાય સૃષ્ટ્વા પરિદદે પશૂન્ ।
બ્રાહ્મણાય ચ રાજ્ઞે ચ સર્વાઃ પરિદદે પ્રજાઃ ॥ ૯.૩૨૭॥

ન ચ વૈશ્યસ્ય કામઃ સ્યાન્ન રક્ષેયં પશૂનિતિ ।
વૈશ્યે ચેચ્છતિ નાન્યેન રક્ષિતવ્યાઃ કથં ચન ॥ ૯.૩૨૮॥

મણિમુક્તાપ્રવાલાનાં લોહાનાં તાન્તવસ્ય ચ ।
ગન્ધાનાં ચ રસાનાં ચ વિદ્યાદર્ઘબલાબલમ્ ॥ ૯.૩૨૯॥

બીજાનામુપ્તિવિદ્ચ સ્યાત્ક્ષેત્રદોષગુણસ્ય ચ ।
માનયોગં ચ જાનીયાત્તુલાયોગાંશ્ચ સર્વશઃ ॥ ૯.૩૩૦॥

સારાસારં ચ ભાણ્ડાનાં દેશાનાં ચ ગુણાગુણાન્ ।
લાભાલાભં ચ પણ્યાનાં પશૂનાં પરિવર્ધનમ્ ॥ ૯.૩૩૧॥

ભૃત્યાનાં ચ ભૃતિં વિદ્યાદ્ભાષાશ્ચ વિવિધા નૃણામ્ ।
દ્રવ્યાણાં સ્થાનયોગાંશ્ચ ક્રયવિક્રયમેવ ચ ॥ ૯.૩૩૨॥

ધર્મેણ ચ દ્રવ્યવૃદ્ધાવાતિષ્ઠેદ્યત્નમુત્તમમ્ ।
દદ્યાચ્ચ સર્વભૂતાનામન્નમેવ પ્રયત્નતઃ ॥ ૯.૩૩૩॥

વિપ્રાણાં વેદવિદુષાં ગૃહસ્થાનાં યશસ્વિનામ્ ।
શુશ્રૂષૈવ તુ શૂદ્રસ્ય ધર્મો નૈશ્રેયસઃ પરઃ ॥ ૯.૩૩૪॥ પરમ્

શુચિરુત્કૃષ્ટશુશ્રૂષુર્મૃદુવાગનહઙ્કૃતઃ ।
બ્રાહ્મણાદ્યાશ્રયો નિત્યમુત્કૃષ્ટાં જાતિમશ્નુતે ॥ ૯.૩૩૫॥ બ્રાહ્મણાપાશ્રયો

એષોઽનાપદિ વર્ણાનામુક્તઃ કર્મવિધિઃ શુભઃ ।
આપદ્યપિ હિ યસ્તેષાં ક્રમશસ્તન્નિબોધત ॥ ૯.૩૩૬॥

## અધ્યાય ૧૦

અધીયીરંસ્ત્રયો વર્ણાઃ સ્વકર્મસ્થા દ્વિજાતયઃ ।
પ્રબ્રૂયાદ્બ્રાહ્મણસ્ત્વેષાં નેતરાવિતિ નિશ્ચયઃ ॥ ૧૦.૧॥

સર્વેષાં બ્રાહ્મણો વિદ્યાદ્વૃત્ત્યુપાયાન્ યથાવિધિ ।
પ્રબ્રૂયાદિતરેભ્યશ્ચ સ્વયં ચૈવ તથા ભવેત્ ॥ ૧૦.૨॥

વૈશેષ્યાત્પ્રકૃતિશ્રૈષ્ઠ્યાન્નિયમસ્ય ચ ધારણાત્ ।
સંસ્કારસ્ય વિશેષાચ્ચ વર્ણાનાં બ્રાહ્મણઃ પ્રભુઃ ॥ ૧૦.૩॥

બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યસ્ત્રયો વર્ણા દ્વિજાતયઃ ।

ચતુર્થ એકજાતિસ્તુ શૂદ્રો નાસ્તિ તુ પઞ્ચમઃ ॥ ૧૦.૪॥

સર્વવર્ણેષુ તુલ્યાસુ પત્નીષ્વક્ષતયોનિષુ ।
આનુલોમ્યેન સમ્ભૂતા જાત્યા જ્ઞેયાસ્ત એવ તે ॥ ૧૦.૫॥

સ્ત્રીષ્વનન્તરજાતાસુ દ્વિજૈરુત્પાદિતાન્ સુતાન્ ।
સદૃશાનેવ તાનાહુર્માતૃદોષવિગર્હિતાન્ ॥ ૧૦.૬॥

અનન્તરાસુ જાતાનાં વિધિરેષ સનાતનઃ ।
દ્વ્યેકાન્તરાસુ જાતાનાં ધર્મ્યં વિદ્યાદિમં વિધિમ્ ॥ ૧૦.૭॥

બ્રાહ્મણાદ્વૈશ્યકન્યાયામમ્બષ્ઠો નામ જાયતે ।
નિષાદઃ શૂદ્રકન્યાયાં યઃ પારશવ ઉચ્યતે ॥ ૧૦.૮॥

ક્ષત્રિયાત્શૂદ્રકન્યાયાં ક્રૂરાચારવિહારવાન્ ।
ક્ષત્રશૂદ્રવપુર્જન્તુરુગ્રો નામ પ્રજાયતે ॥ ૧૦.૯॥

વિપ્રસ્ય ત્રિષુ વર્ણેષુ નૃપતેર્વર્ણયોર્દ્વયોઃ ।
વૈશ્યસ્ય વર્ણે ચૈકસ્મિન્ ષડેતેઽપસદાઃ સ્મૃતાઃ ॥ ૧૦.૧૦॥

ક્ષત્રિયાદ્વિપ્રકન્યાયાં સૂતો ભવતિ જાતિતઃ ।
વૈશ્યાન્ માગધવૈદેહૌ રાજવિપ્રાઙ્ગનાસુતૌ ॥ ૧૦.૧૧॥

શૂદ્રાદાયોગવઃ ક્ષત્તા ચણ્ડાલશ્ચાધમો નૃણામ્ ।
વૈશ્યરાજન્યવિપ્રાસુ જાયન્તે વર્ણસઙ્કરાઃ ॥ ૧૦.૧૨॥

એકાન્તરે ત્વાનુલોમ્યાદમ્બષ્ઠોગ્રૌ યથા સ્મૃતૌ ।
ક્ષત્તૃવૈદેહકૌ તદ્વત્પ્રાતિલોમ્યેઽપિ જન્મનિ ॥ ૧૦.૧૩॥

પુત્રા યેઽનન્તરસ્ત્રીજાઃ ક્રમેણોક્તા દ્વિજન્મનામ્ ।
તાનનન્તરનામ્નસ્તુ માતૃદોષાત્પ્રચક્ષતે ॥ ૧૦.૧૪॥

બ્રાહ્મણાદુગ્રકન્યાયામાવૃતો નામ જાયતે ।
આભીરોઽમ્બષ્ઠકન્યાયામાયોગવ્યાં તુ ધિગ્વણઃ ॥ ૧૦.૧૫॥

આયોગવશ્ચ ક્ષત્તા ચ ચણ્ડાલશ્ચાધમો નૃણામ્ ।
પ્રાતિલોમ્યેન જાયન્તે શૂદ્રાદપસદાસ્ત્રયઃ ॥ ૧૦.૧૬॥

વૈશ્યાન્ માગધવૈદેહૌ ક્ષત્રિયાત્સૂત એવ તુ ।
પ્રતીપમેતે જાયન્તે પરેઽપ્યપસદાસ્ત્રયઃ ॥ ૧૦.૧૭॥

જાતો નિષાદાત્શૂદ્રાયાં જાત્યા ભવતિ પુક્કસઃ ।
શૂદ્રાજ્જાતો નિષાદ્યાં તુ સ વૈ કુક્કુટકઃ સ્મૃતઃ ॥ ૧૦.૧૮॥

ક્ષત્તુર્જાતસ્તથોગ્રાયાં શ્વપાક ઇતિ કીર્ત્યતે ।
વૈદેહકેન ત્વમ્બષ્ઠ્યામુત્પન્નો વેણ ઉચ્યતે ॥ ૧૦.૧૯॥

દ્વિજાતયઃ સવર્ણાસુ જનયન્ત્યવ્રતાંસ્તુ યાન્ ।
તાન્ સાવિત્રીપરિભ્રષ્ટાન્ વ્રાત્યાનિતિ વિનિર્દિશેત્ ॥ ૧૦.૨૦॥

વ્રાત્યાત્તુ જાયતે વિપ્રાત્પાપાત્મા ભૂર્જકણ્ટકઃ । ભૃજ્જકણ્ટકઃ
આવન્ત્યવાટધાનૌ ચ પુષ્પધઃ શૈખ એવ ચ ॥ ૧૦.૨૧॥

ઝલ્લો મલ્લશ્ચ રાજન્યાદ્વ્રાત્યાન્નિચ્છિવિરેવ ચ । વ્રાત્યાત્લિચ્છવિરેવ ચ
નટશ્ચ કરણશ્ચૈવ ખસો દ્રવિડ એવ ચ ॥ ૧૦.૨૨॥

વૈશ્યાત્તુ જાયતે વ્રાત્યાત્સુધન્વાડચાર્ય એવ ચ ।
કારુષશ્ચ વિજન્મા ચ મૈત્રઃ સાત્વત એવ ચ ॥ ૧૦.૨૩॥

વ્યભિચારેણ વર્ણાનામવેદ્યાવેદનેન ચ ।
સ્વકર્મણાં ચ ત્યાગેન જાયન્તે વર્ણસઙ્કરાઃ ॥ ૧૦.૨૪॥

સઙ્કીર્ણયોનયો યે તુ પ્રતિલોમાનુલોમજાઃ ।
અન્યોન્યવ્યતિષક્તાશ્ચ તાન્ પ્રવક્ષ્યામ્યશેષતઃ ॥ ૧૦.૨૫॥

સૂતો વૈદેહકશ્ચૈવ ચણ્ડાલશ્ચ નરાધમઃ ।
માગધઃ તથાડયોગવ એવ ચ ક્ષત્રજાતિશ્ચ ॥ ૧૦.૨૬॥ ક્ષત્તૃજાતિશ્ચ

એતે ષટ્ સદૃશાન્ વર્ણાઞ્જનયન્તિ સ્વયોનિષુ ।
માતૃજાત્યાં પ્રસૂયન્તે પ્રવારાસુ ચ યોનિષુ ॥ ૧૦.૨૭॥ માતૃજાત્યાઃ

યથા ત્રયાણાં વર્ણાનાં દ્વયોરાત્માડસ્ય જાયતે ।
આનન્તર્યાત્સ્વયોન્યાં તુ તથા બાહ્યેષ્વપિ ક્રમાત્ ॥ ૧૦.૨૮॥ ક્રમઃ

તે ચાપિ બાહ્યાન્ સુબહૂંસ્તતોડપ્યધિકદૂષિતાન્ ।
પરસ્પરસ્ય દારેષુ જનયન્તિ વિગર્હિતાન્ ॥ ૧૦.૨૯॥

યથૈવ શૂદ્રો બ્રાહ્મણ્યાં બાહ્યં જન્તું પ્રસૂયતે ।
તથા બાહ્યતરં બાહ્યશ્ચાતુર્વર્ણ્યે પ્રસૂયતે ॥ ૧૦.૩૦॥

પ્રતિકૂલં વર્તમાના બાહ્યા બાહ્યતરાન્ પુનઃ ।
હીના હીનાન્ પ્રસૂયન્તે વર્ણાન્ પઞ્ચદશૈવ તુ ॥ ૧૦.૩૧॥

પ્રસાધનોપચારજ્ઞમદાસં દાસજીવનમ્ । દાસ્યજીવિનં
સૈરિન્ધ્રં વાગુરાવૃત્તિં સૂતે દસ્યુરયોગવે ॥ ૧૦.૩૨॥ સૈરન્ધ્રં

મૈત્રેયકં તુ વૈદેહો માધૂકં સમ્પ્રસૂયતે ।
નૄન્ પ્રશંસત્યજસ્રં યો ઘણ્ટાતાડોઽરુણોદયે ॥ ૧૦.૩૩॥

નિષાદો માર્ગવં સૂતે દાસં નૌકર્મજીવિનમ્ ।
કૈવર્તમિતિ યં પ્રાહુરાર્યાવર્તનિવાસિનઃ ॥ ૧૦.૩૪॥

મૃતવસ્ત્રભૃત્સ્વનારીષુ ગર્હિતાન્નાશનાસુ ચ । અનાર્યાષુ
ભવન્ત્યાયોગવીષ્વેતે જાતિહીનાઃ પૃથક્ત્રયઃ ॥ ૧૦.૩૫॥

કારાવરો નિષાદાત્તુ ચર્મકારઃ પ્રસૂયતે । ચર્મકારં
વૈદેહિકાદન્ધ્રમેદૌ બહિર્ગ્રામપ્રતિશ્રયૌ ॥ ૧૦.૩૬॥

ચણ્ડાલાત્પાણ્ડુસોપાકસ્ત્વક્સારવ્યવહારવાન્ ।
આહિણ્ડિકો નિષાદેન વૈદેહ્યામેવ જાયતે ॥ ૧૦.૩૭॥

ચણ્ડાલેન તુ સોપાકો મૂલવ્યસનવૃત્તિમાન્ ।
પુક્કસ્યાં જાયતે પાપઃ સદા સજ્જનગર્હિતઃ ॥ ૧૦.૩૮॥ પુલ્કસ્યાં

નિષાદસ્ત્રી તુ ચણ્ડાલાત્પુત્રમન્ત્યાવસાયિનમ્ ।
શ્મશાનગોચરં સૂતે બાહ્યાનામપિ ગર્હિતમ્ ॥ ૧૦.૩૯॥

સઙ્કરે જાતયસ્ત્વેતાઃ પિતૃમાતૃપ્રદર્શિતાઃ ।
પ્રચ્છન્ના વા પ્રકાશા વા વેદિતવ્યાઃ સ્વકર્મભિઃ ॥ ૧૦.૪૦॥

સ્વજાતિજાનન્તરજાઃ ષટ્ સુતા દ્વિજધર્મિણઃ ।
શૂદ્રાણાં તુ સધર્માણઃ સર્વેઽપધ્વંસજાઃ સ્મૃતાઃ ॥ ૧૦.૪૧॥

તપોબીજપ્રભાવૈસ્તુ તે ગચ્છન્તિ યુગે યુગે ।
ઉત્કર્ષં ચાપકર્ષં ચ મનુષ્યેષ્વિહ જન્મતઃ ॥ ૧૦.૪૨॥

શનકૈસ્તુ ક્રિયાલોપાદિમાઃ ક્ષત્રિયજાતયઃ ।
વૃષલત્વં ગતા લોકે બ્રાહ્મણાદર્શનેન ચ ॥ ૧૦.૪૩॥ બ્રાહ્મણાતિક્રમેણ ચ

પૌણ્ડ્રકાશ્ચૌડ્રદ્રવિડાઃ કામ્બોજા યવનાઃ શકાઃ । પુણ્ડ્રકાશ્ચોડદ્રવિડાઃ
પારદાપહ્લવાશ્ચીનાઃ કિરાતા દરદાઃ ખશાઃ ॥ ૧૦.૪૪॥

મુખબાહૂરુપદ્જાનાં યા લોકે જાતયો બહિઃ ।

મ્લેચ્છવાચશ્ચાર્યવાચઃ સર્વે તે દસ્યવઃ સ્મૃતાઃ ॥ ૧૦.૪૫॥

યે દ્વિજાનામપસદા યે ચાપધ્વંસજાઃ સ્મૃતાઃ ।
તે નિન્દિતૈર્વર્તયેયુર્દ્વિજાનામેવ કર્મભિઃ ॥ ૧૦.૪૬॥

સૂતાનામશ્વસારથ્યમમ્બષ્ઠાનાં ચિકિત્સનમ્ ।
વૈદેહકાનાં સ્ત્રીકાર્યં માગધાનાં વણિક્પથઃ ॥ ૧૦.૪૭॥

મત્સ્યઘાતો નિષાદાનાં ત્વષ્ટિસ્ત્વાયોગવસ્ય ચ ।
મેદાન્ધ્રચુઞ્ચુમદ્ગૂનામારણ્યપશુહિંસનમ્ ॥ ૧૦.૪૮॥

ક્ષત્ત્ર્યુગ્રપુક્કસાનાં તુ બિલૌકોવધબન્ધનમ્ ।
ધિગ્વણાનાં ચર્મકાર્યં વેણાનાં ભાણ્ડવાદનમ્ ॥ ૧૦.૪૯॥

ચૈત્યદ્રુમશ્મશાનેષુ શૈલેષૂપવનેષુ ચ ।
વસેયુરેતે વિજ્ઞાતા વર્તયન્તઃ સ્વકર્મભિઃ ॥ ૧૦.૫૦॥

ચણ્ડાલશ્વપચાનાં તુ બહિર્ગ્રામાત્પ્રતિશ્રયઃ ।
અપપાત્રાશ્ચ કર્તવ્યા ધનમેષાં શ્વગર્દભમ્ ॥ ૧૦.૫૧॥

વાસાંસિ મૃતચૈલાનિ ભિન્નભાણ્ડેષુ ભોજનમ્ ।
કાર્ષ્ણાયસમલઙ્કારઃ પરિવ્રજ્યા ચ નિત્યશઃ ॥ ૧૦.૫૨॥

ન તૈઃ સમયમન્વિચ્છેત્પુરુષો ધર્મમાચરન્ ।
વ્યવહારો મિથસ્તેષાં વિવાહઃ સદૃશૈઃ સહ ॥ ૧૦.૫૩॥

અન્નમેષાં પરાધીનં દેયં સ્યાદ્ભિન્નભાજને ।
રાત્રૌ ન વિચરેયુસ્તે ગ્રામેષુ નગરેષુ ચ ॥ ૧૦.૫૪॥

દિવા ચરેયુઃ કાર્યાર્થં ચિહ્નિતા રાજશાસનૈઃ ।
અબાન્ધવં શવં ચૈવ નિર્હરેયુરિતિ સ્થિતિઃ ॥ ૧૦.૫૫॥

વધ્યાંશ્ચ હન્યુઃ સતતં યથાશાસ્ત્રં નૃપાજ્ઞયા ।
વધ્યવાસાંસિ ગૃહ્ણીયુઃ શય્યાશ્ચાભરણાનિ ચ ॥ ૧૦.૫૬॥

વર્ણાપેતમવિજ્ઞાતં નરં કલુષયોનિજમ્ ।
આર્યરૂપમિવાનાર્યં કર્મભિઃ સ્વૈર્વિભાવયેત્ ॥ ૧૦.૫૭॥

અનાર્યતા નિષ્ઠુરતા ક્રૂરતા નિષ્ક્રિયાત્મતા ।
પુરુષં વ્યઞ્જયન્તીહ લોકે કલુષયોનિજમ્ ॥ ૧૦.૫૮॥

પિત્ર્યં વા ભજતે શીલં માતુર્વોભયમેવ વા ।
ન કથં ચન દુર્યોનિઃ પ્રકૃતિં સ્વાં નિયચ્છતિ ॥ ૧૦.૫૯॥

કુલે મુખ્યેઽપિ જાતસ્ય યસ્ય સ્યાદ્યોનિસઙ્કરઃ ।
સંશ્રયત્યેવ તત્શીલં નરોઽલ્પમપિ વા બહુ ॥ ૧૦.૬૦॥

યત્ર ત્વેતે પરિધ્વંસાજ્જાયન્તે વર્ણદૂષકાઃ ।
રાષ્ટ્રિકૈઃ સહ તદ્રાષ્ટ્રં ક્ષિપ્રમેવ વિનશ્યતિ ॥ ૧૦.૬૧॥ રાષ્ટ્રિયૈઃ

બ્રાહ્મણાર્થે ગવાર્થે વા દેહત્યાગોઽનુપસ્કૃતઃ ।
સ્ત્રીબાલાભ્યુપપત્તૌ ચ બાહ્યાનાં સિદ્ધિકારણમ્ ॥ ૧૦.૬૨॥ સ્ત્રીબાલાભ્યવપત્તૌ ચ

અહિંસા સત્યમસ્તેયં શૌચમિન્દ્રિયનિગ્રહઃ ।
એતં સામાસિકં ધર્મં ચાતુર્વર્ણ્યેઽબ્રવીન્ મનુઃ ॥ ૧૦.૬૩॥

શૂદ્રાયાં બ્રાહ્મણાજ્જાતઃ શ્રેયસા ચેત્પ્રજાયતે ।
અશ્રેયાન્ શ્રેયસીં જાતિં ગચ્છત્યા સપ્તમાદ્યુગાત્ ॥ ૧૦.૬૪॥

શૂદ્રો બ્રાહ્મણતામેતિ બ્રાહ્મણશ્ચૈતિ શૂદ્રતામ્ ।
ક્ષત્રિયાજ્જાતમેવં તુ વિદ્યાદ્વૈશ્યાત્તથૈવ ચ ॥ ૧૦.૬૫॥

અનાર્યાયાં સમુત્પન્નો બ્રાહ્મણાત્તુ યદૃચ્છયા ।
બ્રાહ્મણ્યામપ્યનાર્યાત્તુ શ્રેયસ્ત્વં ક્વેતિ ચેદ્ભવેત્ ॥ ૧૦.૬૬॥ કસ્ય ચિદ્ભવેત્

જાતો નાર્યામનાર્યાયામાર્યાદાર્યો ભવેદ્ગુણૈઃ ।
જાતોઽપ્યનાર્યાદાર્યાયામનાર્ય ઇતિ નિશ્ચયઃ ॥ ૧૦.૬૭॥

તાવુભાવપ્યસંસ્કાર્યાવિતિ ધર્મો વ્યવસ્થિતઃ ।
વૈગુણ્યાજ્જન્મનઃ પૂર્વ ઉત્તરઃ પ્રતિલોમતઃ ॥ ૧૦.૬૮॥ જન્મતઃ

સુબીજં ચૈવ સુક્ષેત્રે જાતં સમ્પદ્યતે યથા ।
તથાઽર્યાજ્જાત આર્યાયાં સર્વં સંસ્કારમર્હતિ ॥ ૧૦.૬૯॥

બીજમેકે પ્રશંસન્તિ ક્ષેત્રમન્યે મનીષિણઃ ।
બીજક્ષેત્રે તથૈવાન્યે તત્રેયં તુ વ્યવસ્થિતિઃ ॥ ૧૦.૭૦॥

અક્ષેત્રે બીજમુત્સૃષ્ટમન્તરૈવ વિનશ્યતિ ।
અબીજકમપિ ક્ષેત્રં કેવલં સ્થણ્ડિલં ભવેત્ ॥ ૧૦.૭૧॥

યસ્માદ્બીજપ્રભાવેણ તિર્યગ્જા ઋષયોઽભવન્ ।
પૂજિતાશ્ચ પ્રશસ્તાશ્ચ તસ્માદ્બીજં પ્રશસ્યતે ॥ ૧૦.૭૨॥ વિશિષ્યતે)

અનાર્યમાર્યકર્માણમાર્યં ચાનાર્યકર્મિણમ્ ।
સમ્પ્રધાર્યાબ્રવીદ્ધાતા ન સમૌ નાસમાવિતિ ॥ ૧૦.૭૩॥

બ્રાહ્મણા બ્રહ્મયોનિસ્થા યે સ્વકર્મણ્યવસ્થિતાઃ ।
તે સમ્યગુપજીવેયુઃ ષટ્ કર્માણિ યથાક્રમમ્ ॥ ૧૦.૭૪॥

અધ્યાપનમધ્યયનં યજનં યાજનં તથા ।
દાનં પ્રતિગ્રહશ્ચૈવ ષટ્ કર્માણ્યગ્રજન્મનઃ ॥ ૧૦.૭૫॥

ષણ્ણાં તુ કર્મણામસ્ય ત્રીણિ કર્માણિ જીવિકા ।
યાજનાધ્યાપને ચૈવ વિશુદ્ધાચ્ચ પ્રતિગ્રહઃ ॥ ૧૦.૭૬॥

ત્રયો ધર્મા નિવર્તન્તે બ્રાહ્મણાત્ક્ષત્રિયં પ્રતિ ।
અધ્યાપનં યાજનં ચ તૃતીયશ્ચ પ્રતિગ્રહઃ ॥ ૧૦.૭૭॥

વૈશ્યં પ્રતિ તથૈવૈતે નિવર્તેરન્નિતિ સ્થિતિઃ ।
ન તૌ પ્રતિ હિ તાન્ ધર્માન્ મનુરાહ પ્રજાપતિઃ ॥ ૧૦.૭૮॥ પ્રતિ હિતાન્ ધર્માન્

શસ્ત્રાસ્ત્રભૃત્ત્વં ક્ષત્રસ્ય વણિક્પશુકૃષિર્વિષઃ ।
આજીવનાર્થં ધર્મસ્તુ દાનમધ્યયનં યજિઃ ॥ ૧૦.૭૯॥

વેદાભ્યાસો બ્રાહ્મણસ્ય ક્ષત્રિયસ્ય ચ રક્ષણમ્ ।
વાર્તાકર્મૈવ વૈશ્યસ્ય વિશિષ્ટાનિ સ્વકર્મસુ ॥ ૧૦.૮૦॥

અજીવંસ્તુ યથોક્તેન બ્રાહ્મણઃ સ્વેન કર્મણા ।
જીવેત્ક્ષત્રિયધર્મેણ સ હ્યસ્ય પ્રત્યનન્તરઃ ॥ ૧૦.૮૧॥

ઉભાભ્યામપ્યજીવંસ્તુ કથં સ્યાદિતિ ચેદ્ભવેત્ ।
કૃષિગોરક્ષમાસ્થાય જીવેદ્વૈશ્યસ્ય જીવિકામ્ ॥ ૧૦.૮૨॥

વૈશ્યવૃત્ત્યાઽપિ જીવંસ્તુ બ્રાહ્મણઃ ક્ષત્રિયોઽપિ વા ।
હિંસાપ્રાયાં પરાધીનાં કૃષિં યત્નેન વર્જયેત્ ॥ ૧૦.૮૩॥

કૃષિં સાધુઇતિ મન્યન્તે સા વૃત્તિઃ સદ્વિગર્હિતાઃ ।
ભૂમિં ભૂમિશયાંશ્ચૈવ હન્તિ કાષ્ઠમયોમુખમ્ ॥ ૧૦.૮૪॥

ઇદં તુ વૃત્તિવૈકલ્યાત્ત્યજતો ધર્મનૈપુણમ્ ।
વિટ્પણ્યમુદ્ધૃતોદ્ધારં વિક્રેયં વિત્તવર્ધનમ્ ॥ ૧૦.૮૫॥

સર્વાન્ રસાનપોહેત કૃતાન્નં ચ તિલૈઃ સહ ।

અશ્મનો લવણં ચૈવ પશવો યે ચ માનુષાઃ ॥ ૧૦.૮૬॥

સર્વં ચ તાન્તવં રક્તં શાણક્ષૌમાવિકાનિ ચ ।
અપિ ચેત્સ્યુરરક્તાનિ ફલમૂલે તથૌષધીઃ ॥ ૧૦.૮૭॥

અપઃ શસ્ત્રં વિષં માંસં સોમં ગન્ધાંશ્ચ સર્વશઃ ।
ક્ષીરં ક્ષૌદ્રં દધિ ઘૃતં તૈલં મધુ ગુડં કુશાન્ ॥ ૧૦.૮૮॥

આરણ્યાંશ્ચ પશૂન્ સર્વાન્ દંષ્ટ્રિણશ્ચ વયાંસિ ચ ।
મદ્યં નીલિં ચ લાક્ષાં ચ સર્વાંશ્ચૈકશફાંસ્તથા ॥ ૧૦.૮૯॥ નીલીં

કામમુત્પાદ્ય કૃષ્યાં તુ સ્વયમેવ કૃષીવલઃ ।
વિક્રીણીત તિલાંશૂદ્રાન્ ધર્માર્થમચિરસ્થિતાન્ ॥ ૧૦.૯૦॥ તિલાંશુદ્ધાન્

ભોજનાભ્યઞ્જનાદ્દાનાદ્યદન્યત્કુરુતે તિલૈઃ ।
કૃમિભૂતઃ શ્વવિષ્ઠાયાં પિતૃભિઃ સહ મજ્જતિ ॥ ૧૦.૯૧॥

સદ્યઃ પતતિ માંસેન લાક્ષયા લવણેન ચ ।
ત્ર્યહેણ શૂદ્રો ભવતિ બ્રાહ્મણઃ ક્ષીરવિક્રયાત્ ॥ ૧૦.૯૨॥

ઇતરેષાં તુ પણ્યાનાં વિક્રયાદિહ કામતઃ ।
બ્રાહ્મણઃ સપ્તરાત્રેણ વૈશ્યભાવં નિયચ્છતિ ॥ ૧૦.૯૩॥

રસા રસૈર્નિમાતવ્યા ન ત્વેવ લવણં રસૈઃ ।
કૃતાન્નં ચ કૃતાન્નેન  તિલા ધાન્યેન તત્સમાઃ ॥ ૧૦.૯૪॥

જીવેદેતેન રાજન્યઃ સર્વેણાપ્યનયં ગતઃ ।
ન ત્વેવ જ્યાયંસીં વૃત્તિમભિમન્યેત કર્હિ ચિત્ ॥ ૧૦.૯૫॥

યો લોભાદધમો જાત્યા જીવેદુત્કૃષ્ટકર્મભિઃ ।
તં રાજા નિર્ધનં કૃત્વા ક્ષિપ્રમેવ પ્રવાસયેત્ ॥ ૧૦.૯૬॥

વરં સ્વધર્મો વિગુણો ન પારક્યઃ સ્વનુષ્ઠિતઃ । વિગુણઃ પરધર્માત્સ્વધિષ્ઠિતાત્
પરધર્મેણ જીવન્ હિ સદ્યઃ પતતિ જાતિતઃ ॥ ૧૦.૯૭॥

વૈશ્યોઽજીવન્ સ્વધર્મેણ શૂદ્રવૃત્ત્યાઽપિ વર્તયેત્ ।
અનાચરન્નકાર્યાણિ નિવર્તેત ચ શક્તિમાન્ ॥ ૧૦.૯૮॥

અશક્નુવંસ્તુ શુશ્રૂષાં શૂદ્રઃ કર્તું દ્વિજન્મનામ્ ।
પુત્રદારાત્યયં પ્રાપ્તો જીવેત્કારુકકર્મભિઃ ॥ ૧૦.૯૯॥

યૈઃ કર્મભિઃ પ્રચરિતૈઃ શુશ્રૂષ્યન્તે દ્વિજાતયઃ ।
તાનિ કારુકકર્માણિ શિલ્પાનિ વિવિધાનિ ચ ॥ ૧૦.૧૦૦॥

વૈશ્યવૃત્તિમનાતિષ્ઠન્ બ્રાહ્મણઃ સ્વે પથિ સ્થિતઃ ।
અવૃત્તિકર્ષિતઃ સીદન્નિમં ધર્મં સમાચરેત્ ॥ ૧૦.૧૦૧॥

સર્વતઃ પ્રતિગૃહ્ણીયાદ્બ્રાહ્મણસ્ત્વનયં ગતઃ ।
પવિત્રં દુષ્યતીત્યેતદ્ધર્મતો નોપપદ્યતે ॥ ૧૦.૧૦૨॥

નાધ્યાપનાદ્યાજનાદ્વા ગર્હિતાદ્વા પ્રતિગ્રહાત્ ।
દોષો ભવતિ વિપ્રાણાં જ્વલનામ્બુસમા હિ તે ॥ ૧૦.૧૦૩॥

જીવિતાત્યયમાપન્નો યોઽન્નમત્તિ તતસ્તતઃ ।
આકાશમિવ પઙ્કેન ન સ પાપેન લિપ્યતે ॥ ૧૦.૧૦૪॥

અજીગર્તઃ સુતં હન્તુમુપાસર્પદ્બુભુક્ષિતઃ ।
ન ચાલિપ્યત પાપેન ક્ષુત્પ્રતીકારમાચરન્ ॥ ૧૦.૧૦૫॥

શ્વમાંસમિચ્છનાર્તોઽત્તું ધર્માધર્મવિચક્ષણઃ ।
પ્રાણાનાં પરિરક્ષાર્થં વામદેવો ન લિપ્તવાન્ ॥ ૧૦.૧૦૬॥

ભરદ્વાજઃ ક્ષુધાર્તસ્તુ સપુત્રો વિજને વને ।
બહ્વીર્ગાઃ પ્રતિજગ્રાહ વૃધોસ્તક્ષ્ણો મહાતપાઃ ॥ ૧૦.૧૦૭॥

ક્ષુધાર્તશ્ચાત્તુમભ્યાગાદ્વિશ્વામિત્રઃ શ્વજાઘનીમ્ ।
ચણ્ડાલહસ્તાદાદાય ધર્માધર્મવિચક્ષણઃ ॥ ૧૦.૧૦૮॥

પ્રતિગ્રહાદ્યાજનાદ્વા તથૈવાધ્યાપનાદપિ ।
પ્રતિગ્રહઃ પ્રત્યવરઃ પ્રેત્ય વિપ્રસ્ય ગર્હિતઃ ॥ ૧૦.૧૦૯॥

યાજનાધ્યાપને નિત્યં ક્રિયેતે સંસ્કૃતાત્મનામ્ ।
પ્રતિગ્રહસ્તુ ક્રિયતે શૂદ્રાદપ્યન્ત્યજન્મનઃ ॥ ૧૦.૧૧૦॥

જપહોમૈરપેત્યેનો યાજનાધ્યાપનૈઃ કૃતમ્ ।
પ્રતિગ્રહનિમિત્તં તુ ત્યાગેન તપસૈવ ચ ॥ ૧૦.૧૧૧॥

શિલૌઞ્છમપ્યાદદીત વિપ્રોઽજીવન્ યતસ્તતઃ ।
પ્રતિગ્રહાત્શિલઃ શ્રેયાંસ્તતોઽપ્યુઞ્છઃ પ્રશસ્યતે ॥ ૧૦.૧૧૨॥

સીદદ્ભિઃ કુપ્યમિચ્છદ્ભિર્ધને વા પૃથિવીપતિઃ । ધનં વા
યાચ્યઃ સ્યાત્સ્નાતકૈર્વિપ્રૈરદિત્સંસ્ત્યાગમર્હતિ ॥ ૧૦.૧૧૩॥

અકૃતં ચ કૃતાત્ક્ષેત્રાદ્ગૌરજાવિકમેવ ચ ।
હિરણ્યં ધાન્યમન્નં ચ પૂર્વં પૂર્વમદોષવત્ ॥ ૧૦.૧૧૪॥

સપ્ત વિત્તાગમા ધર્મ્યા દાયો લાભઃ ક્રયો જયઃ ।
પ્રયોગઃ કર્મયોગશ્ચ સત્પ્રતિગ્રહ એવ ચ ॥ ૧૦.૧૧૫॥

વિદ્યા શિલ્પં ભૃતિઃ સેવા ગોરક્ષ્યં વિપણિઃ કૃષિઃ ।
ધૃતિર્ભૈક્ષં કુસીદં ચ દશ જીવનહેતવઃ ॥ ૧૦.૧૧૬॥

બ્રાહ્મણઃ ક્ષત્રિયો વાઽપિ વૃદ્ધિં નૈવ પ્રયોજયેત્ ।
કામં તુ ખલુ ધર્માર્થં દદ્યાત્પાપીયસેઽલ્પિકામ્ ॥ ૧૦.૧૧૭॥

ચતુર્થમાદદાનોઽપિ ક્ષત્રિયો ભાગમાપદિ ।
પ્રજા રક્ષન્ પરં શક્ત્યા કિલ્બિષાત્પ્રતિમુચ્યતે ॥ ૧૦.૧૧૮॥

સ્વધર્મો વિજયસ્તસ્ય નાહવે સ્યાત્પરાઙ્મુખઃ ।
શસ્ત્રેણ વૈશ્યાન્ રક્ષિત્વા ધર્મ્યમાહારયેદ્બલિમ્ ॥ ૧૦.૧૧૯॥ વૈશ્યાદ્રક્ષિત્વા

ધાન્યેઽષ્ટમં વિશાં શુલ્કં વિંશં કાર્ષાપણાવરમ્ ।
કર્મોપકરણાઃ શૂદ્રાઃ કારવઃ શિલ્પિનસ્તથા ॥ ૧૦.૧૨૦॥

શૂદ્રસ્તુ વૃત્તિમાકાઙ્ક્ષન્ ક્ષત્રમારાધયેદ્યદિ । આરાધયેદિતિ
ધનિનં વાઽપ્યુપારાધ્ય વૈશ્યં શૂદ્રો જિજીવિષેત્ ॥ ૧૦.૧૨૧॥

સ્વર્ગાર્થમુભયાર્થં વા વિપ્રાનારાધયેત્તુ સઃ ।
જાતબ્રાહ્મણશબ્દસ્ય સા હ્યસ્ય કૃતકૃત્યતા ॥ ૧૦.૧૨૨॥

વિપ્રસેવૈવ શૂદ્રસ્ય વિશિષ્ટં કર્મ કીર્ત્યતે ।
યદતોઽન્યદ્ધિ કુરુતે તદ્ભવત્યસ્ય નિષ્ફલમ્ ॥ ૧૦.૧૨૩॥

પ્રકલ્પ્યા તસ્ય તૈર્વૃત્તિઃ સ્વકુટુમ્બાદ્યથાર્હતઃ ।
શક્તિં ચાવેક્ષ્ય દાક્ષ્યં ચ ભૃત્યાનાં ચ પરિગ્રહમ્ ॥ ૧૦.૧૨૪॥

ઉચ્છિષ્ટમન્નં દાતવ્યં જીર્ણાનિ વસનાનિ ચ ।
પુલાકાશ્ચૈવ ધાન્યાનાં જીર્ણાશ્ચૈવ પરિચ્છદાઃ ॥ ૧૦.૧૨૫॥

ન શૂદ્રે પાતકં કિં ચિન્ન ચ સંસ્કારમર્હતિ ।
નાસ્યાધિકારો ધર્મેઽસ્તિ ન ધર્માત્પ્રતિષેધનમ્ ॥ ૧૦.૧૨૬॥

ધર્મેપ્સવસ્તુ ધર્મજ્ઞાઃ સતાં વૃત્તમનુષ્ઠિતાઃ । સતાં ધર્મં

મન્ત્રવર્જ્યં ન દુષ્યન્તિ પ્રશંસાં પ્રાપ્નુવન્તિ ચ ॥ ૧૦.૧૨૭॥ મન્ત્રવર્જં

યથા યથા હિ સદ્વૃત્તમાતિષ્ઠત્યનસૂયકઃ ।
તથા તથેમં ચામું ચ લોકં પ્રાપ્નોત્યનિન્દિતઃ ॥ ૧૦.૧૨૮॥

શક્તેનાપિ હિ શૂદ્રેણ ન કાર્યો ધનસઞ્ચયઃ ।
શૂદ્રો હિ ધનમાસાદ્ય બ્રાહ્મણાનેવ બાધતે ॥ ૧૦.૧૨૯॥

એતે ચતુર્ણાં વર્ણાનામાપદ્ધર્માઃ પ્રકીર્તિતાઃ ।
યાન્ સમ્યગનુતિષ્ઠન્તો વ્રજન્તિ પરમં ગતિમ્ ॥ ૧૦.૧૩૦॥

એષ ધર્મવિધિઃ કૃત્સ્નશ્ચાતુર્વર્ણ્યસ્ય કીર્તિતઃ ।
અતઃ પરં પ્રવક્ષ્યામિ પ્રાયશ્ચિત્તવિધિં શુભમ્ ॥ ૧૦.૧૩૧॥

## અધ્યાય ૧૧

સાન્તાનિકં યક્ષ્યમાણમધ્વગં સાર્વવેદસમ્ ।
ગુર્વર્થં પિતૃમાત્ર્યર્થં સ્વાધ્યાયાર્થ્યુપતાપિનઃ ॥ ૧૧.૧॥

ન વૈ તાન્ સ્નાતકાન્ વિદ્યાદ્બ્રાહ્મણાન્ ધર્મભિક્ષુકાન્ ।
નિઃસ્વેભ્યો દેયમેતેભ્યો દાનં વિદ્યાવિશેષતઃ ॥ ૧૧.૨॥

એતેભ્યો હિ દ્વિજાગ્ર્યેભ્યો દેયમન્નં સદક્ષિણમ્ ।
ઇતરેભ્યો બહિર્વેદિ કૃતાન્નં દેયમુચ્યતે ॥ ૧૧.૩॥

સર્વરત્નાનિ રાજા તુ યથાર્હં પ્રતિપાદયેત્ ।
બ્રાહ્મણાન્ વેદવિદુષો યજ્ઞાર્થં ચૈવ દક્ષિણામ્ ॥ ૧૧.૪॥

કૃતદારોઽપરાન્ દારાન્ ભિક્ષિત્વા યોઽધિગચ્છતિ ।
રતિમાત્રં ફલં તસ્ય દ્રવ્યદાતુસ્તુ સંતતિઃ ॥ ૧૧.૫॥

ધનાનિ તુ યથાશક્તિ વિપ્રેષુ પ્રતિપાદયેત્ ।
વેદવિત્સુ વિવિક્તેષુ પ્રેત્ય સ્વર્ગં સમશ્નુતે ॥ ૧૧.૬॥

યસ્ય ત્રૈવાર્ષિકં ભક્તં પર્યાપ્તં ભૃત્યવૃત્તયે ।
અધિકં વાઽપિ વિદ્યેત સ સોમં પાતુમર્હતિ ॥ ૧૧.૭॥

અતઃ સ્વલ્પીયસિ દ્રવ્યે યઃ સોમં પિબતિ દ્વિજઃ ।
સ પીતસોમપૂર્વોઽપિ ન તસ્યાપ્નોતિ તત્ફલમ્ ॥ ૧૧.૮॥

શક્તઃ પરજને દાતા સ્વજને દુઃખજીવિનિ ।
મધ્વાપાતો વિષાસ્વાદઃ સ ધર્મપ્રતિરૂપકઃ ॥ ૧૧.૯॥

ભૃત્યાનામુપરોધેન યત્કરોત્યૌર્ધ્વદેહિકમ્ ।
તદ્ભવત્યસુખોદર્કં જીવતશ્ચ મૃતસ્ય ચ ॥ ૧૧.૧૦॥

યજ્ઞશ્ચેત્પ્રતિરુદ્ધઃ સ્યાદેકેનાઙ્ગેન યજ્વનઃ ।
બ્રાહ્મણસ્ય વિશેષેન ધાર્મિકે સતિ રાજનિ ॥ ૧૧.૧૧॥

યો વૈશ્યઃ સ્યાદ્બહુપશુર્હીનક્રતુરસોમપઃ ।
કુટુમ્બાત્તસ્ય તદ્દ્રવ્યમાહરેદ્યજ્ઞસિદ્ધયે ॥ ૧૧.૧૨॥

આહરેત્ત્રીણિ વા દ્વે વા કામં શૂદ્રસ્ય વેશ્મનઃ ।
ન હિ શૂદ્રસ્ય યજ્ઞેષુ કશ્ચિદસ્તિ પરિગ્રહઃ ॥ ૧૧.૧૩॥

યોઽનાહિતાગ્નિઃ શતગુરયજ્વા ચ સહસ્રગુઃ । અયજ્ઞશ્
તયોરપિ કુટુમ્બાભ્યામાહરેદવિચારયન્ ॥ ૧૧.૧૪॥

આદાનનિત્યાચ્ચાદાતુરાહરેદપ્રયચ્છતઃ ।
તથા યશોઽસ્ય પ્રથતે ધર્મશ્ચૈવ પ્રવર્ધતે ॥ ૧૧.૧૫॥

તથૈવ સપ્તમે ભક્તે ભક્તાનિ ષડનશ્નતા ।
અશ્વસ્તનવિધાનેન હર્તવ્યં હીનકર્મણઃ ॥ ૧૧.૧૬॥

ખલાત્ક્ષેત્રાદગારાદ્વા યતો વાઽપ્યુપલભ્યતે ।
આખ્યાતવ્યં તુ તત્તસ્મૈ પૃચ્છતે યદિ પૃચ્છતિ ॥ ૧૧.૧૭॥

બ્રાહ્મણસ્વં ન હર્તવ્યં ક્ષત્રિયેણ કદા ચન ।
દસ્યુનિષ્ક્રિયયોસ્તુ સ્વમજીવન્ હર્તુમર્હતિ ॥ ૧૧.૧૮॥

યોઽસાધુભ્યોઽર્થમાદાય સાધુભ્યઃ સમ્પ્રયચ્છતિ ।
સ કૃત્વા પ્લવમાત્માનં સંતારયતિ તાવુભૌ ॥ ૧૧.૧૯॥

યદ્ધનં યજ્ઞશીલાનાં દેવસ્વં તદ્વિદુર્બુધાઃ ।
અયજ્વનાં તુ યદ્વિત્તમાસુરસ્વં તદુચ્યતે ॥ ૧૧.૨૦॥

ન તસ્મિન્ ધારયેદ્દણ્ડં ધાર્મિકઃ પૃથિવીપતિઃ ।
ક્ષત્રિયસ્ય હિ બાલિશ્યાદ્બ્રાહ્મણઃ સીદતિ ક્ષુધા ॥ ૧૧.૨૧॥

તસ્ય ભૃત્યજનં જ્ઞાત્વા સ્વકુટુમ્બાન્ મહીપતિઃ ।
શ્રુતશીલે ચ વિજ્ઞાય વૃત્તિં ધર્મ્યાં પ્રકલ્પયેત્ ॥ ૧૧.૨૨॥

કલ્પયિત્વાऽસ્ય વૃત્તિં ચ રક્ષેદેનં સમન્તતઃ ।
રાજા હિ ધર્મષડ્ભાગં તસ્માત્પ્રાપ્નોતિ રક્ષિતાત્ ॥ ૧૧.૨૩॥

ન યજ્ઞાર્થં ધનં શૂદ્રાદ્વિપ્રો ભિક્ષેત કર્હિ ચિત્ ।
યજમાનો હિ ભિક્ષિત્વા ચણ્ડાલઃ પ્રેત્ય જાયતે ॥ ૧૧.૨૪॥

યજ્ઞાર્થમર્થં ભિક્ષિત્વા યો ન સર્વં પ્રયચ્છતિ ।
સ યાતિ ભાસતાં વિપ્રઃ કાકતાં વા શતં સમાઃ ॥ ૧૧.૨૫॥

દેવસ્વં બ્રાહ્મણસ્વં વા લોભેનોપહિનસ્તિ યઃ ।
સ પાપાત્મા પરે લોકે ગૃધ્રોચ્છિષ્ટેન જીવતિ ॥ ૧૧.૨૬॥

ઇષ્ટિં વૈશ્વાનરીં નિત્યં નિર્વપેદબ્દપર્યયે ।
કૢપ્તાનાં પશુસોમાનાં નિષ્કૃત્યર્થમસમ્ભવે ॥ ૧૧.૨૭॥

આપત્કલ્પેન યો ધર્મં કુરુતેऽનાપદિ દ્વિજઃ ।
સ નાપ્નોતિ ફલં તસ્ય પરત્રેતિ વિચારિતમ્ ॥ ૧૧.૨૮॥

વિશ્વૈશ્ચ દેવૈઃ સાધ્યૈશ્ચ બ્રાહ્મણૈશ્ચ મહર્ષિભિઃ ।
આપત્સુ મરણાદ્ભીતૈર્વિધેઃ પ્રતિનિધિઃ કૃતઃ ॥ ૧૧.૨૯॥

પ્રભુઃ પ્રથમકલ્પસ્ય યોऽનુકલ્પેન વર્તતે ।
ન સામ્પરાયિકં તસ્ય દુર્મતેર્વિદ્યતે ફલમ્ ॥ ૧૧.૩૦॥

ન બ્રાહ્મણો વેદયેત કિઞ્ચિદ્રાજનિ ધર્મવિત્ ।
સ્વવીર્યેણૈવ તાંશિષ્યાન્ માનવાનપકારિણઃ ॥ ૧૧.૩૧॥

સ્વવીર્યાદ્રાજવીર્યાચ્ચ સ્વવીર્યં બલવત્તરમ્ ।
તસ્માત્સ્વેનૈવ વીર્યેણ નિગૃહ્ણીયાદરીન્ દ્વિજઃ ॥ ૧૧.૩૨॥

શ્રુતીરથર્વાઙ્ગિરસીઃ કુર્યાદિત્યવિચારયન્ ।
વાક્શસ્ત્રં વૈ બ્રાહ્મણસ્ય તેન હન્યાદરીન્ દ્વિજઃ ॥ ૧૧.૩૩॥

ક્ષત્રિયો બાહુવીર્યેણ તરેદાપદમાત્મનઃ ।
ધનેન વૈશ્યશૂદ્રૌ તુ જપહોમૈર્દ્વિજોત્તમઃ ॥ ૧૧.૩૪॥

વિધાતા શાસિતા વક્તા મૈત્રો બ્રાહ્મણ ઉચ્યતે ।
તસ્મૈ નાકુશલં બ્રૂયાન્ન શુષ્કાં ગિરમીરયેત્ ॥ ૧૧.૩૫॥

ન વૈ કન્યા ન યુવતિર્નાલ્પવિદ્યો ન બાલિશઃ ।

હોતા સ્યાદગ્નિહોત્રસ્ય નાર્તો નાસંસ્કૃતસ્તથા ॥ ૧૧.૩૬॥

નરકે હિ પતન્ત્યેતે જુહ્વન્તઃ સ ચ યસ્ય તત્ । જુહ્વતઃ
તસ્માદ્વૈતાનકુશલો હોતા સ્યાદ્વેદપારગઃ ॥ ૧૧.૩૭॥

પ્રાજાપત્યમદત્ત્વાઽશ્વમગ્ન્યાધેયસ્ય દક્ષિણામ્ ।
અનાહિતાગ્નિર્ભવતિ બ્રાહ્મણો વિભવે સતિ ॥ ૧૧.૩૮॥

પુણ્યાન્યન્યાનિ કુર્વીત શ્રદ્દધાનો જિતેન્દ્રિયઃ ।
ન ત્વલ્પદક્ષિણૈર્યજ્ઞૈર્યજેતેહ કથં ચન ॥ ૧૧.૩૯॥

ઇન્દ્રિયાણિ યશઃ સ્વર્ગમાયુઃ કીર્તિં પ્રજાઃ પશૂન્ ।
હન્ત્યલ્પદક્ષિણો યજ્ઞસ્તસ્માન્નાલ્પધનો યજેત્ ॥ ૧૧.૪૦॥

અગ્નિહોત્ર્યપવિધ્યાગ્નીન્ બ્રાહ્મણઃ કામકારતઃ ।
ચાન્દ્રાયણં ચરેન્ માસં વીરહત્યાસમં હિ તત્ ॥ ૧૧.૪૧॥

યે શૂદ્રાદધિગમ્યાર્થમગ્નિહોત્રમુપાસતે ।
ઋત્વિજસ્તે હિ શૂદ્રાણાં બ્રહ્મવાદિષુ ગર્હિતાઃ ॥ ૧૧.૪૨॥

તેષાં સતતમજ્ઞાનાં વૃષલાગ્ન્યુપસેવિનામ્ ।
પદા મસ્તકમાક્રમ્ય દાતા દુર્ગાણિ સંતરેત્ ॥ ૧૧.૪૩॥

અકુર્વન્ વિહિતં કર્મ નિન્દિતં ચ સમાચરન્ ।
પ્રસક્તશ્ચેન્દ્રિયાર્થેષુ પ્રાયશ્ચિત્તીયતે નરઃ ॥ ૧૧.૪૪॥ પ્રસજ્જનિન્દ્રિયાર્થેષુ

અકામતઃ કૃતે પાપે પ્રાયશ્ચિત્તં વિદુર્બુધાઃ ।
કામકારકૃતેઽપ્યાહુરેકે શ્રુતિનિદર્શનાત્ ॥ ૧૧.૪૫॥

અકામતઃ કૃતં પાપં વેદાભ્યાસેન શુધ્યતિ ।
કામતસ્તુ કૃતં મોહાત્પ્રાયશ્ચિત્તૈઃ પૃથગ્વિધૈઃ ॥ ૧૧.૪૬॥

પ્રાયશ્ચિત્તીયતાં પ્રાપ્ય દૈવાત્પૂર્વકૃતેન વા ।
ન સંસર્ગં વ્રજેત્સદ્ભિઃ પ્રાયશ્ચિત્તેઽકૃતે દ્વિજઃ ॥ ૧૧.૪૭॥

ઇહ દુશ્ચરિતૈઃ કે ચિત્કે ચિત્પૂર્વકૃતૈસ્તથા ।
પ્રાપ્નુવન્તિ દુરાત્માનો નરા રૂપવિપર્યયમ્ ॥ ૧૧.૪૮॥

સુવર્ણચૌરઃ કૌનખ્યં સુરાપઃ શ્યાવદન્તતામ્ ।
બ્રહ્મહા ક્ષયરોગિત્વં દૌશ્ચર્મ્યં ગુરુતલ્પગઃ ॥ ૧૧.૪૯॥

પિશુનઃ પૌતિનાસિક્યં સૂચકઃ પૂતિવક્ત્રતામ્ ।
ધાન્યચૌરોઽઙ્ગહીનત્વમાતિરૈક્યં તુ મિશ્રકઃ ॥ ૧૧.૫૦॥

અન્નહર્તાઽમયાવિત્વં મૌક્યં વાગપહારકઃ ।
વસ્ત્રાપહારકઃ શ્વૈત્ર્યં પઙ્ગુતામશ્વહારકઃ ॥ ૧૧.૫૧॥

એવં કર્મવિશેષેણ જાયન્તે સદ્ભિગર્હિતાઃ ।
જડમૂકાન્ધબધિરા વિકૃતાકૃતયસ્તથા ॥ ૧૧.૫૨॥

ચરિતવ્યમતો નિત્યં પ્રાયશ્ચિત્તં વિશુદ્ધયે ।
નિન્દ્યૈર્હિ લક્ષણૈર્યુક્તા જાયન્તેઽનિષ્કૃતેનસઃ ॥ ૧૧.૫૩॥

બ્રહ્મહત્યા સુરાપાનં સ્તેયં ગુર્વઙ્ગનાગમઃ ।
મહાન્તિ પાતકાન્યાહુઃ સંસર્ગશ્ચાપિ તૈઃ સહ ॥ ૧૧.૫૪॥

અનૃતં ચ સમુત્કર્ષે રાજગામિ ચ પૈશુનમ્ ।
ગુરોશ્ચાલીકનિર્બન્ધઃ સમાનિ બ્રહ્મહત્યયા ॥ ૧૧.૫૫॥

બ્રહ્મોજ્ઝતા વેદનિન્દા કૌટસાક્ષ્યં સુહૃદ્વધઃ ।
ગર્હિતાનાદ્યયોર્જગ્ધિઃ સુરાપાનસમાનિ ષટ્ ॥ ૧૧.૫૬॥

નિક્ષેપસ્યાપહરણં નરાશ્વરજતસ્ય ચ ।
ભૂમિવજ્રમણીનાં ચ રુક્મસ્તેયસમં સ્મૃતમ્ ॥ ૧૧.૫૭॥

રેતઃસેકઃ સ્વયોનીષુ કુમારીષ્વન્ત્યજાસુ ચ ।
સખ્યુઃ પુત્રસ્ય ચ સ્ત્રીષુ ગુરુતલ્પસમં વિદુઃ ॥ ૧૧.૫૮॥

ગોવધોઽયાજ્યસંયાજ્યં પારદાર્યાત્મવિક્રયઃ ।
ગુરુમાતૃપિતૃત્યાગઃ સ્વાધ્યાયાગ્ન્યોઃ સુતસ્ય ચ ॥ ૧૧.૫૯॥

પરિવિત્તિતાઽનુજેઽનૂઢે પરિવેદનમેવ ચ ।
તયોર્દાનં ચ કન્યાયાસ્તયોરેવ ચ યાજનમ્ ॥ ૧૧.૬૦॥

કન્યાયા દૂષણં ચૈવ વાર્ધુષ્યં વ્રતલોપનમ્ ।
તડાગારામદારાણામપત્યસ્ય ચ વિક્રયઃ ॥ ૧૧.૬૧॥

વ્રાત્યતા બાન્ધવત્યાગો ભૃત્યાધ્યાપનમેવ ચ ।
ભૃત્યા ચાધ્યયનાદાનમપણ્યાનાં ચ વિક્રયઃ ॥ ૧૧.૬૨॥ ભૃતાચ્ચાધ્યયનાદાનમ્

સર્વાકારેષ્વધીકારો મહાયન્ત્રપ્રવર્તનમ્ ।
હિંસૌષધીનાં સ્ત્ર્યાજીવોઽભિચારો મૂલકર્મ ચ ॥ ૧૧.૬૩॥

ઇન્ધનાર્થમશુષ્કાણાં દ્રુમાણામવપાતનમ્ ।
આત્માર્થં ચ ક્રિયારમ્ભો નિન્દિતાન્નાદનં તથા ॥ ૧૧.૬૪॥

અનાહિતાગ્નિતા સ્તેયં ઋણાનામનપક્રિયા ।
અસત્શાસ્ત્રાધિગમનં કૌશીલવ્યસ્ય ચ ક્રિયા ॥ ૧૧.૬૫॥

ધાન્યકુપ્યપશુસ્તેયં મદ્યપસ્ત્રીનિષેવણમ્ ।
સ્ત્રીશૂદ્રવિટ્ક્ષત્રવધો નાસ્તિક્યં ચોપપાતકમ્ ॥ ૧૧.૬૬॥

બ્રાહ્મણસ્ય રુજઃ કૃત્વા  ઘ્રાતિરઘ્રેયમદ્યયોઃ ।
જૈહ્મ્યં ચ મૈથુનં પુંસિ જાતિભ્રંશકરં સ્મૃતમ્ ॥ ૧૧.૬૭॥

ખરાશ્વોષ્ટ્રમૃગૈભાનામજાવિકવધસ્તથા ।
સઙ્કુરીકરણં જ્ઞેયં મીનાહિમહિષસ્ય ચ ॥ ૧૧.૬૮॥

નિન્દિતેભ્યો ધનાદાનં વાણિજ્યં શૂદ્રસેવનમ્ ।
અપાત્રીકરણં જ્ઞેયમસત્યસ્ય ચ ભાષણમ્ ॥ ૧૧.૬૯॥

કૃમિકીટવયોહત્યા મદ્યાનુગતભોજનમ્ ।
ફલેધઃ। કુસુમસ્તેયમધૈર્યં ચ મલાવહમ્ ॥ ૧૧.૭૦॥

એતાન્યેનાંસિ સર્વાણિ યથોક્તાનિ પૃથક્પૃથક્ ।
યૈર્યૈર્વ્રતૈરપોહ્યન્તે તાનિ સમ્યઙ્નિબોધત ॥ ૧૧.૭૧॥

બ્રહ્મહા દ્વાદશ સમાઃ કુટીં કૃત્વા વને વસેત્ ।
ભૈક્ષાશ્યાત્મવિશુદ્ધ્યર્થં કૃત્વા શવશિરો ધ્વજમ્ ॥ ૧૧.૭૨॥

લક્ષ્યં શસ્ત્રભૃતાં વા સ્યાદ્વિદુષામિચ્છયાઽત્મનઃ ।
પ્રાસ્યેદાત્માનમગ્નૌ વા સમિદ્ધે ત્રિરવાક્શિરાઃ ॥ ૧૧.૭૩॥

યજેત વાઽશ્વમેધેન સ્વર્જિતા ગોસવેન વા ।
અભિજિદ્વિશ્વજિદ્ભ્યાં વા ત્રિવૃતાઽગ્નિષ્ટુતાઽપિ વા ॥ ૧૧.૭૪॥

જપન્ વાઽન્યતમં વેદં યોજનાનાં શતં વ્રજેત્ ।
બ્રહ્મહત્યાપનોદાય મિતભુઙ્નિયતેન્દ્રિયઃ ॥ ૧૧.૭૫॥

સર્વસ્વં વેદવિદુષે બ્રાહ્મણાયોપપાદયેત્ ।
ધનં હિ જીવનાયાલં ગૃહં વા સપરિચ્છદમ્ ॥ ૧૧.૭૬॥

હવિષ્યભુગ્વાઽનુસરેત્પ્રતિસ્રોતઃ સરસ્વતીમ્ ।

જપેદ્વા નિયતાહારસ્ત્રિર્વૈ વેદસ્ય સંહિતામ્ ॥ ૧૧.૭૭॥

કૃતવાપનો નિવસેદ્ગ્રામાન્તે ગોવ્રજેઽપિ વા ।
આશ્રમે વૃક્ષમૂલે વા ગોબ્રાહ્મણહિતે રતઃ ॥ ૧૧.૭૮॥

બ્રાહ્મણાર્થે ગવાર્થે વા સદ્યઃ પ્રાણાન્ પરિત્યજેત્ । સંયક્પ્રાણાન્
મુચ્યતે બ્રહ્મહત્યાયા ગોપ્તા ગોર્બ્રાહ્મણસ્ય ચ ॥ ૧૧.૭૯॥

ત્રિવારં પ્રતિરોદ્ધા વા સર્વસ્વમવજિત્ય વા । ત્ર્યવરં
વિપ્રસ્ય તન્નિમિત્તે વા પ્રાણાલાભે વિમુચ્યતે ॥ ૧૧.૮૦॥ પ્રાણાલાભેઽપિ મુચ્યતે

એવં દૃઢવ્રતો નિત્યં બ્રહ્મચારી સમાહિતઃ ।
સમાપ્તે દ્વાદશે વર્ષે બ્રહ્મહત્યાં વ્યપોહતિ ॥ ૧૧.૮૧॥

શિષ્ટ્વા વા ભૂમિદેવાનાં નરદેવસમાગમે ।
સ્વમેનોઽવભૃથસ્નાતો હયમેધે વિમુચ્યતે ॥ ૧૧.૮૨॥

ધર્મસ્ય બ્રાહ્મણો મૂલમગ્રં રાજન્ય ઉચ્યતે ।
તસ્માત્સમાગમે તેષામેનો વિખ્યાપ્ય શુધ્યતિ ॥ ૧૧.૮૩॥

બ્રહ્મણઃ સમ્ભવેનૈવ દેવાનામપિ દૈવતમ્ ।
પ્રમાણં ચૈવ લોકસ્ય બ્રહ્માત્રૈવ હિ કારણમ્ ॥ ૧૧.૮૪॥

તેષાં વેદવિદો બ્રૂયુસ્ત્રયોઽપ્યેનઃ સુનિષ્કૃતિમ્ ।
સા તેષાં પાવનાય સ્યાત્પવિત્રા વિદુષાં હિ વાક્ ॥ ૧૧.૮૫॥ પવિત્રં

અતોઽન્યતમમાસ્થાય વિધિં વિપ્રઃ સમાહિતઃ ।
બ્રહ્મહત્યાકૃતં પાપં વ્યપોહત્યાત્મવત્તયા ॥ ૧૧.૮૬॥

હત્વા ગર્ભમવિજ્ઞાતમેતદેવ વ્રતં ચરેત્ ।
રાજન્યવૈશ્યૌ ચૈજાનાવાત્રેયીમેવ ચ સ્ત્રિયમ્ ॥ ૧૧.૮૭॥

ઉક્ત્વા ચૈવાનૃતં સાક્ષ્યે પ્રતિરુધ્ય ગુરું તથા । પ્રતિરભ્ય
અપહૃત્ય ચ નિઃક્ષેપં કૃત્વા ચ સ્ત્રીસુહૃત્વધમ્ ॥ ૧૧.૮૮॥ નિક્ષેપં

ઇયં વિશુદ્ધિરુદિતા પ્રમાપ્યાકામતો દ્વિજમ્ ।
કામતો બ્રાહ્મણવધે નિષ્કૃતિર્ન વિધીયતે ॥ ૧૧.૮૯॥

સુરાં પીત્વા દ્વિજો મોહાદગ્નિવર્ણાં સુરાં પિબેત્ ।
તયા સ કાયે નિર્દગ્ધે મુચ્યતે કિલ્બિષાત્તતઃ ॥ ૧૧.૯૦॥

ગોમૂત્રમગ્નિવર્ણં વા પિબેદુદકમેવ વા ।
પયો ઘૃતં વાऽ મરણાદ્ગોશકૃદ્રસમેવ વા ॥ ૧૧.૯૧॥

કણાન્ વા ભક્ષયેદબ્દં પિણ્યાકં વા સકૃન્નિશિ ।
સુરાપાનાપનુત્ત્યર્થં વાલવાસા જટી ધ્વજી ॥ ૧૧.૯૨॥

સુરા વૈ મલમન્નાનાં પાપ્મા ચ મલમુચ્યતે ।
તસ્માદ્બ્રાહ્મણરાજન્યૌ વૈશ્યશ્ચ ન સુરાં પિબેત્ ॥ ૧૧.૯૩॥

ગૌડી પૈષ્ટી ચ માધ્વી ચ વિજ્ઞેયા ત્રિવિધા સુરા ।
યથૈવૈકા તથા સર્વા ન પાતવ્યા દ્વિજોત્તમૈઃ ॥ ૧૧.૯૪॥

યક્ષરક્ષઃ। પિશાચાન્નં મદ્યં માંસં સુરાસવમ્ ।
તદ્બ્રાહ્મણેન નાત્તવ્યં દેવાનામશ્નતા હવિઃ ॥ ૧૧.૯૫॥

અમેધ્યે વા પતેન્ મત્તો વૈદિકં વાऽપ્યુદાહરેત્ ।
અકાર્યમન્યત્કુર્યાદ્વા બ્રાહ્મણો મદમોહિતઃ ॥ ૧૧.૯૬॥

યસ્ય કાયગતં બ્રહ્મ મદ્યેનાપ્લાવ્યતે સકૃત્ ।
તસ્ય વ્યપૈતિ બ્રાહ્મણ્યં શૂદ્રત્વં ચ સ ગચ્છતિ ॥ ૧૧.૯૭॥

એષા વિચિત્રાભિહિતા સુરાપાનસ્ય નિષ્કૃતિઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ સુવર્ણસ્તેયનિષ્કૃતિમ્ ॥ ૧૧.૯૮॥

સુવર્ણસ્તેયકૃદ્વિપ્રો રાજાનમભિગમ્ય તુ ।
સ્વકર્મ ખ્યાપયન્ બ્રૂયાત્માં ભવાનનુશાસ્ત્વિતિ ॥ ૧૧.૯૯॥

ગૃહીત્વા મુસલં રાજા સકૃદ્ધન્યાત્તુ તં સ્વયમ્ ।
વધેન શુધ્યતિ સ્તેનો બ્રાહ્મણસ્તપસૈવ તુ ॥ ૧૧.૧૦૦॥

તપસાપનુનુત્સુસ્તુ સુવર્ણસ્તેયજં મલમ્ ।
ચીરવાસા દ્વિજોऽરણ્યે ચરેદ્બ્રહ્મહનો વ્રતમ્ ॥ ૧૧.૧૦૧॥

એતૈર્વ્રતૈરપોહેત પાપં સ્તેયકૃતં દ્વિજઃ ।
ગુરુસ્ત્રીગમનીયં તુ વ્રતૈરેભિરપાનુદેત્ ॥ ૧૧.૧૦૨॥

ગુરુતલ્પ્યભિભાષ્યૈનસ્તપ્તે સ્વપ્યાદયોમયે । તલ્પે સ્વપ્યાદ્
સૂર્મીં જ્વલન્તીં સ્વાશ્લિષ્યેન્ મૃત્યુના સ વિશુધ્યતિ ॥ ૧૧.૧૦૩॥ વાऽશ્લિષ્યેન્

સ્વયં વા શિશ્નવૃષણાવુત્કૃત્યાધાય ચાઞ્જલૌ ।
નૈરૃતીં દિશમાતિષ્ઠેદા નિપાતાદજિહ્મગઃ ॥ ૧૧.૧૦૪॥

ખટ્વાઙ્ગી ચીરવાસા વા શ્મશ્રુલો વિજને વને ।
પ્રાજાપત્યં ચરેત્કૃચ્છ્રમબ્દમેકં સમાહિતઃ ॥ ૧૧.૧૦૫॥

ચાન્દ્રાયણં વા ત્રીન્ માસાનભ્યસ્યેન્નિયતેન્દ્રિયઃ ।
હવિષ્યેણ યવાગ્વા વા ગુરુતલ્પાપનુત્તયે ॥ ૧૧.૧૦૬॥

એતૈર્વ્રતૈરપોહેયુર્મહાપાતકિનો મલમ્ ।
ઉપપાતકિનસ્ત્વેવમેભિર્નાનાવિધૈર્વ્રતૈઃ ॥ ૧૧.૧૦૭॥

ઉપપાતકસંયુક્તો ગોઘ્નો માસં યવાન્ પિબેત્ ।
કૃતવાપો વસેદ્ગોષ્ઠે ચર્મણા તેન સંવૃતઃ ॥ ૧૧.૧૦૮॥

ચતુર્થકાલમશ્નીયાદક્ષારલવણં મિતમ્ ।
ગોમૂત્રેણાચરેત્સ્નાનં દ્વૌ માસૌ નિયતેન્દ્રિયઃ ॥ ૧૧.૧૦૯॥

દિવાઽનુગચ્છેદ્ગાસ્તાસ્તુ તિષ્ઠન્નૂર્ધ્વં રજઃ પિબેત્ ।
શુશ્રૂષિત્વા નમસ્કૃત્ય રાત્રૌ વીરાસનં વસેત્ ॥ ૧૧.૧૧૦॥ વીરાસનો

તિષ્ઠન્તીષ્વનુતિષ્ઠેત્તુ વ્રજન્તીષ્વપ્યનુવ્રજેત્ ।
આસીનાસુ તથાઽસીનો નિયતો વીતમત્સરઃ ॥ ૧૧.૧૧૧॥

આતુરામભિશસ્તાં વા ચૌરવ્યાઘ્રાદિભિર્ભયૈઃ ।
પતિતાં પઙ્કલગ્નાં વા સર્વોપાયૈર્વિમોચયેત્ ॥ ૧૧.૧૧૨॥ સર્વપ્રાણૈર્વિમોચયેત્

ઉષ્ણે વર્ષતિ શીતે વા મારુતે વાતિ વા ભૃશમ્ ।
ન કુર્વીતાત્મનસ્ત્રાણં ગોરકૃત્વા તુ શક્તિતઃ ॥ ૧૧.૧૧૩॥

આત્મનો યદિ વાઽન્યેષાં ગૃહે ક્ષેત્રેઽથ વા ખલે ।
ભક્ષયન્તીં ન કથયેત્પિબન્તં ચૈવ વત્સકમ્ ॥ ૧૧.૧૧૪॥

અનેન વિધિના યસ્તુ ગોઘ્નો ગામનુગચ્છતિ ।
સ ગોહત્યાકૃતં પાપં ત્રિભિર્માસૈર્વ્યપોહતિ ॥ ૧૧.૧૧૫॥

વૃષભૈકાદશા ગાશ્ચ દદ્યાત્સુચરિતવ્રતઃ ।
અવિદ્યમાને સર્વસ્વં વેદવિદ્ભ્યો નિવેદયેત્ ॥ ૧૧.૧૧૬॥

એતદેવ વ્રતં કુર્યુરુપપાતકિનો દ્વિજાઃ ।
અવકીર્ણિવર્જ્યં શુદ્ધ્યર્થં ચાન્દ્રાયણમથાપિ વા ॥ ૧૧.૧૧૭॥ અવકીર્ણિવર્જં

અવકીર્ણી તુ કાણેન ગર્દભેન ચતુષ્પથે ।

પાકયજ્ઞવિધાનેન યજેત નિર્ઋતિં નિશિ ॥ ૧૧.૧૧૮॥

હુત્વાઽગ્નૌ વિધિવધોમાનન્તતશ્ચ સમિત્યૃચા ।
વાતેન્દ્રગુરુવહ્નીનાં જુહુયાત્સર્પિષાઽહુતીઃ ॥ ૧૧.૧૧૯॥

કામતો રેતસઃ સેકં વ્રતસ્થસ્ય દ્વિજન્મનઃ ।
અતિક્રમં વ્રતસ્યાહુર્ધર્મજ્ઞા બ્રહ્મવાદિનઃ ॥ ૧૧.૧૨૦॥

મારુતં પુરુહૂતં ચ ગુરું પાવકમેવ ચ ।
ચતુરો વ્રતિનોઽભ્યેતિ બ્રાહ્મં તેજોઽવકીર્ણિનઃ ॥ ૧૧.૧૨૧॥

એતસ્મિન્નેનસિ પ્રાપ્તે વસિત્વા ગર્દભાજિનમ્ ।
સપ્તાગારાંશ્ચરેદ્ભૈક્ષં સ્વકર્મ પરિકીર્તયન્ ॥ ૧૧.૧૨૨॥

તેભ્યો લબ્ધેન ભૈક્ષેણ વર્તયન્નેકકાલિકમ્ ।
ઉપસ્પૃશંસ્ત્રિષવણં ત્વબ્દેન સ વિશુધ્યતિ ॥ ૧૧.૧૨૩॥ ત્રિષવણં અબ્દેન

જાતિભ્રંશકરં કર્મ કૃત્વાઽન્યતમમિચ્છયા ।
ચરેત્સાંતપનં કૃચ્છ્રં પ્રાજાપત્યમનિચ્છયા ॥ ૧૧.૧૨૪॥

સઙ્કરાપાત્રકૃત્યાસુ માસં શોધનમૈન્દવમ્ । ઐન્દવઃ
મલિનીકરણીયેષુ તપ્તઃ સ્યાદ્યાવકૈસ્ત્ર્યહમ્ ॥ ૧૧.૧૨૫॥

તુરીયો બ્રહ્મહત્યાયાઃ ક્ષત્રિયસ્ય વધે સ્મૃતઃ ।
વૈશ્યેઽષ્ટમાંશો વૃત્તસ્થે શૂદ્રે જ્ઞેયસ્તુ ષોડશઃ ॥ ૧૧.૧૨૬॥

અકામતસ્તુ રાજન્યં વિનિપાત્ય દ્વિજોત્તમઃ ।
વૃષભૈકસહસ્રા ગા દદ્યાત્સુચરિતવ્રતઃ ॥ ૧૧.૧૨૭॥

ત્ર્યબ્દં ચરેદ્વા નિયતો જટી બ્રહ્મહનો વ્રતમ્ ।
વસન્ દૂરતરે ગ્રામાદ્વૃક્ષમૂલનિકેતનઃ ॥ ૧૧.૧૨૮॥

એતદેવ ચરેદબ્દં પ્રાયશ્ચિત્તં દ્વિજોત્તમઃ ।
પ્રમાપ્ય વૈશ્યં વૃત્તસ્થં દદ્યાચ્ચૈકશતં ગવામ્ ॥ ૧૧.૧૨૯॥ દદ્યાદ્વૈકશતં ગવામ્

એતદેવ વ્રતં કૃત્સ્નં ષણ્માસાંશૂદ્રહા ચરેત્)।
વૃષભૈકાદશા વાઽપિ દદ્યાદ્વિપ્રાય ગાઃ સિતાઃ ॥ ૧૧.૧૩૦॥

માર્જારનકુલૌ હત્વા ચાષં મણ્ડૂકમેવ ચ ।
શ્વગોધોલૂકકાકાંશ્ચ શૂદ્રહત્યાવ્રતં ચરેત્ ॥ ૧૧.૧૩૧॥

પયઃ પિબેત્ત્રિરાત્રં વા યોજનં વાઽધ્વનો વ્રજેત્ ।
ઉપસ્પૃશેત્સ્રવન્ત્યાં વા સૂક્તં વાઽબ્।દૈવતં જપેત્ ॥ ૧૧.૧૩૨॥

અભ્રિં કાર્ષ્ણાયસીં દદ્યાત્સર્પં હત્વા દ્વિજોત્તમઃ ।
પલાલભારકં ષણ્ઢે સૈસકં ચૈકમાષકમ્ ॥ ૧૧.૧૩૩॥

ઘૃતકુમ્ભં વરાહે તુ તિલદ્રોણં તુ તિત્તિરૌ ।
શુકે દ્વિહાયનં વત્સં ક્રૌઞ્ચં હત્વા ત્રિહાયનમ્ ॥ ૧૧.૧૩૪॥

હત્વા હંસં બલાકાં ચ બકં બર્હિણમેવ ચ ।
વાનરં શ્યેનભાસૌ ચ સ્પર્શયેદ્બ્રાહ્મણાય ગામ્ ॥ ૧૧.૧૩૫॥

વાસો દદ્યાધયં હત્વા પઞ્ચ નીલાન્ વૃષાન્ ગજમ્ ।
અજમેષાવનડ્વાહં ખરં હત્વૈકહાયનમ્ ॥ ૧૧.૧૩૬॥

ક્રવ્યાદાંસ્તુ મૃગાન્ હત્વા ધેનું દદ્યાત્પયસ્વિનીમ્ ।
અક્રવ્યાદાન્ વત્સતરીમુષ્ટ્રં હત્વા તુ કૃષ્ણલમ્ ॥ ૧૧.૧૩૭॥

જીનકાર્મુકબસ્તાવીન્ પૃથગ્દદ્યાદ્વિશુદ્ધયે ।
ચતુર્ણામપિ વર્ણાનાં નારીર્હત્વાઽનવસ્થિતાઃ ॥ ૧૧.૧૩૮॥

દાનેન વધનિર્ણેકં સર્પાદીનામશક્નુવન્ ।
એકૈકશશ્ચરેત્કૃચ્છ્રં દ્વિજઃ પાપાપનુત્તયે ॥ ૧૧.૧૩૯॥

અસ્થિમતાં તુ સત્ત્વાનાં સહસ્રસ્ય પ્રમાપણે ।
પૂર્ણે ચાનસ્યનસ્થ્નાં તુ શૂદ્રહત્યાવ્રતં ચરેત્ ॥ ૧૧.૧૪૦॥

કિં ચિદેવ તુ વિપ્રાય દદ્યાદસ્થિમતાં વધે ।
અનસ્થ્નાં ચૈવ હિંસાયાં પ્રાણાયામેન શુધ્યતિ ॥ ૧૧.૧૪૧॥

ફલદાનાં તુ વૃક્ષાણાં છેદને જપ્યમૃચ્શતમ્ ।
ગુલ્મવલ્લીલતાનાં ચ પુષ્પિતાનાં ચ વીરુધામ્ ॥ ૧૧.૧૪૨॥

અન્નાદ્યજાનાં સત્ત્વાનાં રસજાનાં ચ સર્વશઃ ।
ફલપુષ્પોદ્ભવાનાં ચ ઘૃતપ્રાશો વિશોધનમ્ ॥ ૧૧.૧૪૩॥

કૃષ્ટજાનામોષધીનાં જાતાનાં ચ સ્વયં વને ।
વૃથાલમ્ભેઽનુગચ્છેદ્ગાં દિનમેકં પયોવ્રતઃ ॥ ૧૧.૧૪૪॥

એતૈર્વ્રતૈરપોહ્યં સ્યાદેનો હિંસાસમુદ્ભવમ્ ।
જ્ઞાનાજ્ઞાનકૃતં કૃત્સ્નં શ઼ૃણુતાનાદ્યભક્ષણે ॥ ૧૧.૧૪૫॥

અજ્ઞાનાદ્વારુણીં પીત્વા સંસ્કારેણૈવ શુધ્યતિ ।
મતિપૂર્વમનિર્દેશ્યં પ્રાણાન્તિકમિતિ સ્થિતિઃ ॥ ૧૧.૧૪૬ ॥

અપઃ સુરાભાજનસ્થા મદ્યભાણ્ડસ્થિતાસ્તથા ।
પઞ્ચરાત્રં પિબેત્પીત્વા શઙ્ખપુષ્પીશ‌ૃતં પયઃ ॥ ૧૧.૧૪૭ ॥

સ્પૃષ્ટ્વા દત્ત્વા ચ મદિરાં વિધિવત્પ્રતિગૃહ્ય ચ ।
શૂદ્રોચ્છિષ્ટાશ્ચ પીત્વાઽપઃ કુશવારિ પિબેત્ત્ર્યહમ્ ॥ ૧૧.૧૪૮ ॥

બ્રાહ્મણસ્તુ સુરાપસ્ય ગન્ધમાઘ્રાય સોમપઃ ।
પ્રાણાનપ્સુ ત્રિરાયમ્ય ઘૃતં પ્રાશ્ય વિશુધ્યતિ ॥ ૧૧.૧૪૯ ॥

અજ્ઞાનાત્પ્રાશ્ય વિણ્મૂત્રં સુરાસંસ્પૃષ્ટમેવ ચ ।
પુનઃ સંસ્કારમર્હન્તિ ત્રયો વર્ણા દ્વિજાતયઃ ॥ ૧૧.૧૫૦ ॥

વપનં મેખલા દણ્ડો ભૈક્ષચર્યા વ્રતાનિ ચ । ભૈક્ષ્યચર્યા
નિવર્તન્તે દ્વિજાતીનાં પુનઃસંસ્કારકર્મણિ ॥ ૧૧.૧૫૧ ॥

અભોજ્યાનાં તુ ભુક્ત્વાઽન્નં સ્ત્રીશૂદ્રોચ્છિષ્ટમેવ ચ ।
જગ્ધ્વા માંસમભક્ષ્યં ચ સપ્તરાત્રં યવાન્ પિબેત્ ॥ ૧૧.૧૫૨ ॥

શુક્તાનિ ચ કષાયાંશ્ચ પીત્વા મેધ્યાન્યપિ દ્વિજઃ ।
તાવદ્ભવત્યપ્રયતો યાવત્તન્ન વ્રજત્યધઃ ॥ ૧૧.૧૫૩ ॥

વિડ્વરાહખરોષ્ટ્રાણાં ગોમાયોઃ કપિકાકયોઃ ।
પ્રાશ્ય મૂત્રપુરીષાણિ દ્વિજશ્ચાન્દ્રાયણં ચરેત્ ॥ ૧૧.૧૫૪ ॥

શુષ્કાણિ ભુક્ત્વા માંસાનિ ભૌમાનિ કવકાનિ ચ ।
અજ્ઞાતં ચૈવ સૂનાસ્થમેતદેવ વ્રતં ચરેત્ ॥ ૧૧.૧૫૫ ॥

ક્રવ્યાદસૂકરોષ્ટ્રાણાં કુક્કુટાનાં ચ ભક્ષણે ।
નરકાકખરાણાં ચ તપ્તકૃચ્છ્રં વિશોધનમ્ ॥ ૧૧.૧૫૬ ॥

માસિકાન્નં તુ યોઽશ્નીયાદસમાવર્તકો દ્વિજઃ ।
સ ત્રીણ્યહાન્યુપવસેદેકાહં ચોદકે વસેત્ ॥ ૧૧.૧૫૭ ॥

બ્રહ્મચારી તુ યોઽશ્નીયાન્ મધુ માંસં કથં ચન । વ્રતચારી તુ
સ કૃત્વા પ્રાકૃતં કૃચ્છ્રં વ્રતશેષં સમાપયેત્ ॥ ૧૧.૧૫૮ ॥

બિડાલકાકાખૂચ્છિષ્ટં જગ્ધ્વા શ્વનકુલસ્ય ચ ।

કેશકીટાવપન્નં ચ પિબેદ્બ્રહ્મસુવર્ચલામ્ ॥ ૧૧.૧૫૯॥

અભોજ્યમન્નં નાત્તવ્યમાત્મનઃ શુદ્ધિમિચ્છતા ।
અજ્ઞાનભુક્તં તૂત્તાર્યં શોધ્યં વાઽપ્યાશુ શોધનૈઃ ॥ ૧૧.૧૬૦॥

એષોઽનાદ્યાદનસ્યોક્તો વ્રતાનાં વિવિધો વિધિઃ ।
સ્તેયદોષાપહર્તૄણાં વ્રતાનાં શ્રૂયતાં વિધિઃ ॥ ૧૧.૧૬૧॥

ધાન્યાન્નધનચૌર્યાણિ કૃત્વા કામાદ્દ્વિજોત્તમઃ ।
સ્વજાતીયગૃહાદેવ કૃચ્છ્રાબ્દેન વિશુધ્યતિ ॥ ૧૧.૧૬૨॥

મનુષ્યાણાં તુ હરણે સ્ત્રીણાં ક્ષેત્રગૃહસ્ય ચ ।
કૂપવાપીજલાનાં ચ શુદ્ધિશ્ચાન્દ્રાયણં સ્મૃતમ્ ॥ ૧૧.૧૬૩॥

દ્રવ્યાણામલ્પસારાણાં સ્તેયં  કૃત્વાઽન્યવેશ્મતઃ ।  કૃત્વાઽન્યવેશ્મનિ
ચરેત્સાંતપનં કૃચ્છ્રં તન્નિર્યાત્યાત્મશુદ્ધયે ॥ ૧૧.૧૬૪॥

ભક્ષ્યભોજ્યાપહરણે યાનશય્યાઽઽસનસ્ય ચ ।
પુષ્પમૂલફલાનાં ચ પઞ્ચગવ્યં વિશોધનમ્ ॥ ૧૧.૧૬૫॥

તૃણકાષ્ઠદ્રુમાણાં ચ શુષ્કાન્નસ્ય ગુડસ્ય ચ ।
ચેલચર્મામિષાણાં ચ ત્રિરાત્રં સ્યાદભોજનમ્ ॥ ૧૧.૧૬૬॥  ચૈલચર્મામિક્ષાણાં

મણિમુક્તાપ્રવાલાનાં તામ્રસ્ય રજતસ્ય ચ ।
અયઃ। કાંસ્યૌપલાનાં ચ દ્વાદશાહં કણાન્નતા ॥ ૧૧.૧૬૭॥

કાર્પાસકીટજોર્ણાનાં દ્વિશફૈકશફસ્ય ચ ।  દ્વેશફૈકખુરસ્ય ચ
પક્ષિગન્ધૌષધીનાં ચ રજ્જ્વાશ્ચૈવ ત્ર્યહં પયઃ ॥ ૧૧.૧૬૮॥

એતૈર્વ્રતૈરપોહેત પાપં સ્તેયકૃતં દ્વિજઃ ।
અગમ્યાગમનીયં તુ વ્રતૈરેભિરપાનુદેત્ ॥ ૧૧.૧૬૯॥

ગુરુતલ્પવ્રતં કુર્યાદ્રેતઃ સિક્ત્વા સ્વયોનિષુ ।
સખ્યુઃ પુત્રસ્ય ચ સ્ત્રીષુ કુમારીષ્વન્ત્યજાસુ ચ ॥ ૧૧.૧૭૦॥

પૈતૃસ્વસેયીં ભગિનીં સ્વસ્રીયાં માતુરેવ ચ ।
માતુશ્ચ ભ્રાતુસ્તનયાં ગત્વા  ચાન્દ્રાયણં ચરેત્ ॥ ૧૧.૧૭૧॥  ભ્રાતુરાપ્તસ્ય ગત્વા

એતાસ્તિસ્રસ્તુ ભાર્યાર્થે નોપયચ્છેત્તુ બુદ્ધિમાન્ ।
જ્ઞાતિત્વેનાનુપેયાસ્તાઃ પતતિ હ્યુપયન્નધઃ ॥ ૧૧.૧૭૨॥

અમાનુષીષૂ પુરુષ ઉદક્યાયામયોનિષુ ।
રેતઃ સિક્ત્વા જલે ચૈવ કૃચ્છ્રં સાંતપનં ચરેત્ ॥ ૧૧.૧૭૩॥

મૈથુનં તુ સમાસેવ્ય પુંસિ યોષિતિ વા દ્વિજઃ ।
ગોયાનેઽપ્સુ દિવા ચૈવ સવાસાઃ સ્નાનમાચરેત્ ॥ ૧૧.૧૭૪॥

ચણ્ડાલાન્ત્યસ્ત્રિયો ગત્વા ભુક્ત્વા ચ પ્રતિગૃહ્ય ચ ।
પતત્યજ્ઞાનતો વિપ્રો જ્ઞાનાત્સામ્યં તુ ગચ્છતિ ॥ ૧૧.૧૭૫॥

વિપ્રદુષ્ટાં સ્ત્રિયં ભર્તા નિરુન્ધ્યાદેકવેશ્મનિ ।
યત્પુંસઃ પરદારેષુ તચ્ચૈનાં ચારયેદ્વ્રતમ્ ॥ ૧૧.૧૭૬॥

સા ચેત્પુનઃ પ્રદુષ્યેત્તુ સદૃશેનોપમન્ત્રિતા । સદૃશેનોપયન્ત્રિતા
કૃચ્છ્રં ચાન્દ્રાયણં ચૈવ તદસ્યાઃ પાવનં સ્મૃતમ્ ॥ ૧૧.૧૭૭॥

યત્કરોત્યેકરાત્રેણ વૃષલીસેવનાદ્દ્વિજઃ ।
તદ્ભૈક્ષભુજ્જપન્નિત્યં ત્રિભિર્વર્ષૈર્વ્યપોહતિ ॥ ૧૧.૧૭૮॥

એષા પાપકૃતામુક્તા ચતુર્ણામપિ નિષ્કૃતિઃ ।
પતિતૈઃ સમ્પ્રયુક્તાનામિમાઃ શ◌ૃણુત નિષ્કૃતીઃ ॥ ૧૧.૧૭૯॥

સંવત્સરેણ પતતિ પતિતેન સહાચરન્ ।
યાજનાધ્યાપનાદ્યૌનાન્ન તુ યાનાસનાશનાત્ ॥ ૧૧.૧૮૦॥

યો યેન પતિતેનૈષાં સંસર્ગં યાતિ માનવઃ ।
સ તસ્યૈવ વ્રતં કુર્યાત્તત્સંસર્ગવિશુદ્ધયે ॥ ૧૧.૧૮૧॥

પતિતસ્યોદકં કાર્યં સપિણ્ડૈર્બાન્ધવૈર્બહિઃ ।
નિન્દિતેઽહનિ સાયાહ્ને જ્ઞાતિર્ત્વિગ્ગુરુસંનિધૌ ॥ ૧૧.૧૮૨॥

દાસી ઘટમપાં પૂર્ણં પર્યસ્યેત્પ્રેતવત્પદા ।
અહોરાત્રમુપાસીરન્નશૌચં બાન્ધવૈઃ સહ ॥ ૧૧.૧૮૩॥

નિવર્તેરંશ્ચ તસ્માત્તુ સમ્ભાષણસહાસને ।
દાયાદ્યસ્ય પ્રદાનં ચ યાત્રા ચૈવ હિ લૌકિકી ॥ ૧૧.૧૮૪॥

જ્યેષ્ઠતા ચ નિવર્તેત જ્યેષ્ઠાવાપ્યં ચ યદ્ધનમ્ । યદ્વસુ
જ્યેષ્ઠાંશં પ્રાપ્નુયાચ્ચાસ્ય યવીયાન્ ગુણતોઽધિકઃ ॥ ૧૧.૧૮૫॥

પ્રાયશ્ચિત્તે તુ ચરિતે પૂર્ણકુમ્ભમપાં નવમ્ ।
તેનૈવ સાર્ધં પ્રાસ્યેયુઃ સ્નાત્વા પુણ્યે જલાશયે ॥ ૧૧.૧૮૬॥

સ ત્વપ્સુ તં ઘટં પ્રાસ્ય પ્રવિશ્ય ભવનં સ્વકમ્ ।
સર્વાણિ જ્ઞાતિકાર્યાણિ યથાપૂર્વં સમાચરેત્ ॥ ૧૧.૧૮૭॥

એતદેવ વિધિં કુર્યાદ્યોષિત્સુ પતિતાસ્વપિ । એતમેવ વિધિં
વસ્ત્રાન્નપાનં દેયં તુ વસેયુશ્ચ ગૃહાન્તિકે ॥ ૧૧.૧૮૮॥

એનસ્વિભિરનિર્ણિક્તૈર્નાર્થં કિં ચિત્સહાચરેત્ ।
કૃતનિર્ણેજનાંશ્ચૈવ ન જુગુપ્સેત કર્હિ ચિત્ ॥ ૧૧.૧૮૯॥ કૃતનિર્ણેજનાંશ્ચૈતાન્

બાલઘ્નાંશ્ચ કૃતઘ્નાંશ્ચ વિશુદ્ધાનપિ ધર્મતઃ ।
શરણાગતહન્તૄંશ્ચ સ્ત્રીહન્તૄંશ્ચ ન સંવસેત્ ॥ ૧૧.૧૯૦॥

યેષાં દ્વિજાનાં સાવિત્રી નાનૂચ્યેત યથાવિધિ ।
તાંશ્ચારયિત્વા ત્રીન્ કૃચ્છ્રાન્ યથાવિધ્યોપનાયયેત્ ॥ ૧૧.૧૯૧॥

પ્રાયશ્ચિત્તં ચિકીર્ષન્તિ વિકર્મસ્થાસ્તુ યે દ્વિજાઃ ।
બ્રહ્મણા ચ પરિત્યક્તાસ્તેષામપ્યેતદાદિશેત્ ॥ ૧૧.૧૯૨॥

યદ્ગર્હિતેનાર્જયન્તિ કર્મણા બ્રાહ્મણા ધનમ્ ।
તસ્યોત્સર્ગેણ શુધ્યન્તિ જપ્યેન તપસૈવ ચ ॥ ૧૧.૧૯૩॥

જપિત્વા ત્રીણિ સાવિત્ર્યાઃ સહસ્રાણિ સમાહિતઃ ।
માસં ગોષ્ઠે પયઃ પીત્વા મુચ્યતેઽસત્પ્રતિગ્રહાત્ ॥ ૧૧.૧૯૪॥

ઉપવાસકૃશં તં તુ ગોવ્રજાત્પુનરાગતમ્ ।
પ્રણતં પ્રતિ પૃચ્છેયુઃ સામ્યં સૌમ્યેચ્છસીતિ કિમ્ ॥ ૧૧.૧૯૫॥

સત્યમુક્ત્વા તુ વિપ્રેષુ વિકિરેદ્યવસં ગવામ્ ।
ગોભિઃ પ્રવર્તિતે તીર્થે કુર્યુસ્તસ્ય પરિગ્રહમ્ ॥ ૧૧.૧૯૬॥

વ્રાત્યાનાં યાજનં કૃત્વા પરેષામન્ત્યકર્મ ચ ।
અભિચારમહીનં ચ ત્રિભિઃ કૃચ્છ્રૈર્વ્યપોહતિ ॥ ૧૧.૧૯૭॥

શરણાગતં પરિત્યજ્ય વેદં વિપ્લાવ્ય ચ દ્વિજઃ ।
સંવત્સરં યવાહારસ્તત્પાપમપસેધતિ ॥ ૧૧.૧૯૮॥

શ્વશ◌ૃગાલખરૈર્દષ્ટો ગ્રામ્યૈઃ ક્રવ્યાદ્ભિરેવ ચ ।
નરાશ્વોષ્ટ્રવરાહૈશ્ચ પ્રાણાયામેન શુધ્યતિ ॥ ૧૧.૧૯૯॥

ષષ્ઠાન્નકાલતા માસં સંહિતાજપ એવ વા ।

હોમાશ્ચ સકલા નિત્યમપાઙ્ક્ત્યાનાં વિશોધનમ્ ॥ ૧૧.૨૦૦॥ હોમાશ્ચ શાકલા

ઉષ્ટ્રયાનં સમારુહ્ય ખરયાનં તુ કામતઃ ।
સ્નાત્વા તુ વિપ્રો દિગ્વાસાઃ પ્રાણાયામેન શુધ્યતિ ॥ ૧૧.૨૦૧॥

વિનાઽદ્ભિરપ્સુ વાઽપ્યાર્તઃ શારીરં સંનિષેવ્ય ચ ।
સચૈલો બહિરાપ્લુત્ય ગામાલભ્ય વિશુધ્યતિ ॥ ૧૧.૨૦૨॥

વેદોદિતાનાં નિત્યાનાં કર્મણાં સમતિક્રમે ।
સ્નાતકવ્રતલોપે ચ પ્રાયશ્ચિત્તમભોજનમ્ ॥ ૧૧.૨૦૩॥

હુઙ્કારં બ્રાહ્મણસ્યોક્ત્વા ત્વઙ્કારં ચ ગરીયસઃ ।
સ્નાત્વાઽનશ્નન્નહઃ શેષમભિવાદ્ય પ્રસાદયેત્ ॥ ૧૧.૨૦૪॥

તાડયિત્વા તૃણેનાપિ કણ્ઠે વાઽબધ્ય વાસસા ।
વિવાદે વા વિનિર્જિત્ય પ્રણિપત્ય પ્રસાદયેત્ ॥ ૧૧.૨૦૫॥

અવગૂર્ય ત્વબ્દશતં સહસ્રમભિહત્ય ચ ।
જિઘાંસયા બ્રાહ્મણસ્ય નરકં પ્રતિપદ્યતે ॥ ૧૧.૨૦૬॥

શોણિતં યાવતઃ પાંસૂન્ સઙ્ગૃહ્ણાતિ મહીતલે ।
તાવન્ત્યબ્દસહસ્રાણિ તત્કર્તા નરકે વસેત્ ॥ ૧૧.૨૦૭॥ નરકે વ્રજેત્

અવગૂર્ય ચરેત્કૃચ્છ્રમતિકૃચ્છ્રં નિપાતને ।
કૃચ્છ્રાતિકૃચ્છ્રૌ કુર્વીત વિપ્રસ્યોત્પાદ્ય શોણિતમ્ ॥ ૧૧.૨૦૮॥

અનુક્તનિષ્કૃતીનાં તુ પાપાનામપનુત્તયે ।
શક્તિં ચાવેક્ષ્ય પાપં ચ પ્રાયશ્ચિત્તં પ્રકલ્પયેત્ ॥ ૧૧.૨૦૯॥

યૈરભ્યુપાયૈરેનાંસિ માનવો વ્યપકર્ષતિ ।
તાન્ વોઽભ્યુપાયાન્ વક્ષ્યામિ દેવર્ષિપિતૃસેવિતાન્ ॥ ૧૧.૨૧૦॥

ત્ર્યહં પ્રાતસ્ત્ર્યહં સાયં ત્ર્યહમદ્યાદયાચિતમ્ ।
ત્ર્યહં પરં ચ નાશ્નીયાત્પ્રાજાપત્યં ચરન્ દ્વિજઃ ॥ ૧૧.૨૧૧॥

ગોમૂત્રં ગોમયં ક્ષીરં દધિ સર્પિઃ કુશોદકમ્ ।
એકરાત્રોપવાસશ્ચ કૃચ્છ્રં સાંતપનં સ્મૃતમ્ ॥ ૧૧.૨૧૨॥

એકૈકં ગ્રાસમશ્નીયાત્ત્ર્યહાણિ ત્રીણિ પૂર્વવત્ ।
ત્ર્યહં ચોપવસેદન્ત્યમતિકૃચ્છ્રં ચરન્ દ્વિજઃ ॥ ૧૧.૨૧૩॥

તપ્તકૃચ્છ્રં ચરન્ વિપ્રો જલક્ષીરઘૃતાનિલાન્ ।
પ્રતિત્ર્યહં પિબેદુષ્ણાન્ સકૃત્સ્નાયી સમાહિતઃ ॥ ૧૧.૨૧૪॥

યતાત્મનોઽપ્રમત્તસ્ય દ્વાદશાહમભોજનમ્ ।
પરાકો નામ કૃચ્છ્રોઽયં સર્વપાપાપનોદનઃ ॥ ૧૧.૨૧૫॥

એકૈકં હ્રાસયેત્પિણ્ડં કૃષ્ણે શુક્લે ચ વર્ધયેત્ ।
ઉપસ્પૃશંસ્ત્રિષવણમેતચ્ચાણ્દ્રાયણં સ્મૃતમ્ ॥ ૧૧.૨૧૬॥

એતમેવ વિધિં કૃત્સ્નમાચરેદ્યવમધ્યમે ।
શુક્લપક્ષાદિનિયતશ્ચરંશ્ચાન્દ્રાયણં વ્રતમ્ ॥ ૧૧.૨૧૭॥

અષ્ટાવષ્ટૌ સમશ્નીયાત્પિણ્ડાન્ મધ્યંદિને સ્થિતે ।
નિયતાત્મા હવિષ્યાશી યતિચાન્દ્રાયણં ચરન્ ॥ ૧૧.૨૧૮॥

ચતુરઃ પ્રાતરશ્નીયાત્પિણ્ડાન્ વિપ્રઃ સમાહિતઃ ।
ચતુરોઽસ્તમિતે સૂર્યે શિશુચાન્દ્રાયણં સ્મૃતમ્ ॥ ૧૧.૨૧૯॥

યથા કથં ચિત્પિણ્ડાનાં તિસ્રોઽશીતીઃ સમાહિતઃ ।
માસેનાશ્નન્ હવિષ્યસ્ય ચન્દ્રસ્યૈતિ સલોકતામ્ ॥ ૧૧.૨૨૦॥

એતદ્રુદ્રાસ્તથાઽદિત્યા વસવશ્ચાચરન્ વ્રતમ્ ।
સર્વાકુશલમોક્ષાય મરુતશ્ચ મહર્ષિભિઃ ॥ ૧૧.૨૨૧॥

મહાવ્યાહૃતિભિર્હોમઃ કર્તવ્યઃ સ્વયમન્વહમ્ ।
અહિંસા સત્યમક્રોધમાર્જવં ચ સમાચરેત્ ॥ ૧૧.૨૨૨॥

ત્રિરહ્નસ્ત્રિર્નિશાયાં ચ સવાસા જલમાવિશેત્ ।
સ્ત્રીશૂદ્રપતિતાંશ્ચૈવ નાભિભાષેત કર્હિ ચિત્ ॥ ૧૧.૨૨૩॥

સ્થાનાસનાભ્યાં વિહરેદશક્તોઽધઃ શયીત વા ।
બ્રહ્મચારી વ્રતી ચ સ્યાદ્ગુરુદેવદ્વિજાર્ચકઃ ॥ ૧૧.૨૨૪॥

સાવિત્રીં ચ જપેન્નિત્યં પવિત્રાણિ ચ શક્તિતઃ ।
સર્વેષ્વેવ વ્રતેષ્વેવં પ્રાયશ્ચિત્તાર્થમાદૃતઃ ॥ ૧૧.૨૨૫॥

એતૈર્દ્વિજાતયઃ શોધ્યા વ્રતૈરાવિષ્કૃતેનસઃ ।
અનાવિષ્કૃતપાપાંસ્તુ મન્ત્રૈર્હોમૈશ્ચ શોધયેત્ ॥ ૧૧.૨૨૬॥

ખ્યાપનેનાનુતાપેન તપસાઽધ્યયનેન ચ ।
પાપકૃન્મુચ્યતે પાપાત્તથા દાનેન ચાપદિ ॥ ૧૧.૨૨૭॥

યથા યથા નરોઽધર્મં સ્વયં કૃત્વાઽનુભાષતે ।
તથા તથા ત્વચૈવાહિસ્તેનાધર્મેણ મુચ્યતે ॥ ૧૧.૨૨૮॥

યથા યથા મનસ્તસ્ય દુષ્કૃતં કર્મ ગર્હતિ ।
તથા તથા શરીરં તત્તેનાધર્મેણ મુચ્યતે ॥ ૧૧.૨૨૯॥

કૃત્વા પાપં હિ સંતપ્ય તસ્માત્પાપાત્પ્રમુચ્યતે ।
નૈવં કુર્યાં પુનરિતિ નિવૃત્ત્યા પૂયતે તુ સઃ ॥ ૧૧.૨૩૦॥

એવં સઞ્ચિન્ત્ય મનસા પ્રેત્ય કર્મફલોદયમ્ ।
મનોવાઙ્મૂર્તિભિર્નિત્યં શુભં કર્મ સમાચરેત્ ॥ ૧૧.૨૩૧॥

અજ્ઞાનાદ્યદિ વા જ્ઞાનાત્કૃત્વા કર્મ વિગર્હિતમ્ ।
તસ્માદ્વિમુક્તિમન્વિચ્છન્ દ્વિતીયં ન સમાચરેત્ ॥ ૧૧.૨૩૨॥

યસ્મિન્ કર્મણ્યસ્ય કૃતે મનસઃ સ્યાદલાઘવમ્ ।
તસ્મિંસ્તાવત્તપઃ કુર્યાદ્યાવત્તુષ્ટિકરં ભવેત્ ॥ ૧૧.૨૩૩॥

તપોમૂલમિદં સર્વં દૈવમાનુષકં સુખમ્ ।
તપોમધ્યં બુધૈઃ પ્રોક્તં તપોઽન્તં વેદદર્શિભિઃ ॥ ૧૧.૨૩૪॥

બ્રાહ્મણસ્ય તપો જ્ઞાનં તપઃ ક્ષત્રસ્ય રક્ષણમ્ ।
વૈશ્યસ્ય તુ તપો વાર્તા તપઃ શૂદ્રસ્ય સેવનમ્ ॥ ૧૧.૨૩૫॥

ઋષયઃ સંયતાત્માનઃ ફલમૂલાનિલાશનાઃ ।
તપસૈવ પ્રપશ્યન્તિ ત્રૈલોક્યં સચરાચરમ્ ॥ ૧૧.૨૩૬॥

ઔષધાન્યગદો વિદ્યા દૈવી ચ વિવિધા સ્થિતિઃ ।
તપસૈવ પ્રસિધ્યન્તિ તપસ્તેષાં હિ સાધનમ્ ॥ ૧૧.૨૩૭॥

યદ્દુસ્તરં યદ્દુરાપં યદ્દુર્ગં યચ્ચ દુષ્કરમ્ ।
સર્વં તુ તપસા સાધ્યં તપો હિ દુરતિક્રમમ્ ॥ ૧૧.૨૩૮॥ સર્વં તત્તપસા

મહાપાતકિનશ્ચૈવ શેષાશ્ચાકાર્યકારિણઃ ।
તપસૈવ સુતપ્તેન મુચ્યન્તે કિલ્બિષાત્તતઃ ॥ ૧૧.૨૩૯॥

કીટાશ્ચાહિપતઙ્ગાશ્ચ પશવશ્ચ વયાંસિ ચ ।
સ્થાવરાણિ ચ ભૂતાનિ દિવં યાન્તિ તપોબલાત્ ॥ ૧૧.૨૪૦॥

યત્કિં ચિદેનઃ કુર્વન્તિ મનોવાઙ્મૂર્તિભિર્જનાઃ । મનોવાચ્।કર્મભિર્

તત્સર્વં નિર્દહન્ત્યાશુ તપસૈવ તપોધનાઃ ॥ ૧૧.૨૪૧॥

તપસૈવ વિશુદ્ધસ્ય બ્રાહ્મણસ્ય દિવૌકસઃ ।
ઇજ્યાશ્ચ પ્રતિગૃહ્ણન્તિ કામાન્ સંવર્ધયન્તિ ચ ॥ ૧૧.૨૪૨॥

પ્રજાપતિરિદં શાસ્ત્રં તપસૈવાસૃજત્પ્રભુઃ ।
તથૈવ વેદાન્ ઋષયસ્તપસા પ્રતિપેદિરે ॥ ૧૧.૨૪૩॥

ઇત્યેતત્તપસો દેવા મહાભાગ્યં પ્રચક્ષતે । યદેતત્તપસો
સર્વસ્યાસ્ય પ્રપશ્યન્તસ્તપસઃ પુણ્યમુત્તમમ્ ॥ ૧૧.૨૪૪॥ પુણ્યમુદ્ભવં

વેદાભ્યાસોઽન્વહં શક્ત્યા મહાયજ્ઞક્રિયા ક્ષમા ।
નાશયન્ત્યાશુ પાપાનિ મહાપાતકજાન્યપિ ॥ ૧૧.૨૪૫॥

યથૈધસ્તેજસા વહ્નિઃ પ્રાપ્તં નિર્દહતિ ક્ષણાત્ ।
તથા જ્ઞાનાગ્નિના પાપં સર્વં દહતિ વેદવિત્ ॥ ૧૧.૨૪૬॥

ઇત્યેતદેનસામુક્તં પ્રાયશ્ચિત્તં યથાવિધિ ।
અત ઊર્ધ્વં રહસ્યાનાં પ્રાયશ્ચિત્તં નિબોધત ॥ ૧૧.૨૪૭॥

સવ્યાહૃતિપ્રણવકાઃ પ્રાણાયામાસ્તુ ષોડશ ।
અપિ ભ્રૂણહનં માસાત્પુનન્ત્યહરહઃ કૃતાઃ ॥ ૧૧.૨૪૮॥

કૌત્સં જપ્ત્વાઽપ ઇત્યેતદ્વસિષ્ઠં ચ પ્રતીત્યૃચમ્ ।
માહિત્રં શુદ્ધવત્યશ્ચ સુરાપોઽપિ વિશુધ્યતિ ॥ ૧૧.૨૪૯॥

સકૃત્જપ્ત્વાઽસ્યવામીયં શિવસઙ્કલ્પમેવ ચ ।
અપહૃત્ય સુવર્ણં તુ ક્ષણાદ્ભવતિ નિર્મલઃ ॥ ૧૧.૨૫૦॥

હવિષ્પાન્તીયમભ્યસ્ય ન તમં હ ઇતીતિ ચ ।
જપિત્વા પૌરુષં સૂક્તં મુચ્યતે ગુરુતલ્પગઃ ॥ ૧૧.૨૫૧॥

એનસાં સ્થૂલસૂક્ષ્માણાં ચિકીર્ષન્નપનોદનમ્ ।
અવેત્યૃચં જપેદબ્દં યત્કિઞ્ચેદમિતીતિ વા ॥ ૧૧.૨૫૨॥

પ્રતિગૃહ્યાપ્રતિગ્રાહ્યં ભુક્ત્વા ચાન્નં વિગર્હિતમ્ ।
જપંસ્તરત્સમન્દીયં પૂયતે માનવસ્ત્ર્યહાત્ ॥ ૧૧.૨૫૩॥

સોમારૌદ્રં તુ બહ્વેનાઃ માસમભ્યસ્ય શુધ્યતિ । સમામભ્યસ્ય)
સ્રવન્ત્યામાચરન્ સ્નાનમર્યમ્ણામિતિ ચ તૃચમ્ ॥ ૧૧.૨૫૪॥

અબ્દાર્ધમિન્દ્રમિત્યેતદેનસ્વી સપ્તકં જપેત્ ।
અપ્રશસ્તં તુ કૃત્વાઽપ્સુ માસમાસીત ભૈક્ષભુક્ ॥ ૧૧.૨૫૫ ॥

મન્ત્રૈઃ શાકલહોમીયૈરબ્દં હુત્વા ઘૃતં દ્વિજઃ ।
સુગુર્વપ્યપહન્ત્યેનો જપ્ત્વા વા નમ ઇત્યૃચમ્ ॥ ૧૧.૨૫૬ ॥

મહાપાતકસંયુક્તોઽનુગચ્છેદ્ગાઃ સમાહિતઃ ।
અભ્યસ્યાબ્દં પાવમાનીર્ભૈક્ષાહારો વિશુધ્યતિ ॥ ૧૧.૨૫૭ ॥

અરણ્યે વા ત્રિરભ્યસ્ય પ્રયતો વેદસંહિતામ્ ।
મુચ્યતે પાતકૈઃ સર્વૈઃ પરાકૈઃ શોધિતસ્ત્રિભિઃ ॥ ૧૧.૨૫૮ ॥

ત્ર્યહં તૂપવસેદ્યુક્તસ્ત્રિરહ્નોઽભ્યુપયન્નપઃ ।
મુચ્યતે પાતકૈઃ સર્વૈસ્ત્રિર્જપિત્વાઽઘમર્ષણમ્ ॥ ૧૧.૨૫૯ ॥

યથાઽશ્વમેધઃ ક્રતુરાટ્ સર્વપાપાપનોદનઃ ।
તથાઽઘમર્ષણં સૂક્તં સર્વપાપાપનોદનમ્ ॥ ૧૧.૨૬૦ ॥

હત્વા લોકાનપીમાંસ્ત્રીનશ્નન્નપિ યતસ્તતઃ ।
ઋગ્વેદં ધારયન્ વિપ્રો નૈનઃ પ્રાપ્નોતિ કિં ચન ॥ ૧૧.૨૬૧ ॥

ઋક્સંહિતાં ત્રિરભ્યસ્ય યજુષાં વા સમાહિતઃ ।
સામ્નાં વા સરહસ્યાનાં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૧.૨૬૨ ॥

યથા મહાહ્રદં પ્રાપ્ય ક્ષિપ્તં લોષ્ટં વિનશ્યતિ ।
તથા દુશ્ચરિતં સર્વં વેદે ત્રિવૃતિ મજ્જતિ ॥ ૧૧.૨૬૩ ॥

ઋચો યજૂંષિ ચાન્યાનિ સામાનિ વિવિધાનિ ચ ।
એષ જ્ઞેયસ્ત્રિવૃદ્વેદો યો વેદૈનં સ વેદવિત્ ॥ ૧૧.૨૬૪ ॥

આદ્યં યત્ર્યક્ષરં બ્રહ્મ ત્રયી યસ્મિન્ પ્રતિષ્ઠિતા ।
સ ગુહ્યોઽન્યસ્ત્રિવૃદ્વેદો યસ્તં વેદ સ વેદવિત્ ॥ ૧૧.૨૬૫ ॥

## અધ્યાય ૧૨

ચાતુર્વર્ણ્યસ્ય કૃત્સ્નોઽયમુક્તો ધર્મસ્ત્વયાઽનઘઃ ।
કર્મણાં ફલનિર્વૃત્તિં શંસ નસ્તત્ત્વતઃ પરામ્ ॥ ૧૨.૧ ॥

સ તાનુવાચ ધર્માત્મા મહર્ષીન્ માનવો ભૃગુઃ ।
અસ્ય સર્વસ્ય શ‍ૃણુત કર્મયોગસ્ય નિર્ણયમ્ ॥ ૧૨.૨ ॥

શુભાશુભફલં કર્મ મનોવાગ્દેહસમ્ભવમ્ ।
કર્મજા ગતયો નૃણામુત્તમાધમમધ્યમઃ ॥ ૧૨.૩॥

તસ્યેહ ત્રિવિધસ્યાપિ ત્ર્યધિષ્ઠાનસ્ય દેહિનઃ ।
દશલક્ષણયુક્તસ્ય મનો વિદ્યાત્પ્રવર્તકમ્ ॥ ૧૨.૪॥

પરદ્રવ્યેષ્વભિધ્યાનં મનસાઽનિષ્ટચિન્તનમ્ ।
વિતથાભિનિવેશશ્ચ ત્રિવિધં કર્મ માનસમ્ ॥ ૧૨.૫॥

પારુષ્યમનૃતં ચૈવ પૈશુન્યં ચાપિ સર્વશઃ ।
અસમ્બદ્ધપ્રલાપશ્ચ વાઙ્મયં સ્યાચ્ચતુર્વિધમ્ ॥ ૧૨.૬॥

અદત્તાનામુપાદાનં હિંસા ચૈવાવિધાનતઃ ।
પરદારોપસેવા ચ શારીરં ત્રિવિધં સ્મૃતમ્ ॥ ૧૨.૭॥

માનસં મનસૈવાયમુપભુઙ્ક્તે શુભાશુભમ્ ।
વાચા વાચા કૃતં કર્મ કાયેનેવ ચ કાયિકમ્ ॥ ૧૨.૮॥

શરીરજૈઃ કર્મદોષૈર્યાતિ સ્થાવરતાં નરઃ ।
વાચિકૈઃ પક્ષિમૃગતાં માનસૈરન્ત્યજાતિતામ્ ॥ ૧૨.૯॥

વાગ્દણ્ડોઽથ મનોદણ્ડઃ કાયદણ્ડસ્તથૈવ ચ ।
યસ્યૈતે નિહિતા બુદ્ધૌ ત્રિદણ્ડીતિ સ ઉચ્યતે ॥ ૧૨.૧૦॥

ત્રિદણ્ડમેતન્નિક્ષિપ્ય સર્વભૂતેષુ માનવઃ ।
કામક્રોધૌ તુ સંયમ્ય તતઃ સિદ્ધિં નિયચ્છતિ ॥ ૧૨.૧૧॥ કામક્રોધૌ સુસંયમ્ય તતઃ સિદ્ધિં નિગચ્છતિ

યોઽસ્યાત્મનઃ કારયિતા તં ક્ષેત્રજ્ઞં પ્રચક્ષતે ।
યઃ કરોતિ તુ કર્માણિ સ ભૂતાત્મોચ્યતે બુધૈઃ ॥ ૧૨.૧૨॥

જીવસંજ્ઞોઽન્તરાત્માઽન્યઃ સહજઃ સર્વદેહિનામ્ ।
યેન વેદયતે સર્વં સુખં દુઃખં ચ જન્મસુ ॥ ૧૨.૧૩॥

તાવુભૌ ભૂતસમ્પૃક્તૌ મહાન્ ક્ષેત્રજ્ઞ એવ ચ ।
ઉચ્ચાવચેષુ ભૂતેષુ સ્થિતં તં વ્યાપ્ય તિષ્ઠતઃ ॥ ૧૨.૧૪॥

અસઙ્ખ્યા મૂર્તયસ્તસ્ય નિષ્પતન્તિ શરીરતઃ ।
ઉચ્ચાવચાનિ ભૂતાનિ સતતં ચેષ્ટયન્તિ યાઃ ॥ ૧૨.૧૫॥

પઞ્ચભ્ય એવ માત્રાભ્યઃ પ્રેત્ય દુષ્કૃતિનાં નૃણામ્ । પઞ્ચભ્ય એવ ભૂતેભ્યઃ

શરીરં યાતનાર્થીયમન્યદુત્પદ્યતે ધ્રુવમ્ ॥ ૧૨.૧૬॥

તેનાનુભૂય તા યામીઃ શરીરેણેહ યાતનાઃ ।
તાસ્વેવ ભૂતમાત્રાસુ પ્રલીયન્તે વિભાગશઃ ॥ ૧૨.૧૭॥

સોઽનુભૂયાસુખોદર્કાન્ દોષાન્ વિષયસઙ્ગજાન્ ।
વ્યપેતકલ્મષોઽભ્યેતિ તાવેવોભૌ મહૌજસૌ ॥ ૧૨.૧૮॥

તૌ ધર્મં પશ્યતસ્તસ્ય પાપં ચાતન્દ્રિતૌ સહ ।
યાભ્યાં પ્રાપ્નોતિ સમ્પૃક્તઃ પ્રેત્યેહ ચ સુખાસુખમ્ ॥ ૧૨.૧૯॥

યદ્યાચરતિ ધર્મં સ પ્રાયશોઽધર્મમલ્પશઃ । યથાચરતિ)
તૈરેવ ચાવૃતો ભૂતૈઃ સ્વર્ગે સુખમુપાશ્નુતે ॥ ૧૨.૨૦॥

યદિ તુ પ્રાયશોઽધર્મં સેવતે ધર્મમલ્પશઃ ।
તૈર્ભૂતૈઃ સ પરિત્યક્તો યામીઃ પ્રાપ્નોતિ યાતનાઃ ॥ ૧૨.૨૧॥

યામીસ્તા યાતનાઃ પ્રાપ્ય સ જીવો વીતકલ્મષઃ ।
તાન્યેવ પઞ્ચ ભૂતાનિ પુનરપ્યેતિ ભાગશઃ ॥ ૧૨.૨૨॥

એતા દૃષ્ટ્વાઽસ્ય જીવસ્ય ગતીઃ સ્વેનૈવ ચેતસા ।
ધર્મતોઽધર્મતશ્ચૈવ ધર્મે દધ્યાત્સદા મનઃ ॥ ૧૨.૨૩॥

સત્ત્વં રજસ્તમશ્ચૈવ ત્રીન્ વિદ્યાદાત્મનો ગુણાન્ ।
યૈર્વ્યાપ્યેમાન્ સ્થિતો ભાવાન્ મહાન્ સર્વાનશેષતઃ ॥ ૧૨.૨૪॥

યો યદૈષાં ગુણો દેહે સાકલ્યેનાતિરિચ્યતે ।
સ તદા તદ્ગુણપ્રાયં તં કરોતિ શરીરિણમ્ ॥ ૧૨.૨૫॥

સત્ત્વં જ્ઞાનં તમોઽજ્ઞાનં રાગદ્વેષૌ રજઃ સ્મૃતમ્ ।
એતદ્વ્યાપ્તિમદેતેષાં સર્વભૂતાશ્રિતં વપુઃ ॥ ૧૨.૨૬॥

તત્ર યત્પ્રીતિસંયુક્તં કિંચિદાત્મનિ લક્ષયેત્ ।
પ્રશાન્તમિવ શુદ્ધાભં સત્ત્વં તદુપધારયેત્ ॥ ૧૨.૨૭॥

યત્તુ દુઃખસમાયુક્તમપ્રીતિકરમાત્મનઃ ।
તદ્રજો પ્રતીપં વિદ્યાત્સતતં હારિ દેહિનામ્ ॥ ૧૨.૨૮॥ હર્તૃ

યત્તુ સ્યાન્ મોહસંયુક્તમવ્યક્તં વિષયાત્મકમ્ ।
અપ્રતર્ક્યમવિજ્ઞેયં તમસ્તદુપધારયેત્ ॥ ૧૨.૨૯॥

ત્રયાણામપિ ચૈતેષાં ગુણાનાં યઃ ફલોદયઃ ।
અગ્ર્યો મધ્યો જઘન્યશ્ચ તં પ્રવક્ષ્યામ્યશેષતઃ ॥ ૧૨.૩૦॥

વેદાભ્યાસસ્તપો જ્ઞાનં શૌચમિન્દ્રિયનિગ્રહઃ ।
ધર્મક્રિયાऽત્મચિન્તા ચ સાત્ત્વિકં ગુણલક્ષણમ્ ॥ ૧૨.૩૧॥

આરમ્ભરુચિતાऽધૈર્યમસત્કાર્યપરિગ્રહઃ ।
વિષયોપસેવા ચાજસ્રં રાજસં ગુણલક્ષણમ્ ॥ ૧૨.૩૨॥

લોભઃ સ્વપ્નોऽધૃતિઃ ક્રૌર્યં નાસ્તિક્યં ભિન્નવૃત્તિતા ।
યાચિષ્ણુતા પ્રમાદશ્ચ તામસં ગુણલક્ષણમ્ ॥ ૧૨.૩૩॥

ત્રયાણામપિ ચૈતેષાં ગુણાનાં ત્રિષુ તિષ્ઠતામ્ ।
ઇદં સામાસિકં જ્ઞેયં ક્રમશો ગુણલક્ષણમ્ ॥ ૧૨.૩૪॥

યત્કર્મ કૃત્વા કુર્વંશ્ચ કરિષ્યંશ્ચૈવ લજ્જતિ ।
તજ્જ્ઞેયં વિદુષા સર્વં તામસં ગુણલક્ષણમ્ ॥ ૧૨.૩૫॥

યેનાસ્મિન્ કર્મણા લોકે ખ્યાતિમિચ્છતિ પુષ્કલામ્ ।
ન ચ શોચત્યસમ્પત્તૌ તદ્વિજ્ઞેયં તુ રાજસમ્ ॥ ૧૨.૩૬॥

યત્સર્વેણેચ્છતિ જ્ઞાતું યન્ન લજ્જતિ ચાચરન્ ।
યેન તુષ્યતિ ચાત્માऽસ્ય તત્સત્ત્વગુણલક્ષણમ્ ॥ ૧૨.૩૭॥

તમસો લક્ષણં કામો રજસસ્ત્વર્થ ઉચ્યતે ।
સત્ત્વસ્ય લક્ષણં ધર્મઃ શ્રૈષ્ઠ્યમેષાં યથોત્તરમ્ ॥ ૧૨.૩૮॥

યેન યસ્તુ ગુણેનૈષાં સંસરાન્ પ્રતિપદ્યતે । યેન યાંસ્તુ
તાન્ સમાસેન વક્ષ્યામિ સર્વસ્યાસ્ય યથાક્રમમ્ ॥ ૧૨.૩૯॥

દેવત્વં સાત્ત્વિકા યાન્તિ મનુષ્યત્વં ચ રાજસાઃ ।
તિર્યક્ત્વં તામસા નિત્યમિત્યેષા ત્રિવિધા ગતિઃ ॥ ૧૨.૪૦॥

ત્રિવિધા ત્રિવિધૈષા તુ વિજ્ઞેયા ગૌણિકી ગતિઃ ।
અધમા મધ્યમાગ્ર્યા ચ કર્મવિદ્યાવિશેષતઃ ॥ ૧૨.૪૧॥

સ્થાવરાઃ કૃમિકીટાશ્ચ મત્સ્યાઃ સર્પાઃ સકચ્છપાઃ ।
પશવશ્ચ મૃગાશ્ચૈવ જઘન્યા તામસી ગતિઃ ॥ ૧૨.૪૨॥

હસ્તિનશ્ચ તુરઙ્ગાશ્ચ શૂદ્રા મ્લેચ્છાશ્ચ ગર્હિતાઃ ।
સિંહા વ્યાઘ્રા વરાહાશ્ચ મધ્યમા તામસી ગતિઃ ॥ ૧૨.૪૩॥

ચારણાશ્ચ સુપર્ણાશ્ચ પુરુષાશ્ચૈવ દામ્ભિકાઃ ।
રક્ષાંસિ ચ પિશાચાશ્ચ તામસીષૂત્તમા ગતિઃ ॥ ૧૨.૪૪॥

ઝલ્લા મલ્લા નટાશ્ચૈવ પુરુષાઃ શસ્ત્રવૃત્તયઃ ।
દ્યૂતપાનપ્રસક્તાશ્ચ જઘન્યા રાજસી ગતિઃ ॥ ૧૨.૪૫॥

રાજાનઃ ક્ષત્રિયાશ્ચૈવ રાજ્ઞાં ચૈવ પુરોહિતાઃ ।
વાદયુદ્ધપ્રધાનાશ્ચ મધ્યમા રાજસી ગતિઃ ॥ ૧૨.૪૬॥

ગન્ધર્વા ગુહ્યકા યક્ષા વિબુધાનુચરાશ્ચ યે ।
તથૈવાપ્સરસઃ સર્વા રાજસીષૂત્તમા ગતિઃ ॥ ૧૨.૪૭॥

તાપસા યતયો વિપ્રા યે ચ વૈમાનિકા ગણાઃ ।
નક્ષત્રાણિ ચ દૈત્યાશ્ચ પ્રથમા સાત્ત્વિકી ગતિઃ ॥ ૧૨.૪૮॥

યજ્વાન ઋષયો દેવા વેદા જ્યોતીંષિ વત્સરાઃ ।
પિતરશ્ચૈવ સાધ્યાશ્ચ દ્વિતીયા સાત્ત્વિકી ગતિઃ ॥ ૧૨.૪૯॥

બ્રહ્મા વિશ્વસૃજો ધર્મો મહાનવ્યક્તમેવ ચ ।
ઉત્તમાં સાત્ત્વિકીમેતાં ગતિમાહુર્મનીષિણઃ ॥ ૧૨.૫૦॥

એષ સર્વઃ સમુદ્દિષ્ટસ્ત્રિપ્રકારસ્ય કર્મણઃ । ત્રિઃ।પ્રકારસ્ય
ત્રિવિધસ્ત્રિવિધઃ કૃત્સ્નઃ સંસારઃ સાર્વભૌતિકઃ ॥ ૧૨.૫૧॥

ઇન્દ્રિયાણાં પ્રસઙ્ગેન ધર્મસ્યાસેવનેન ચ ।
પાપાન્ સંયાન્તિ સંસારાનવિદ્વાંસો નરાધમાઃ ॥ ૧૨.૫૨॥

યાં યાં યોનિં તુ જીવોઽયં યેન યેનૈહ કર્મણા ।
ક્રમશો યાતિ લોકેઽસ્મિંસ્તત્તત્સર્વં નિબોધત ॥ ૧૨.૫૩॥

બહૂન્ વર્ષગણાન્ ઘોરાન્નરકાન્ પ્રાપ્ય તત્ક્ષયાત્ ।
સંસારાન્ પ્રતિપદ્યન્તે મહાપાતકિનસ્ત્વિમાન્ ॥ ૧૨.૫૪॥

શ્વસૂકરખરોષ્ટ્રાણાં ગોઽજાવિમૃગપક્ષિણામ્ ।
ચણ્ડાલપુક્કસાનાં ચ બ્રહ્મહા યોનિમૃચ્છતિ ॥ ૧૨.૫૫॥

કૃમિકીટપતઙ્ગાનાં વિડ્ભુજાં ચૈવ પક્ષિણામ્ ।
હિંસ્રાણાં ચૈવ સત્ત્વાનાં સુરાપો બ્રાહ્મણો વ્રજેત્ ॥ ૧૨.૫૬॥

લૂતાઽહિસરટાનાં ચ તિરશ્ચાં ચામ્બુચારિણામ્ ।

હિંસ્રાણાં ચ પિશાચાનાં સ્તેનો વિપ્રઃ સહસ્રશઃ ॥ ૧૨.૫૭॥

તૃણગુલ્મલતાનાં ચ ક્રવ્યાદાં દંષ્ટ્રિણામપિ ।
ક્રૂરકર્મકૃતાં ચૈવ શતશો ગુરુતલ્પગઃ ॥ ૧૨.૫૮॥

હિંસ્રા ભવન્તિ ક્રવ્યાદાઃ કૃમયોઽમેધ્યભક્ષિણઃ ।
પરસ્પરાદિનઃ સ્તેનાઃ પ્રેત્યાન્ત્યસ્ત્રીનિષેવિણઃ ॥ ૧૨.૫૯॥

સંયોગં પતિતૈર્ગત્વા પરસ્યૈવ ચ યોષિતમ્ ।
અપહૃત્ય ચ વિપ્રસ્વં ભવતિ બ્રહ્મરાક્ષસઃ ॥ ૧૨.૬૦॥

મણિમુક્તાપ્રવાલાનિ હૃત્વા લોભેન માનવઃ ।
વિવિધાણિ ચ રત્નાનિ જાયતે હેમકર્તૃષુ ॥ ૧૨.૬૧॥

ધાન્યં હૃત્વા ભવત્યાખુઃ કાંસ્યં હંસો જલં પ્લવઃ ।
મધુ દંશઃ પયઃ કાકો રસં શ્વા નકુલો ઘૃતમ્ ॥ ૧૨.૬૨॥

માંસં ગૃધ્રો વપાં મદ્ગુસ્તૈલં તૈલપકઃ ખગઃ ।
ચીરીવાકસ્તુ લવણં બલાકા શકુનિર્દધિ ॥ ૧૨.૬૩॥

કૌશેયં તિત્તિરિર્હૃત્વા ક્ષૌમં હૃત્વા તુ દર્દુરઃ ।
કાર્પાસતાન્તવં ક્રૌઞ્ચો ગોધા ગાં વાગ્ગુદો ગુડમ્ ॥ ૧૨.૬૪॥

છુચ્છુન્દરિઃ શુભાન્ ગન્ધાન્ પત્રશાકં તુ બર્હિણઃ । છુચ્છુન્દરીઃ
શ્વાવિત્કૃતાન્નં વિવિધમકૃતાન્નં તુ શલ્યકઃ ॥ ૧૨.૬૫॥

બકો ભવતિ હૃત્વાઽગ્નિં ગૃહકારી હ્યુપસ્કરમ્ ।
રક્તાનિ હૃત્વા વાસાંસિ જાયતે જીવજીવકઃ ॥ ૧૨.૬૬॥

વૃકો મૃગેભં વ્યાઘ્રોઽશ્વં ફલમૂલં તુ મર્કટઃ ।
સ્ત્રીં ઋક્ષઃ સ્તોકકો વારિ યાનાન્યુષ્ટ્રઃ પશૂનજઃ ॥ ૧૨.૬૭॥

યદ્વા તદ્વા પરદ્રવ્યમપહૃત્ય બલાન્નરઃ ।
અવશ્યં યાતિ તિર્યક્ત્વં જગ્ધ્વા ચૈવાહુતં હવિઃ ॥ ૧૨.૬૮॥

સ્ત્રિયોઽપ્યેતેન કલ્પેન હૃત્વા દોષમવાપ્નુયુઃ ।
એતેષામેવ જન્તૂનાં ભાર્યાત્વમુપયાન્તિ તાઃ ॥ ૧૨.૬૯॥

સ્વેભ્યઃ સ્વેભ્યસ્તુ કર્મભ્યશ્ચ્યુતા વર્ણા હ્યનાપદિ ।
પાપાન્ સંસૃત્ય સંસારાન્ પ્રેષ્યતાં યાન્તિ શત્રુષુ ॥ ૧૨.૭૦॥ યાન્તિ દસ્યુષુ

વાન્તાશ્યુલ્કામુખઃ પ્રેતો વિપ્રો ધર્માત્સ્વકાચ્ચ્યુતઃ ।
અમેધ્યકુણપાશી ચ ક્ષત્રિયઃ કટપૂતનઃ ॥ ૧૨.૭૧॥ કૂટપૂતનઃ

મૈત્રાક્ષજ્યોતિકઃ પ્રેતો વૈશ્યો ભવતિ પૂયભુક્ । મૈત્રાક્ષિજ્યોતિકઃ
ચૈલાશકશ્ચ ભવતિ શૂદ્રો ધર્માત્સ્વકાચ્ચ્યુતઃ ॥ ૧૨.૭૨॥

યથા યથા નિષેવન્તે વિષયાન્ વિષયાત્મકાઃ ।
તથા તથા કુશલતા તેષાં તેષૂપજાયતે ॥ ૧૨.૭૩॥

તેઽભ્યાસાત્કર્મણાં તેષાં પાપાનામલ્પબુદ્ધયઃ ।
સમ્પ્રાપ્નુવન્તિ દુઃખાનિ તાસુ તાસ્વિહ યોનિષુ ॥ ૧૨.૭૪॥

તામિસ્રાદિષુ ચોગ્રેષુ નરકેષુ વિવર્તનમ્ ।
અસિપત્રવનાદીનિ બન્ધનછેદનાનિ ચ ॥ ૧૨.૭૫॥

વિવિધાશ્ચૈવ સમ્પીડાઃ કાકોલૂકૈશ્ચ ભક્ષણમ્ ।
કરમ્ભવાલુકાતાપાન્ કુમ્ભીપાકાંશ્ચ દારુણાન્ ॥ ૧૨.૭૬॥

સમ્ભવાંશ્ચ વિયોનીષુ દુઃખપ્રાયાસુ નિત્યશઃ ।
શીતાતપાભિઘાતાંશ્ચ વિવિધાનિ ભયાનિ ચ ॥ ૧૨.૭૭॥

અસકૃદ્ગર્ભવાસેષુ વાસં જન્મ ચ દારુણમ્ ।
બન્ધનાનિ ચ કાષ્ઠાનિ પરપ્રેષ્યત્વમેવ ચ ॥ ૧૨.૭૮॥ કષ્ટાનિ

બન્ધુપ્રિયવિયોગાંશ્ચ સંવાસં ચૈવ દુર્જનૈઃ ।
દ્રવ્યાર્જનં ચ નાશં ચ મિત્રામિત્રસ્ય ચાર્જનમ્ ॥ ૧૨.૭૯॥

જરાં ચૈવાપ્રતીકારાં વ્યાધિભિશ્ચોપપીડનમ્ ।
ક્લેશાંશ્ચ વિવિધાંસ્તાંસ્તાન્ મૃત્યુમેવ ચ દુર્જયમ્ ॥ ૧૨.૮૦॥

યાદૃશેન તુ ભાવેન યદ્યત્કર્મ નિષેવતે ।
તાદૃશેન શરીરેણ તત્તત્ફલમુપાશ્નુતે ॥ ૧૨.૮૧॥

એષ સર્વઃ સમુદ્દિષ્ટઃ કર્મણાં વઃ ફલોદયઃ ।
નૈઃશ્રેયસકરં કર્મ વિપ્રસ્યેદં નિબોધત ॥ ૧૨.૮૨॥

વેદાભ્યાસસ્તપો જ્ઞાનમિન્દ્રિયાણાં ચ સંયમઃ ।
અહિંસા ગુરુસેવા ચ નિઃશ્રેયસકરં પરમ્ ॥ ૧૨.૮૩॥

સર્વેષામપિ ચૈતેષાં શુભાનામિહ કર્મણામ્ ।
કિં ચિત્શ્રેયસ્કરતરં કર્મોક્તં પુરુષં પ્રતિ ॥ ૧૨.૮૪॥

સર્વેષામપિ ચૈતેષામાત્મજ્ઞાનં પરં સ્મૃતમ્ ।
તદ્ધ્યગ્ર્યં સર્વવિદ્યાનાં પ્રાપ્યતે હ્યમૃતં તતઃ ॥ ૧૨.૮૫॥

ષણ્ણામેષાં તુ સર્વેષાં કર્મણાં પ્રેત્ય ચૈહ ચ ।
શ્રેયસ્કરતરં જ્ઞેયં સર્વદા કર્મ વૈદિકમ્ ॥ ૧૨.૮૬॥

વૈદિકે કર્મયોગે તુ સર્વાણ્યેતાન્યશેષતઃ ।
અન્તર્ભવન્તિ ક્રમશસ્તસ્મિંસ્તસ્મિન્ ક્રિયાવિધૌ ॥ ૧૨.૮૭॥

સુખાભ્યુદયિકં ચૈવ નૈઃશ્રેયસિકમેવ ચ ।
પ્રવૃત્તં ચ નિવૃત્તં ચ દ્વિવિધં કર્મ વૈદિકમ્ ॥ ૧૨.૮૮॥

ઇહ ચામુત્ર વા કામ્યં પ્રવૃત્તં કર્મ કીર્ત્યતે ।
નિષ્કામં જ્ઞાતપૂર્વં તુ નિવૃત્તમુપદિશ્યતે ॥ ૧૨.૮૯॥

પ્રવૃત્તં કર્મ સંસેવ્ય દેવાનામેતિ સામ્યતામ્ ।
નિવૃત્તં સેવમાનસ્તુ ભૂતાન્યત્યેતિ પઞ્ચ વૈ ॥ ૧૨.૯૦॥

સર્વભૂતેષુ ચાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
સમં પશ્યન્નાત્મયાજી સ્વારાજ્યમધિગચ્છતિ ॥ ૧૨.૯૧॥

યથોક્તાન્યપિ કર્માણિ પરિહાય દ્વિજોત્તમઃ ।
આત્મજ્ઞાને શમે ચ સ્યાદ્વેદાભ્યાસે ચ યત્નવાન્ ॥ ૧૨.૯૨॥

એતદ્ધિ જન્મસાફલ્યં બ્રાહ્મણસ્ય વિશેષતઃ ।
પ્રાપ્યૈતત્કૃતકૃત્યો હિ દ્વિજો ભવતિ નાન્યથા ॥ ૧૨.૯૩॥

પિતૃદેવમનુષ્યાણાં વેદશ્ચક્ષુઃ સનાતનમ્ ।
અશક્યં ચાપ્રમેયં ચ વેદશાસ્ત્રમિતિ સ્થિતિઃ ॥ ૧૨.૯૪॥

યા વેદબાહ્યાઃ સ્મૃતયો યાશ્ચ કાશ્ચ કુદૃષ્ટયઃ । શ્રુતયો
સર્વાસ્તા નિષ્ફલાઃ પ્રેત્ય તમોનિષ્ઠા હિ તાઃ સ્મૃતાઃ ॥ ૧૨.૯૫॥

ઉત્પદ્યન્તે ચ્યવન્તે ચ યાન્યતોઽન્યાનિ કાનિ ચિત્ । ઉત્પદ્યન્તે વિનશ્યન્તિ
તાન્યર્વાક્કાલિકતયા નિષ્ફલાન્યનૃતાનિ ચ ॥ ૧૨.૯૬॥

ચાતુર્વર્ણ્યં ત્રયો લોકાશ્ચત્વારશ્ચાશ્રમાઃ પૃથક્ ।
ભૂતં ભવ્યં ભવિષ્યં ચ સર્વં વેદાત્પ્રસિધ્યતિ ॥ ૧૨.૯૭॥ ભૂતં ભવદ્ભવિષ્યં ચ

શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધશ્ચ પઞ્ચમઃ ।

વેદાદેવ પ્રસૂયન્તે પ્રસૂતિર્ગુણકર્મતઃ ॥ ૧૨.૯૮॥

બિભર્તિ સર્વભૂતાનિ વેદશાસ્ત્રં સનાતનમ્ ।
તસ્માદેતત્પરં મન્યે યત્જન્તોરસ્ય સાધનમ્ ॥ ૧૨.૯૯॥

સેનાપત્યં ચ રાજ્યં ચ દણ્ડનેતૃત્વમેવ ચ । સૈનાપત્યં
સર્વલોકાધિપત્યં ચ વેદશાસ્ત્રવિદર્હતિ ॥ ૧૨.૧૦૦॥

યથા જાતબલો વહ્નિર્દહત્યાર્દ્રાનપિ દ્રુમાન્ ।
તથા દહતિ વેદજ્ઞઃ કર્મજં દોષમાત્મનઃ ॥ ૧૨.૧૦૧॥

વેદશાસ્ત્રાર્થતત્ત્વજ્ઞો યત્ર તત્રાશ્રમે વસન્ ।
ઇહૈવ લોકે તિષ્ઠન્ સ બ્રહ્મભૂયાય કલ્પતે ॥ ૧૨.૧૦૨॥

અજ્ઞેભ્યો ગ્રન્થિનઃ શ્રેષ્ઠા ગ્રન્થિભ્યો ધારિણો વરાઃ ।
ધારિભ્યો જ્ઞાનિનઃ શ્રેષ્ઠા જ્ઞાનિભ્યો વ્યવસાયિનઃ ॥ ૧૨.૧૦૩॥

તપો વિદ્યા ચ વિપ્રસ્ય નિઃશ્રેયસકરં પરમ્ ।
તપસા કિલ્બિષં હન્તિ વિદ્યયાऽમૃતમશ્નુતે ॥ ૧૨.૧૦૪॥

પ્રત્યક્ષં ચાનુમાનં ચ શાસ્ત્રં ચ વિવિધાऽऽગમમ્ ।
ત્રયં સુવિદિતં કાર્યં ધર્મશુદ્ધિમભીપ્સતા ॥ ૧૨.૧૦૫॥

આર્ષં ધર્મોપદેશં ચ વેદશાસ્ત્રાવિરોધિના ।
યસ્તર્કેણાનુસંધત્તે સ ધર્મં વેદ નૈતરઃ ॥ ૧૨.૧૦૬॥

નૈઃશ્રેયસમિદં કર્મ યથોદિતમશેષતઃ ।
માનવસ્યાસ્ય શાસ્ત્રસ્ય રહસ્યમુપદિશ્યતે ॥ ૧૨.૧૦૭॥ ઉપદેક્ષ્યતે

અનામ્નાતેષુ ધર્મેષુ કથં સ્યાદિતિ ચેદ્ભવેત્ ।
યં શિષ્ટા બ્રાહ્મણા બ્રૂયુઃ સ ધર્મઃ સ્યાદશઙ્કિતઃ ॥ ૧૨.૧૦૮॥

ધર્મેણાધિગતો યૈસ્તુ વેદઃ સપરિબૃંહણઃ ।
તે શિષ્ટા બ્રાહ્મણા જ્ઞેયાઃ શ્રુતિપ્રત્યક્ષહેતવઃ ॥ ૧૨.૧૦૯॥

દશાવરા વા પરિષદ્યં ધર્મં પરિકલ્પયેત્ ।
ત્ર્યવરા વાऽપિ વૃત્તસ્થા તં ધર્મં ન વિચાલયેત્ ॥ ૧૨.૧૧૦॥

ત્રૈવિદ્યો હેતુકસ્તર્કી નૈરુક્તો ધર્મપાઠકઃ ।
ત્રયશ્ચાશ્રમિણઃ પૂર્વે પરિષત્સ્યાદ્દશાવરા ॥ ૧૨.૧૧૧॥

ઋગ્વેદવિદ્યજુર્વિદ્ચ સામવેદવિદેવ ચ ।
ત્ર્યવરા પરિષદ્જ્ઞેયા ધર્મસંશયનિર્ણયે ॥ ૧૨.૧૧૨॥

એકોઽપિ વેદવિદ્ધર્મં યં વ્યવસ્યેદ્દ્વિજોત્તમઃ ।
સ વિજ્ઞેયઃ પરો ધર્મો નાજ્ઞાનામુદિતોઽયુતૈઃ ॥ ૧૨.૧૧૩॥

અવ્રતાનામમન્ત્રાણાં જાતિમાત્રોપજીવિનામ્ ।
સહસ્રશઃ સમેતાનાં પરિષત્ત્વં ન વિદ્યતે ॥ ૧૨.૧૧૪॥

યં વદન્તિ તમોભૂતા મૂર્ખા ધર્મમતદ્વિદઃ ।
તત્પાપં શતધા ભૂત્વા તદ્વક્તૄનનુગચ્છતિ ॥ ૧૨.૧૧૫॥

એતદ્વોઽભિહિતં સર્વં નિઃશ્રેયસકરં પરમ્ ।
અસ્માદપ્રચ્યુતો વિપ્રઃ પ્રાપ્નોતિ પરમાં ગતિમ્ ॥ ૧૨.૧૧૬॥

એવં સ ભગવાન્ દેવો લોકાનાં હિતકામ્યયા ।
ધર્મસ્ય પરમં ગુહ્યં મમેદં સર્વમુક્તવાન્ ॥ ૧૨.૧૧૭॥

સર્વમાત્મનિ સમ્પશ્યેત્સત્ચાસત્ચ સમાહિતઃ ।
સર્વં હ્યાત્મનિ સમ્પશ્યન્નાધર્મે કુરુતે મનઃ ॥ ૧૨.૧૧૮॥

આત્મૈવ દેવતાઃ સર્વાઃ સર્વમાત્મન્યવસ્થિતમ્ ।
આત્મા હિ જનયત્યેષાં કર્મયોગં શરીરિણામ્ ॥ ૧૨.૧૧૯॥

ખં સંનિવેશયેત્ખેષુ ચેષ્ટનસ્પર્શનેઽનિલમ્ ।
પક્તિદૃષ્ટ્યોઃ પરં તેજઃ સ્નેહેઽપો ગાં ચ મૂર્તિષુ ॥ ૧૨.૧૨૦॥

મનસીન્દું દિશઃ શ્રોત્રે ક્રાન્તે વિષ્ણું બલે હરમ્ ।
વાચ્યગ્નિં મિત્રમુત્સર્ગે પ્રજને ચ પ્રજાપતિમ્ ॥ ૧૨.૧૨૧॥

પ્રશાસિતારં સર્વેષામણીયાંસમણોરપિ ।
રુક્માભં સ્વપ્નધીગમ્યં વિદ્યાત્તં પુરુષં પરમ્ ॥ ૧૨.૧૨૨॥

એતમેકે વદન્ત્યગ્નિં મનુમન્યે પ્રજાપતિમ્ ।
ઇન્દ્રમેકે પરે પ્રાણમપરે બ્રહ્મ શાશ્વતમ્ ॥ ૧૨.૧૨૩॥

એષ સર્વાણિ ભૂતાનિ પઞ્ચભિર્વ્યાપ્ય મૂર્તિભિઃ ।
જન્મવૃદ્ધિક્ષયૈર્નિત્યં સંસારયતિ ચક્રવત્ ॥ ૧૨.૧૨૪॥

એવં યઃ સર્વભૂતેષુ પશ્યત્યાત્માનમાત્મના ।
સ સર્વસમતામેત્ય બ્રહ્માભ્યેતિ પરં પદમ્ ॥ ૧૨.૧૨૫॥

ઇત્યેતન્ માનવં શાસ્ત્રં ભૃગુપ્રોક્તં પઠન્ દ્વિજઃ ।
ભવત્યાચારવાન્નિત્યં યથેષ્ટાં પ્રાપ્નુયાદ્ગતિમ્ ॥ ૧૨.૧૨૬॥

## સમાપ્તં માનવં ધર્મશાસ્ત્રમ્

The original file (manu.dhz) was Encoded and partly
proofread by Prof. Michio YANO and Y.IKARI.
Prof. Avinash Sathaye, NA

---

*ManusmRti*
pdf was typeset on March 6, 2022

Please send corrections to *sanskrit@cheerful.com*